Barcode : 99999990293710
Title - Shri Updesh Chintamani Bhag-4
Author - Suri,Jaishekhar
Language - sanskrit
Pages - 222
Publication Year - 1922
Barcode EAN.UCC-13



॥ श्रीजिनाय नम ॥

15956

॥ श्रीउपदेशचिंतामणिः भाग ४ ॥

(कर्ता श्रीजयशेखरसूरिः)

उपाधी प्रमिट करनार

पंडित श्रावक हीरालाल हंसराज. (जामनगरवाला)

BHARATIYA VIDYA BHAVAN LIBRARY

ADP
JAY

वीरसंवत् २४५५ विक्रमसं० १९८८, सने १९२२

किंमत—रु. ३-८-०

श्री जैनभास्करोदय प्रिन्टिंग प्रेस—जामनगर.

॥ श्रीजिनाय नमः ॥

॥ श्रीचारित्रविजयगुरुभ्यो नमः ॥

॥ अथ श्रीउपदेशचिंतामणिः सटीकः प्रारभ्यते ॥

(कर्ता जयशेखरसूरिः)

(चतुर्थो भागः)

उपाधी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा).

अथ चतुर्थः सर्वविरत्यधिकारः प्रस्तूयते, तस्य च पूर्वेण सह संबंधगर्भां प्रस्तावनामाह—

॥ मूलम् ॥ इइ देसेणं विरई । भणिया इत्तोवि होइ कमणिज्जा ॥ जवाणं सव्वविरई । सरलो मग्गो सिवपुरस्स ॥ १ ॥ व्याख्या—इति पूर्वोक्तरीत्या जणिता प्रतिपादिता मया देशेन विरतिः, इतोऽस्या देशविरतेरपि सर्वविरतिर्भव्यानामालब्धमोक्षाणां कमनीया स्पृहणीया जवति, यत इयासितस्यानंतसुखास्पदस्य शिवपुरस्य सरल ऋजुः पंथाः. यया हि

सर्वविरतास्तद्भावेऽपि मोक्षं व्रजंति, न तथा देशविरतास्तेषां भवांतरेणैव मोक्षाभिधानादि-त्यनेन संबंधेनायमधिकारः प्रस्तूयते; अथ सर्वविरतिप्रतिपादिकां द्वारगाथामाह—

॥ मूलम् ॥ वेरग्गं चारित्ते, । पडिवत्तिनाणविणयकिरियाउ ॥ संयमभेया मुणिगुण-दिणकिच्चफलाइं इह वुच्छं ॥ २ ॥ व्याख्या-न हि वैराग्यं विना सर्वविरतिरुपतिष्ठते, इति प्रथमं वैराग्यं, वैराग्ये सत्यपि कोऽपि परीषहादिभीरुतया दीक्षां न प्रपद्यते, ततश्चारित्रे चारित्रविषये प्रतिपत्तिमंगीकारं, ततो यथोत्तरं प्राधान्येन ज्ञानविनयक्रियास्ततः संयमभेदान् सप्तदश, ततो मुनिनां गुणान्, ततः साधोर्दिनकृत्यं, दिनगणनाऽऽत्रिरपि ग्राह्या. ततः सुपालितायाः सर्वविरतेः फलमिह चतुर्थाधिकारे वक्ष्ये इति सर्वत्र योज्यं. तत्र पूर्वं वैराग्यस्वरूपमाह—

॥ मूलम् ॥ रोगेण व सोगेण व । दुक्खेण व जं जगाणं उव्वसइ ॥ मग्गंति न वेरग्गं । तं विबुधा अप्पकालंति ॥ ३ ॥ व्याख्या-रोगेण वा कासश्वासादिना, शोकेन वा पुत्रवियोगजन्मना, दुःखेन वा वधबंधादिकेन हेतुना जगतां निर्विवेकानां यद्वैराग्यं, धिगमुं रोग-

शोकाद्यपायबहुलं संसारमसारमिति विमर्शात्मकमुद्वसति, तद्वैराग्यं विबुधा न मार्गयंति, न स्पृहयंति, सर्वविरत्यनर्हत्वात् सर्वविरत्यनर्हत्वं, तस्य कस्मादित्याह–'अप्पकालंति' अल्पकालावस्थायित्वात्; अल्पकालावस्थायित्वं च रोगादिहेतुनिवृत्तौ तस्यापि निवर्तनात्, अत एव नैतद्विबुधानां स्पृहणीयमिति. अथ सर्वविरतियोग्यं वैराग्यमाह—

॥ मूलम् ॥ सुहियस्स व दुहियस्स व । जं वेरग्गं नवे विवेएण ॥ पायं अपच्चवायं । तं चिय चारित्ततरुबीयं ॥ ४ ॥ व्याख्या–सुखितस्य वा दुःखितस्य वा जंतोर्यद्वैराग्यं विवेकेन सम्यक् तत्त्वावबोधेन हेतुभूतेन नवेत्, तदेवं वैराग्यं प्रायोऽप्रत्यपायमविनश्वरं विवेकमूलतया दुःखादेर्निवृत्तावपि तस्यानिवर्तनादत एवैतत्सम्यक्त्वमूलस्य प्रथमव्रतस्कंधस्य शेषव्रतशाखस्य प्रशमादिप्रशाखस्य सकलक्रियाकलापपत्रवलस्य लब्धिकुसुमस्य मोक्षफलस्य चारित्रतरोरुपादकत्वाद्बीजमिव बीजं भवति. स्तुतिकारोऽप्याह–दुःखगर्भं मोहगर्भं । वैराग्यं निष्फलं परे ॥ ज्ञानगर्भं तु वैराग्यं । तत्त्वज्ञेवायतंतां गतं ॥ १ ॥ प्रायोग्रहणं नंदिषेणादिषु व्यभिचारस्यापि दर्शनात्. ननु भवदुःखार्त्तस्य वैराग्यं सहेतुकत्वात्सुखिनः पुनर्विषान् शब्दादिविषयान्

पयानुपजुंजानस्य कथं तत्संजव इत्याह—

॥ मूलम् ॥ जे जे जावा संसार-कारणं हुंति रागवंताणं ॥ ते चेव विरत्ताणं । निव्वुइ-पहसाहगा जणिया ॥ ५ ॥ व्याख्या-ते ये जावा स्वजनांगधनादयः सरागया बुद्ध्या विचार्यमाणा रागवतां संसारकारणं जवति त एव तावंतो जावा वैराग्यबुद्ध्या विचार्यमाणा विरक्तानां निवृत्तिपथस्य सम्यग्ज्ञानक्रियात्मकस्य साधका जणिता उक्ताः परमर्षिजिः. तथा चागमः-जे जत्तिया य जावा । जवस्स ते चेव तत्तिया मुक्के ॥ गणणाइया पुणा । जुक्ति लोगा जवे तुल्ला ॥ १ ॥ सोऽयं जावः-इह न किमपि वस्तुतः संसारस्य मोक्षस्य च हेतुमाक्रांयते, राग वैराग्ययोरेव तत्कारणत्वात्, ततस्तस्मिन्नेव वस्तुनि यो ममत्वकारणं रागाध्यवसायः स संसारहेतुकः, यश्च मुमुक्षात्मको वैराग्याध्यवसायः स मोक्षहेतुकः. अथैकस्यैव वस्तुनः संसारमोक्षहेतुतां दृष्टांतपूर्वमाह—

॥ मूलम् ॥ जं जत्तं पाणं वा । सरसं आसाइजण नवेइ ॥ तं मलमुत्तनिमित्तं-ति क-स्स न जणेइ वेरग्गं ॥ ६ ॥ व्याख्या-यद्जक्तं शाल्यादि, पानकं वा सरसमास्वाद्य सद्यः

सरागो नोक्ता नृत्यति हर्षप्रकर्षजाग् नवति, तदेव नक्तं पानकं वा परिणामे मलमूत्रानाम-
त्तमिति बुद्ध्या चिंत्यमानं कस्य मुमुक्षोर्वैराग्यं न जनयति? अपि तु जनयत्येव. तदेवमेक-
स्य नक्तस्य पानकस्य वा सरसतया मलमूत्रादिनिमित्ततया च विचार्यमाणस्य यथा राग-
वैराग्यहेतुता दर्शिता तथा सर्वेष्वपि वस्तुषु भावनीया. एतदेवाह—

॥ मूलम् ॥—जेण अलंकारेणं । अलंकिउं होइ रमणीमणइट्ठो ॥ सोवि परमत्थनास-
त्तिकस्स न जणेइ वेरग्गं ॥ ७ ॥ पासंतो फासंतो । जं रमणिं मन्नए महासुक्खं ॥ सावि
कूमी कूमाणं—ति कस्स न जणेइ वेरग्गं ॥ ८ ॥ दव्वस्स जस्स कज्जे । नियए पाणे गणेइ ति-
णरूवे ॥ सोवि खणदिट्ठनट्ठो—त्ति कस्स न जणेइ वेरग्गं ॥ ९ ॥ जं पालियरज्जसिरिं । मन्न-
इ अमरेसरं व अप्पाणं ॥ स नरयगइनिमित्तं—ति कस्स न जणेइ वेरग्गं ॥ १० ॥ व्याख्या—
चतस्रोऽपि गतार्थाः.

॥ मूलम् ॥— एवं सव्वे भावे । भावेमाणे विरत्तिहेउहिं ॥ को नायरिज्ज कुसलो । परि-
णामे सुंदरं चरणं ॥ ११ ॥ व्याख्या—एवमुक्तया दिशा सर्वानुक्तव्यतिरिक्तानपि भावान् परि-

णामविरसत्वाद्विरक्तिजननैकहेतुत्वेनाचरंस्तं कः कुशलश्चरणं चारित्रं नाद्रियेत? अपि त्वाद्रियेतैवेति द्वितीयद्वारपरामर्शः. ननु सर्वज्ञावांतःपातित्वेन चारित्रमपि परिणामविरसं भविष्यतीत्याह-परिणामे आयतौ वक्ष्यमाणरीत्या सुंदरं प्रधानं, अयमर्थः-इह सर्वेऽपि संसारिकाः शोभना भावा मुखमधुरतया किंपाकफलवदज्ञानानां रागं जनयंति परिणामदारुणत्वाच्च सज्ञानानां वैराग्यमिति. चारित्रं पुनस्तथाविधौषधवदापातकटुकमपि परिणतौ गुणकारकत्वात्कुशलानां कमनीयतामेव धत्ते. परिणामसुंदरत्वमेवाह—

॥ मूलम् ॥-नाणस्स लद्धीण य होइ लंभो । जुगत्तमिंदाइय वंदणस्स ॥ पत्ते चरित्ते न भयं न चिंता । न पुत्तमित्ताइवियोगदुक्खं ॥ १२ ॥ व्याख्या-चारित्रे प्राप्ते ज्ञानानां मतिश्रुतादीनां लब्धीनां चामर्षौषध्यादीनां लाभो भवति, तथेंद्रादीनां वंदनस्य योग्यत्वं जायते, कदापि कामदोषादिंद्रादयः साक्षादुपेत्य न वंदंते तथापि तद्वंदनयोग्यता चारित्रिणोऽस्त्येवोपरितनगुणस्थानवर्तित्वात्, तथा न राजचौरादिभ्यो भयं प्रादुर्भवति, अकिंचनत्वात्. कथमहं निर्वहिष्यामीति चिंताराक्षसी न चेतोग्रस्ते निष्क्रांतोजितत्वात्. न च पुत्र-

मित्रादिवियोगदुःखं वर्धते निःप्रतिबंधत्वात्. यदुक्तं–नो दुष्कर्मप्रयासो न कुयुवतिसुतस्वामिदुर्वाक्यदुःखं । राजादौ न प्रणामोऽशनवसनधनस्थानचिंता न चैव ॥ ज्ञानातिलोकपूजा प्रशमसुखरसः प्रेत्य मोक्षाद्यवाप्तिः । श्रामण्येऽमी गुणाः स्युस्तदिह सुमतयः किं न यत्नं कुरुध्वं ॥ १ ॥ ततः किमित्याह—

॥ मूलम् ॥–जइ चिंतेइ सुहं ता । देवाणहियं दुहं तु जं किंपि ॥ तंपि सुहकारणं ता । उवयारेणं सुहं चेव ॥ १३ ॥ अतः कारणाद्यदि जीवः सद्बोधिसुधाधौतं विवेकलोचनमुद्घाट्य बाह्ये लोचने क्षणं निमील्य चिंतयति तदा चारित्रे प्राप्ते सुखं देवेभ्योऽधिकं वर्तते, अयं भावः—इह नारकाणां तिरश्चां च का चर्या दुःखमयत्वात्. मनुष्याणां पुनः—न श्रीर्मे विपुला वधूर्न च मता जातायत्ता सूनवो । ज्ञाता वा न गुणास्पदं न च मुदं दत्ते कुटुंबं मम ॥ दिष्ट्या भूमिपतिः खलाश्च कुदृशो देहं रुगार्त्तं सुतो–ऽहो भूरिकृणं तृणंति गृहिणां चेतांसि चिंता इमाः ॥ १ ॥ ततस्तेऽपि नात्र ग्राह्याः, देवाः पुनर्यद्यपि मुक्तरोगा इष्टावधि प्राप्तसमग्रभोगास्तथापि चिंतार्तिवियोगवत्त्वान्न वस्तुतस्तेऽपि सुखं भजंते. अतश्चारित्रिणां सुखं

देवेभ्योऽप्युत्कृष्टं चिंतादिरहितत्वात् दुःख तुर्यांशकमपि दृश्यते परिषहादिकं तदपि सुखकारणत्वादुपचारेण सुखमेव भवति, चकारेण कार्यव्यपदेशः, यथा तंडुलान् वर्षति पर्जन्य इति. किंच—

॥ मूलम् ॥–कम्मगिरिगरिम असणी । जरारोगाणोसहिव निम्महणी ॥ सिवनयरगमणविजा । एस चिय होइ पव्वज्जा ॥ १४ ॥ व्याख्या–कर्माण्येव दृढत्वाद्गिरयस्तेषां गरिम्ण प्रौढतायाः उच्छेदनेऽशनिर्वज्रं विद्युद्वा, जरा नरनारकाद्यवतारास्त एव दुःखकरत्वाद्रोगास्तेषामौषधीव निर्मथनीकरणेन, शेषं स्पष्टं. अथास्य चारित्रस्य व्यक्तस्य फलं पुरो वक्ष्यते, अव्यक्तस्य त्वत्राह—

॥ मूलम् ॥–करवत्तदारणाइ–दारुणदुक्कं सहंति जस्स कए ॥ अव्वत्तपि चरित्तं । जं रज्जं देइ जीवाणं ॥ १५ ॥ व्याख्या–करपत्रदारणमादिर्यस्य नृगुपातात्प्रिप्रवेशादेस्तत्करपत्रदारणादिकं दारुणमपि दुःखं सहंते मिथ्यादृश इति गम्यते, अव्यक्तं तथाविधबोधरहितमपि चारित्रं कर्तृ तद्राज्यं कर्मतापन्नं जीवेभ्यो ददाति. तथा च श्रूयते–पुरा प्रसूते दुर्मिकपुरे

वुभुक्षाक्रामकुक्षिः कश्चिद् डमरकः साधूनां भिक्षाप्राचुर्यमालोक्य प्रव्रव्राज. स चैकदिवसं पालितव्रतो निशि सूचिकया विद्ध्य सद्यस्तत्प्रभावादवंध्यां संप्रतिर्नाम नरपतिर्बभूव. इह केऽपि स्वजनस्नेहग्रहिलहृदया एवंविधामपि प्रव्रज्यांप्रत्यलसायंते तान्प्रत्याह—

॥ मूलम् ॥–तेसिं सयणाण कए । चइए को वल्लहं चरणलच्छिं ॥ जाण सिणेहो असुहो । अवहुत्थिइ विहरणसीलो ॥ १६ ॥ व्याख्या–तेषां स्वजनानां कृते कः कृती वत्सलां सकलसुखदायित्वेन तात्त्विकस्नेहवतीं चरणलक्ष्मीं चारित्रश्रियं त्यजति? तेषां केषामित्याह–येषां स्नेहोऽशुभो दुर्गतिबंधनत्वात्, यदाहुः–अमित्तो मित्तवेसेण । कंठे घित्तूण रोयइ ॥ मा मित्ता सोहगं जाहि । दोवि गन्नामो दोगइं ॥ १ ॥ तथा अवहुस्थितिरल्पकालजाग्येकजविकत्वात्. उक्तं च–जहा संझाए रुक्खंमि । मिलंति विहगा बहू ॥ पंथिया पहिआवासे । जहा देसांतरागया ॥ १ ॥ पहासे जंति सव्वेवि । अन्नमन्नदिसंतरं ॥ एवं कुटुंबवासेवि । संगया बहवो जिया ॥ २ ॥ कस्सवि कोइ न इट्ठो । इक्कंचिय इट्ठ अप्पणो कज्जं ॥ कज्जावगिया संसा–रियाण सव्वेवि संबंधा ॥ १७ ॥ व्याख्या–उत्तानार्थाः. अत्रांतरे कश्चिदाह–न

अस्माकं धनलम्भेऽपारिद्र्यप्रतिबंधकः. तिरस्कारो दुष्कृतापाकरणद्वारः कथमर्थवत्त्वे मुक्तय इति संप्रत्याह—

॥ मूलम् ॥—दुंदि दु एकणासंति । पुत्राणुत्तेण सामा कवि ॥ तं न वहिउं न मुहुं । तिप्पंत दिवोलिया गया ॥ १७ ॥ व्याख्या—कुलवंधुकीना यशका एकस्यापि दुष्कृत्य कथानुत्तेन कथानुसा कथा लभंते. तो न तं कथापाकरणं न वोढुं शंकाः. कुटुंबस्नेहावधिदानाभावात्. न च मोक्तुमपि शक्याः प्रतिबंधदुःखदानात्. यदा पिपीलिकाः क्षिप्तं तत्फलं प्राप्य नागदत्तात् लब्धुं. मोक्तुं शक्नुवंतीति. नहि पुनः स्त्रीणाः क्षीरेण व्याख्यानयति—

॥ मूलम् ॥ अवरे वरवलए इय । पडमं धरिउं समागया तिपुरं ॥ पडा एणेण वहुकुल । मरिवहिकं गया मुक्कं ॥ १८ ॥ व्याख्या—सुगमा, नवरमवरे श्रीमत्समवसरणे मुक्तं वैमणे ज्ञानप्रतिपक्षनिधेनि ज्ञानकं. अथ ज्ञानकारं विवरिषुराह—

॥ मूलम् ॥ सोहम्मवडेंसगेणं । सक्के पणे समुल्लसमु नाणे ॥ जं अंकुसेण वुच्चइ—गणयं

मुणिणो भणगयस्स ॥ २० ॥ व्याख्या-स्पष्टा, नवरं जंति यद्ज्ञानं मुनेर्मनोगजस्योत्पथग-
तस्यांकुशवत्सन्मार्गानयनक्षममिति. अथ ज्ञानस्य मुख्यां चारित्रांगतामाह—

॥ मूलम् ॥-हियमहियं वा पढमं । जाणंति तओ समायरंति हियं ॥ तम्मा नाणाइ-
त्तं । मुणीण सयलं अणुट्ठाणं ॥ २१ ॥ व्याख्या-सुबोधा, अथ ज्ञानिनोऽज्ञानस्य च मियो
महदंतरमाह—

॥ मूलम् ॥-मणिपत्थराण पुण्णिम-कुहूण तह चक्कुमंतअंधाणं ॥ जा होइ इह विसे-
सो । सुद्धिय नाणीण इयराणं ॥ २२ ॥ व्याख्या-योजनिका सुगमा, नावर्यस्त्वयं-यथा
मणिर्द्रव्यलक्षैरपि क्रीत्वा गृहमध्यमानीयते, प्रस्तरस्तु गृहमध्यस्थोऽपि वहिः क्षिप्यते, पूर्णि-
मा च पूर्णेंदुना दिनायितोद्योतेति सर्वेषामिष्टानिष्टा च तमोमयीत्यमावास्या चक्षुष्मांस्तु स-
र्ववस्तुस्तोमं स्वयं पश्यन् स्वतंत्रोंधश्च पदे-पदे परतंत्र इति. तथा ज्ञानी सर्वेषामिष्टः स्वतं-
त्रश्च सर्वविचारेषु, इतरस्त्वनिष्टः परमुखप्रेक्षकश्च विचारावसरे इति. यद्यपि सक्रियः साधुः
सर्वेषां मान्यो भवति तथापि ज्ञानाधिकत्वेन विशेषमाह—

॥ मूलम् ॥-पुणो मणिय फलिउं । नरय जत्तपूरिउं तत्तायव ॥ मुयसंपुणो साहू । ज॰ ल फरस न पवज्जो होइ ॥ २३ ॥ व्याख्या-सुबोधा, ननु ज्ञानवंतोऽपि केचन प्रतिपतंतो दृ॰ ष्टान्तः किमनेन ज्ञानानिगोगेनेत्याह—

॥ मूलम् ॥-जइ अमुद्धकम्मयमउं । जाणंतो कहसिंसगए मेरं ॥ न य सवहा विण गउ । नवरि आगासनूइव ॥ २४ ॥ व्याख्या-स्पष्टा-, नवरं 'मेरंति' चारित्रमर्यादां, न च सर्वथा विनश्यति कदाचिदात्मानं समुद्धरणेयेति. नावार्थः कथानकगम्यस्तच्चेदं—

मगधेषम्मि विम्मार-सारं राजगृहं पुरं ॥ गृधिकूटे प्रथितोऽपासी-त्तस्मिन्नरथपार्थिव. ॥ १ ॥ तत्राऽन्यदा समाजग्मुः । श्रीधर्मरुचिसूरयः ॥ तद्भिक्षाः पर्यटन् मध्ये-नगरं नेष्टदे॰ वयं ॥ २ ॥ तत प्रनावसंपन्न-प्रकृतिः प्रतिपद्यं ब्रमन् ॥ आपादमूनिनामर्षि-र्विवेश नटमन्न नि ॥ ३ ॥ तत्रैकं मोदकं प्राप्य । निर्गतः स तमचिंतयत् ॥ अयं नाटकृगेनाथी । ब्रमन्नः ब्रम एव मे ॥ ४ ॥ कार्मीरुग्य ननो नेयं । स तत्र प्राविशत्पुनः ॥ प्राप्यैकं मोदकं प्राग्व-र्तिनैः कृतकृत्यवत् ॥ ५ ॥ तदिनायनुपाध्याय-म्येति कृत्तोदमूत्र सः ॥ प्रविशश्च तदा-

गार । मोदकं प्राप्य निर्ययौ ॥ ६ ॥ अथ च म सहायेन । साधुना किल मोदयते ॥ लाला एव मया घुंट्या-स्तटस्थेन विलोकनात् ॥ ७ ॥ इत्यशेषं परावर्त्य । रूपं वैक्रियशक्तितः ॥ नटोकः प्राविशत्साधु-रहो लोभविडंबना ॥ ८ ॥ गवाक्षस्थो नटः सर्व । तद्रूपयाचिंतयन्मुदा ॥ उचितोऽस्माकमेवायं । क्षत्राणामिव युद्धवित् ॥ ९ ॥ लोला ह्यतीव लोलास्य । तया हि विवशाः सुखं ॥ पक्षिणा अपि बध्यन्ते । धीवरैरामिषार्थिनः ॥ १० ॥ अथैत्य मोदकैस्तस्य । नटः पात्रमपूरयत् ॥ नैकायात्र सदागच्छे-रिति प्रार्थयतेस्म तं ॥ ११ ॥ अभूद्बुबुक्षितः शंकः । कोऽप्रहारं त्वपाद्वृतं ॥ इति न्यायान्नटस्योकः । साधुर्नित्यमियाय सः ॥ १२ ॥ प्रविशन्निशं रिक्तः । पूर्णश्च परमोदकैः ॥ निरगन्नटागारा-त्कूपादिव घटो मुनिः ॥ १३ ॥ रूपगंधध्वनिस्वाद-सौकुमार्यैरमोदयत् ॥ मोदकास्तस्य पंचापि । खानि स्मरशरा इव ॥१४॥ नटोऽन्यदा स्वनंदिन्या-वन्वशादिति सादरं ॥ वत्से सोऽयं युवा कोऽन्यो । युवाभ्यां जंगमो निधिः ॥ १५ ॥ प्राकटाद्धास्ततो नर्म । ततो वक्रोक्तिभंगयः ॥ ताभ्यां मुनेर्मनो नेतुं । व्यापार्यत शनैः शनैः ॥ १६ ॥ क्रमाद्धैर्यधनं साधो-र्बलाच्चयामप्यलुंट्यत ॥ यद्वा नहि गृहाया-

तो । द्रुमोंपो बालयोरपि ॥ १७ ॥ तयोर्मृदुगिरोर्लोल-दृशोः सोऽप्यन्वरज्यत ॥ विश्रम्य चालिशान् नावां-स्तत्कृतान् बहुमन्यत ॥ १८ ॥ अन्यदा मादकप्राप्तौ । निर्गच्छन्नटमंदिरात् ॥ क यास्यत्रैव तिष्ठेति । ताभ्यामभ्यर्थितो मुनिः॥ १९ ॥ गुर्वायत्तोऽस्म्यहं तत्ता-ननुज्ञाप्य सुलोचने ॥ एवमेव करिष्यामी-त्युक्त्वा स स्वाश्रयं ययौ ॥ २० ॥ एवं मनसिजाक्रांत-मनसं मुनिसंसदि ॥ ज्ञात्वा कथंचिद्गुरवः । कृपार्द्रा इत्यबोधयन् ॥ २१ ॥ विद्वन् विचार-चक्षुष्मा-नपि किं त्रशसे पथः ॥ श्रुतप्रदीपहस्तोऽपि । किं वा तमसि मज्जसि ॥ २२ ॥ नार्यस्ते हृदये धर्म-ध्यानधौते स्फुरंति किं ॥ तारा हि न विराजंते । व्योम्नि सूर्यांशुमालिनि ॥ २३ ॥ तत् श्रुतं तत्तपः सा च । क्रिया सा च कुलीनता ॥ नारीशरीरकस्यार्थे । यत्स सर्वं किमुज्झसि ॥ २४ ॥ चिरं चारित्रमापाल्य । किं संक्रमसि सांप्रतं ॥ बाहुभ्यामंबुधिं तीर्त्वा । को वा मज्जति गोष्पदे ॥ २५ ॥ इतो गुरुगिरश्चैता-श्चेतो बालामृदूक्तयः ॥ दोलारूढमिवाकार्षुः । क्षणं तस्य मुनेर्मनः ॥ २६ ॥ गुरूक्तीरथ निर्धूय । स्मरोत्तालश्चचाल सः॥ कुतो गंभीरवेदी किं । गणयत्यंकुशाहतीः ॥ २७ ॥ पृष्टदानं गुरोर्मार्गे-दितिपश्चान्मुनैः पदैः॥

निर्गछंति गणात्तस्मिन् । गुरुरूचे मुनोनिति ॥ २८ ॥ अस्य वैनयिकादस्मा-ज्ञानीमः अ-
मणा वयं ॥ अयं ब्रष्टोऽपि न चिरात् । समुध्धृत्य स्वमेष्यति ॥ २९ ॥ सोऽपि प्राप्तो नट-
स्योकः । कन्यके परिणीयते ॥ विषयान् बुबुजे सारा-हारानिव बुबुक्षितः ॥ ३० ॥ प्रछन्नम-
नुशास्तिस्म । नटः स्वतनये इति ॥ अय नाग्यवशात्राव-ब्रवत्योरन्नवत्पतिः ॥ ३१ ॥ पुनर्वा
वीक्ष्य दुर्वृत्त । चित्तमस्य विरंक्ष्यति ॥ सावधानं कुलस्त्रीव-दाराध्यस्तदयं सदा ॥ ३२ ॥ य-
था प्राक् श्रुतचारित्र-श्रीभ्यां सह चिखेल सः ॥ विषदाचारसाराभ्यां । नटीभ्यां च तदा
तथा ॥ ३३ ॥ अन्यदा कर्तुमस्त्रीकं । नाट्यमाषाढभूतिना ॥ नटपेटकयुक्तेन । भूपास्थानमं-
गम्यत ॥ ३४ ॥ बंधमोक्षादिव प्रीते । तदानीं तस्य बल्लने ॥ मंक्षु मैरेयमानीया-पियतां द्र
ढितंरती ॥ ३५ ॥ जातिस्वभावः किल यस्य योऽस्ति । त्यजत्यसौ तन्न सुशिक्षितोऽपि ॥
नृत्ये नियुक्तापि चिरं विशाली । श्रुत्वाखु शब्दं स्वलयं जनक्ति ॥ ३६ ॥ नाट्यावसरमप्राप्य ।
भूपात्कार्यांतराकुलात् ॥ क्षणेनैव न्यवर्तिष्ट । नटैः सह नटाग्रणीः ॥ ३७ ॥ आगतः स्वगृहं
दृष्ट्वा । द्वारपिधानं स शंकितः ॥ दृशं व्यापारयामास । कपाटछिद्रवर्त्मना ॥ ३८ ॥ अंतरै-

क्षिप्त द्यूतात्ते । श्वासंरुद्धजापिके ॥ स मुक्तवसने स्रस्त-रसने वह्वने उने ॥ ३९ ॥ तद्दुर्वृत्तं तयोः साक्षा-द्धृदय दध्या स खिन्नधीः ॥ ईदृशीभिः पुरंध्रीभि-रंचिता निजगत्यहो ॥ ४० ॥ यद्वाभून्मे स्वजिह्वैव । वैरिण्यागः किमेतयोः ॥ यः स्याद्गृहे लघुरसौ । वायुना नीयते बहिः ॥ ४१ ॥ दीक्षा हाहा मयाहारि । दुरापाप्यनयोः कृते ॥ पंकार्थमिव कस्तूरी । काचार्थमिव सन्मणिः ॥ ४२ ॥ गार्हस्थ्यं पंकिलं वीक्ष्य । शुक्लपक्षो विवेकिराट् ॥ स्वर्गछंप्रति सोऽचाली-न्मराल इव मानसं ॥ ४३ ॥ दृशैव तस्य वैराग्यं । जानन् नातायनस्थितः ॥ उपेत्य स्वसुरः स्वीये । तनये इत्यबोधयत् ॥ ४४ ॥ रे रे युष्मत्प्रमादेन । याति कल्पद्रुमो गृहात् ॥ यद्यस्ति कापि शक्तिस्त-दमुं वालयतं द्रुतं ॥ ४५ ॥ अथ ते धाविते सिंह्या-श्चित्र तं साधु-कुंजरं ॥ रुध्वो चतुर्विहायावां । निःपुत्रे यासि किं प्रिय ॥ ४६ ॥ पूर्वं स्वीकृत्य सद्वृत्त । किं नो त्यजसि संप्रति ॥ ग्रंथेष्वेव सुवृत्तानां । श्रिये स्यादात्तमुक्तकं ॥ ४७ ॥ विरक्तः सर्वथा स्मीति । तेनोक्ते ते अवोचतां ॥ यावज्जीवं जीवनार्हं । तद्देहि धनमावयोः ॥ ४८ ॥ एवं स त्यक्तकामोऽपि । बालाभ्यां बालितो बलात् ॥ चकार राष्ट्रपालाख्यं । नवं नरतनाटकं

॥ ४९ ॥ अविसंवादिनीं नर्तु-र्धीरवीरकुलोद्भवां ॥ स नाट्यार्हामयाचिष्ट । पात्रपंचशतीं नृपात् ॥ ५० ॥ प्राप्य तावंति पात्राणि । नाट्यकौतुकिनो नृपात् ॥ सोऽचिराद्ग्राहयामास । सर्वाभिनयचातुरीं ॥ ५१ ॥ अथाग्रे भूपमाषाढो-ऽभिनिन्ये दिग्ज्यादिकं ॥ केवलोत्पादपर्यंतं । चरितं भरतेशितुः ॥ ५२ ॥ तुष्टः क्षितिपतिस्तस्मै । धनमिच्छाधिकं ददौ ॥ तत्सर्वं स्वगृहे प्रैषि । पत्न्योराषाढभूतिना ॥ ५३ ॥ स्वयं च चिकुराँल्लुंच-न्नैर्ग्रंथं वेषमादधत् ॥ निरगान्निर्मितानंग-रंगजंगः सरंगतः ॥ ५४ ॥ नाट्यमेतन्निवर्तस्व । क्व यासीति नृपोदितः ॥ सोऽभ्यधाद्देव यस्यैत-न्नाट्यं किं स न्यवर्तत ॥५५॥ मया भरतवन्नाट्य-मन्यथा नाटकं वृथा ॥ स एवमालपन्नेव । सह पात्रैर्गुरून् ययौ ॥ ५६ ॥ सम्यक्पात्राणि पात्राणि । कृत्वा तान्येव सूरिभिः ॥ सोऽभ्यनायि रसं शांतं । चित्रमव्यभिचारिणं ॥ ५७ ॥ आषाढभूतिः स्खलितव्रतोऽपि । लेभे पुनः सद्गुरुभिः ससूत्रः ॥ एतत्प्रभावाद्भुतमागमस्य । नश्येत्ससूत्रा न हि सूचिकापि ॥ ५८ ॥ इति आषाढभूतिकथा समाप्ता ॥

अथ ज्ञानभेदानाह—

॥ मूलम् ॥-आभिणिबोहियमाइ । तं पंचविहं सुएण इह पगयं ॥ सेसाइं नाणाइं । न हि गुरुसिक्कं अविक्कंति ॥ २५ ॥ व्याख्या-तत् प्रस्तुतं ज्ञानमाभिनिबोधकादिकं पंचविधं भवति, तद्यथा-आभिनिबोधिकज्ञानं १, श्रुतज्ञानं २, अवधिज्ञानं ३, मनःपर्यवज्ञानं ४, केवलज्ञानं ५ चेति. तत्र अभीत्याभिमुख्ये, नीति नैयत्ये, ततो गृहणार्हवस्तुनाभिमुखो नियतः श्रोत्रादींद्रियैः प्रविभक्तो बोधोऽभिनिबोधः, स एवाभिनिबोधिकं, तच्च तद्ज्ञानं चाभिनिबोधिकज्ञानं. इंद्रियमनोनिमित्तो वस्त्ववबोधो मतिज्ञानमित्यर्थः. श्रवणं श्रुतं, आभिलाप्लावितार्थोपलब्धिविशेषस्तच्च तद्ज्ञानं च श्रुतज्ञानं २. अवधिर्मर्यादा रूपिद्रव्यात्मिका तेनावधिनाज्ञानं अवधिज्ञानं. इंद्रियमनोनिरपेक्ष आत्मनः साक्षाद्रूपिद्रव्यग्रहणात्मको बोधः संज्ञिनिर्जीवैः काययोगेन ३. मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि वस्तुचिंताहेतूनि द्रव्याणि मनांसीत्युच्यंते, तानि पर्येत्यवगच्छतीति मनःपर्यायं, तच्च तद्ज्ञानं च मनःपर्यायज्ञानं, मनुष्यक्षेत्रांतवर्तिसंज्ञिजीवचिंतितार्थप्रकटनपर

इंद्रियमनोनिरपेक्ष आत्मनः साक्षात्प्रवृत्तो बोधः ४. केवलं संपूर्णज्ञेयग्राहित्वात् संपूर्णं, तच्च तद्ज्ञानं च केवलज्ञानं, रूप्यरूपिद्रव्यग्राहकमिति समासार्थः. व्यासार्थो महाजाष्यादवसेयः. एवं ज्ञानपंचकमुपदर्श्य येन प्रस्तुतोपयोगस्तदाह–इह ज्ञानशिक्षणाधिकारे श्रुतेन श्रुतज्ञानेन प्रकृतं अधिकृतं तस्यैव गुरूपदेशार्हत्वात्, शेषज्ञानानां स्वावारककर्मक्षयक्षयोपशमाभ्यां स्वत एव जायमानत्वादेतदेवाह–"सेसाइं नाणाइंति" उत्तरार्धं स्पष्टं. किं तत् श्रुतज्ञानमित्याह—

॥ मूलम् ॥–अंगपविठं तह अंग–वाहिरं तं सुयं नवे दुविहं ॥ अंगपविठं बारस–जे॰यं इयरं अणेगविहं ॥ २६ ॥ व्याख्या–तत्प्रकृतं श्रुतं द्विविधं नवति: तद्यथा–अंगप्रविष्टं अंगवाह्यं च, तत्र–पायदुगं जंघोरू–गायदुगऊं तु दोय वाहुय ॥ गीवा सीरं च पुरिसो । बारस अंगो सुयविसिट्ठो ॥ १ ॥'

एवंविधेषु प्रवचनपुरुषस्यांगेषु प्रविष्टं व्यवस्थितमंगप्रविष्टं द्वादशभेदं, तथाहि–प्रवचनपुरुषस्य पादयुगं आचारांगसूत्रकृते, जंघाद्विकं स्थानसमवायौ, ऊरुद्विकं नगवतीज्ञाता॰

धर्मकथांगे, गात्रद्धिकं पृष्ठोदररूप उपासकांतकृद्दशांगे, वाहुद्धिकं अनुत्तरोपपातिकदशाग्र-
व्याकरणं च, प्रीत्वा विपाकश्रुतं, शिरश्च दृष्टिवाद इति, इतरदंगवाह्यं आवश्यकोपाग-
प्रकीर्णकादित्तेदादनेकविधं नानाप्रकारं. अत्रांगप्रविष्टांगवाह्यस्वरूपावबोधाय महान्ताप्यगा-
था यथा-गणहरथेरकयं वा । आएसामुक्कवागरणओ वा ॥ धुवचलविसेसणाओ । अंगाणंगेसु
नाणत्तं ॥ १ ॥ अस्या अर्थ.-यत्गणधरैर्गौतमादिभिः कृतं, यच्च आदेशेन 'उपन्नेइ' वेत्यादि
पदत्रयरूपेण प्रश्नपौरुष्यां निर्पन्नं, यद्ध्रुवं सर्वदा सर्वतीर्थेषु भवति तदंगप्रविष्टं द्वाद-
शांगीरूपं, यत्पुनः स्थविरैर्नेऽवाह्यादिभिः कृतं, यच्च गणधरैरपि मुत्कलव्याकरणरूपतया
कृतं, यच्च चलं कदाचिद्भवति कदाचिन्न कस्यापि तीर्थे भवति, कस्यापि न तत्सूत्रमंगवाह्यं
आवश्यकाद्यनेकविधमुच्यत इति.

ननु श्रुतज्ञानान्नियोगरूपोऽयमुपदेशोऽशक्यानुष्ठानः, सर्वस्य श्रुतस्य सागरस्येव सक-
लेनापि कालेनास्मान्निर्दुरवगाहत्वादित्याह—

॥ मूलम् ॥–अत्थउ सुत्तं समग्गं । एगंपि पयं अमोहमाहंसु ॥ एगपएणं पत्तो । चि-

लाइपुत्तो सहस्सारं ॥ २७ ॥ व्याख्या–अस्तु दूरे समग्रं श्रुतं, एकमपि पदं पद्यचतुर्थांशरूप जावतो विचार्यमाणं सदमोघं महाफलमाहुर्महर्षयः. उत्तरार्धं स्पष्टं, जावार्थः कथानकगम्यः, अथ चिलातिपुत्रकथा–

क्षितिप्रतिष्ठितपुरे । यज्ञदेवोऽजवद् द्विजः ॥ निर्जित्य वादे श्रमणै–र्जैनद्वेषी स दीक्षितः ॥ १ ॥ व्रतं स्वादं ददौ तस्या–धीयानस्य शनैः शनैः ॥ रसायनोपयुक्तस्य । मिष्टाशनमिवारुचेः ॥ २ ॥ परं मुनीनामस्नानं । प्राक्संस्कारान्निनिंद सः ॥ तेन हीनकुलोत्पाद–वेद्यं कर्म बबंध च ॥ ३ ॥ जिक्षार्थमन्यदा ग्राम्य–न्निजं धाम जगाम सः ॥ तत्पत्नी तं वशीकर्तुं । नक्कांतः कार्मणं ददौ ॥ ४ ॥ स ऋषिर्विषयास्वाद–विमुखः कार्मणात्ततः ॥ क्षणे क्षणे क्षीयमाणः । समये प्राप पंचतां ॥ ५ ॥ स्वर्गं गते मुनौ तस्मिन् । ब्राह्मणी स्वं पुनः पुनः ॥ निनिंद तादृशप्रेयः–साधुघातमलीमसं ॥ ६ ॥ ततश्चारित्रमादाय । सापि स्वर्गं गता ययात् ॥ जर्तारमित्युपालब्धु–मिव यासि क्व मां विना ॥ ७ ॥ च्युत्वा देवत्नवाद्यज्ञ–देवो राजगृहे पुरे ॥ धनस्य श्रेष्ठिनश्चेट्या–श्चिलायास्तनयोऽजवत् ॥ ८ ॥ चिलातीपुत्र इत्येवा–भिधानं तस्य

पप्रथे ॥ दासीतनुरुहो नाम-करणे कः कुतूहली ॥ ९ ॥ ब्राह्मणी तु च्युता स्वर्गा-दूर्ध्वं त नयपंचकात् ॥ धनस्य पत्न्यां जज्ञायां । सुंसुमेति सुताऽजनि ॥ १० ॥ नियुक्तः पालने त स्या-श्चैलातेयो धनेन सः ॥ चपलोऽनुत्स्वजावेन । प्रतिष्टा हि कुलोचिता ॥ ११ ॥ गृहजा तोऽप्यसौ डुष्टः । श्रेष्टिना निरवास्यत ॥ क्षुंपन् कचवरो गेह-शोभां किं नापनीयते ॥ १२ ॥ भ्राम्यन् सिंहगुहां पल्ली । स प्रातस्तत्र नाहलैः ॥ निन्ये डुष्टोऽपि डुष्टत्वं । कुपथ्यैरिव डु ज्वरः ॥ १३ ॥ पल्लीपतौ मृते सर्वैः । स एव विदधेऽधिपः ॥ विषस्य क्रियते कार्यं । किमन्येन विषं विना ॥ १४ ॥ सुंसमा हंसमानङ्घि-क्रमना यौवनं ययौ ॥ यदा तदा स पल्लीशः । प्रो चे निजपरिष्ठदं ॥ १५ ॥ महाधनमलुंटित्वा । प्रीयेमहि कथं वयं ॥ महाद्रुममविध्वस्य । किं पूर्येत गजोदरं ॥ १६ ॥ तद्गो राजगृहं यामो । लुंटामो धनमंदिरं ॥ धनं वः सकलं नू यात् । तस्य पुत्री पुनर्मम ॥ १७ ॥ इति व्यवस्थामाधाय । चिलातीनंदनश्चलन् ॥ निन्ये धनगृहं शिल्लान् । मर्मज्ञः खलु डुर्ग्रहः ॥ १८ ॥ विष्ठानवसरे तेषु । मुष्णत्स्वपि धनं धनः ॥ गुप्तकोणे स्थितस्तूष्णीं । निःसंग इव सांगजूः ॥ १९ ॥ धन्यजीवितसर्वस्व-मित्रोपादायं

सुंसमां ॥ लोप्लहस्तैः सहस्तेनै-र्ववल्गे स बलेश्वरः ॥ २० ॥ धनं वः सुंसमा मे स्ता-दित्यु-
दित्वा निमंत्रितैः ॥ सहारक्षैः सपुत्रस्त-मन्वधावद्धनोऽप्यथ ॥ २१ ॥ क्रंदंतं तं बोधयद्भिः ।
शोधयद्भिः पदात्पदं ॥ आरटकैर्निरैद्यंत । पुरतस्ते मलिम्लुचाः ॥ २२ ॥ आरटकेषु दृष्टे-
षु । दिवाकरकरेष्विव ॥ आशु नेशुस्तमोनाशं । लोप्लमुत्सृज्य तस्कराः ॥ २३ ॥ बालः पो-
लीमिवामुंचं-श्चैलातेयस्तु सुंसमां ॥ समारोप्य निजस्कंधे । प्रत्रिवेश महाटवीं ॥ २४ ॥ न्य-
वर्तंत धनं प्राप्य । क्षणादारटका अपि ॥ सर्वो हि स्वार्थसंसिद्धौ । परकार्येष्वनादरी ॥२५॥
धनः पुनः स्वतनयैः । सह दुस्सहदोर्बलैः ॥ कन्यां कालमुखात्कृष्टुं । चिलातीपुत्रमन्वगात्
॥ २६ ॥ स्वमेकाकिनमालोक्य । धनं चोत्परिच्छदं ॥ खिन्नः खड्गेन पल्लीशः । सुंसमायाः
शिरोऽछिनत् ॥ २७ ॥ पतिघातकृतं कर्म । सैवं प्राप्यमवेदयत् ॥ तन्मूर्धानं करे कृत्वा । पि
शाच इव सोऽचलत् ॥ २८ ॥ पुत्रीं वीक्ष्य धनोऽशीर्षां । लूनपद्मामिवाङ्गिनीं ॥ अरोदीन्मु-
क्तसुत्कारं । रोदयन् विहगानपि ॥ २९ ॥ मावधिदेष जवतो-ऽपीत्युक्त्वा स कथंचन ॥ सु-
तानशमयज्जामि-स्नेहात्तमनुधाविनः ॥ ३० ॥ पुत्रास्तत्रैव संस्कार्यं । वपुः सौवपुरंप्रति ॥

व्यावृत्तोऽश्रुनिरुद्धाक्षो । मार्गभ्रंशमवाप सः ॥ ३१ ॥ घोरकांतारचारेण । क्षुत्तृष्ण्याभ्यामपि पीडितः ॥ नापितः श्वापदैर्मध्ये-दिने दध्याविदं धनः ॥ ३२ ॥ क्व सा स्थितिर्निजावासे । केयं वनविहारिता ॥ क्व पुत्र्या मरणं हंत । विधेः किंचिन्न दुर्घटं ॥ ३३ ॥ न नागैर्न च पुंनागैर्न धनैर्न च साधनैः ॥ न शक्त्या न च भक्त्या च । विधिरेष निगृह्यते ॥ ३४ ॥ आनयेदपि दुःप्रापं । सुप्रापमपि नाशयेत् ॥ साधयेदपि दुःसाध्यं । सुसाध्यमपि बाधयेत् ॥३५॥ जीवयेन्म्रियमाणं च । जीवंतमपि मारयेत् ॥ कुरुते कौतुकी केवी-रेवं दैवेंद्रजालिकः ॥३६॥ युग्मं ॥ एवं विलापयन् श्रेष्ठी । प्राप्तवर्त्मा कथंचन ॥ गृहं गतो विधत्तेस्म । स्वपुत्र्या ऊर्ध्वदेहिकं ॥ ३७ ॥ विरक्तो व्रतमादाय । श्रीवीरस्वामिसन्निधौ ॥ स दुस्तपं तपस्तप्त्वा । पूर्णायुस्त्रिदिवं ययौ ॥ ३८ ॥ प्राग्भवप्रेमतः पश्यन् । पुरस्तत्सुंसुमासुतं ॥ अविज्ञातश्रम, पद्मशोऽपि याम्यां दिशं ययौ ॥ ३९ ॥ यत्रैकं साधुमालोक्य । कायोत्सर्गस्थितं पुरः ॥ नियत्या प्रेरितः खड्ग-मुन्नीयेति जगाद सः ॥ ४० ॥ मम निर्मम धर्मस्य । मूलं स्वल्पाक्षरैर्वद ॥ मुनेऽमुनैव खड्गेन । नो चेत्त्वां करवै द्विधा ॥ ४१ ॥ यद्वक्ति तत्करोत्येव । क्रूरा

मत्तः पृच्छात धर्म च । न तु मन्त्रापधादक ॥ ४२ ॥ वोज कृष्णेऽनुवोचात्र । धर्मो विस्तारमा-
प्स्यति ॥ व्यचारयदिति ज्ञान-खानिर्मुनिमतल्लिका ॥ ४३ ॥ युग्मं ॥ कार्याः स्वहितकामेन ।
शमविवेकसंवराः ॥ इत्युदित्वा ययौ व्योम्ना । स चारणमुनिर्द्रुतं ॥ ४४ ॥ पुनः पुनः स्मर-
न्नंतः । साधूदितपदानि सः ॥ प्राग्जन्मप्रतिनोल्लासा-चौरश्चक्रे विचारणाम् ॥ ४५ ॥ तावन्मु-
नीश्वरः पूर्वं । दिदेशोपशमं मम ॥ क्रोधादि निग्रहे स स्या-न्निग्रहीतश्च तैरहं ॥ ४६ ॥ अ-
ग्नो हिममिवामुष्मि-न्नासन्ने स्याद्यमः किमु ॥ ध्यात्वेति सकृपोऽमुंच-त्कृपाणं स स्वपाणितः
॥ ४७ ॥ हस्तन्यस्तकनीमोले-र्विवेकोऽपि कुतो मम ॥ ध्यायन्निति स तत्याज । सुंतमायाः
शिरः करात् ॥ ४८ ॥ क्रुधाऽभिधाविनो मर्त्य-द्रुमायुः फलपातिनः ॥ कपेरिव क्व वाक्काय-म-
नोऽभिर्मम संवरः ॥ ४९ ॥ विचार्येति चिलातीभू-र्निरूढसकलेंद्रियः ॥ तस्थौ प्रतिमया तत्र ।
सानुमानिव निश्चलः ॥ ५० ॥ तद्देहस्यासृगार्द्रस्य । गंधेनाकारिता इव ॥ कोटिशः कीटि-
काः क्रूराः । समुद्विविदिरे द्रुतम् ॥ ५१ ॥ पदोरधः समुद्भूता । रंध्रयित्वा पदद्वयम् ॥ गत्यं-
तरमनासाद्य । तास्तस्य विविशुर्वपुः ॥ ५२ ॥ नवश्रोत्रोऽपि देहोऽस्य । तानिः श्रोत्रशनाक्र-

यांसणं अणुप्पयाणं । कियकम्मं अंजलिगहो य ॥ १ ॥ इतस्सणुगमणया—ज्ञेयस्स तह पज्जुवासणा जणिया ॥ गच्छंताणुव्वयणं । एसो सुस्सुसणाविणउ ॥ २ ॥ हे अपि सुबोधे, उपचारिकविनयस्तु सप्तधा, तद्यथा—अभ्यासस्थण वंदा—णुवत्तणं कयपडिकिई तह य ॥ कारियनिमित्तकरणं । दुक्कत्तगवेसणा तह य ॥ १ ॥ तह देसकालजाणण । सव्वत्थेसु तह अणुमई जणिया ॥ उवयारिउ य विणउ । एसो जणिउ समासेणं ॥ २ ॥ व्याख्या—गरोरभ्यासे समीपे आसीतव्यं, गुरोश्छंदानुवर्तनं कार्यं, कृतप्रतिकृतिः, कृते जक्तादिनोपचारे प्रसन्ना गुरवः प्रतिकृतिं सूत्रार्थदानतः करिष्यंति, न नाम केवलं मम निर्जरैवेति चिंतनं. तथा कार्यं श्रुतप्रापणादिकं निमित्तं कृत्वा श्रुतं प्रापितोऽहमनेनेति हेतोरित्यर्थः, विशेषेण तस्य विनये वर्तितव्यमिति कार्यनिमित्तकरणं. दुःखार्त्ते गुरौ गवेषणं औषधादेः कार्यं, तथा देशकालज्ञानं अवसरज्ञता, सर्वार्थेष्वनुमतिरानुकुल्यं चेति. ननु विनयं विना विद्याध्ययने को दोषं इत्याह—विनयेन विना विद्या तावन्न जवति, गुरोरप्रसन्नत्वात्, जवति वा प्रज्ञादिबलात्तथापि न फलंति. तत्र विद्यायाः फलमिह लोके यशःपूजासत्कारादिकं, परलोके तु

सङ्गतिगमनं, एतद् द्वयमपि दुर्विनयाध्यायिनो न भवति, कूलवालकादिवत्. अथ विनयहीनस्य विद्या न स्यादिति यदुक्तं तद्व्यक्त्यंतरमाह—

॥ मूलम् ॥—जे अविणीया यद्धा । गारविया गुरुजणंमि मच्छरिणो ॥ न हु ते आलावस्सवि । जुग्गा किर सुत्तसारस्स ॥ २९ ॥ व्याख्या—ये अविनीताः पूर्वोक्तविनयरहिताः, स्तब्धा अनम्राः, तथा ऋद्धिरससातगौरवैर्वय मेव गुरव इति गर्विताः, गुरुजने च शिक्षां ददाने मत्सरिणः कलुषचित्ताः, ते शिष्या आलापस्यापि न योग्याः. गुरूणामिति गम्यते. तर्हि सूत्रसारस्य शास्त्ररहस्यस्य योग्यतायाः किमुच्यते? अथ व्यतिरेकमाह—

॥ मूलम् ॥—बहुमाणजुए वऊा-यरंमि विणउणए समप्पंति ॥ गुरुणोज्झत्ति सुसीसे । पिउव्व पुत्ते सुयनिहाणं ॥ ३० ॥ व्याख्या—स्पष्टा, नवरं बहुमान आंतरः प्रीतिविशेषः, आदरस्तु बाह्योऽभ्युत्थानासनादिः, यस्थानांगसूत्रं-चत्तारि कप्पंति बाइत्तए, तंजहा, विणिए, अविगइपडिबद्धे विउसवियपाहुडे अमाइत्ति ॥ अथ प्रसंगतो न केवलं शिष्य एव, किंतु गुरुरपि गुणवान् एवोपदेशार्हो भवतीति दृष्टांतेनाह—

॥ मूलम् ॥—अणुरूवो आयरिउ। अणुरूवो चेव होइ जइ सीसो ॥ ता उवएसो स-
हलो। जह मेहसुणिम्मि वीरस्स ॥ ३१ ॥ व्याख्या—यद्याचार्यो गुरुः स्नेहसौभाग्यमृदुभाषि-
त्वादिभिर्गुणैरनुरूपोऽनुगुणः शिष्यस्य भवति, यदि शिष्योऽपि लज्जाभयविनयक्षान्त्यादिभिर्गु-
णैर्गुरोरनुरूप एव भवति तदा उपदेशतत्त्वार्थकथनरूपः सफलः स्यात्, तुरगितुरगयोरानु-
रूप्ये समरसरंजवत् अत्र दृष्टांतमाह—यथा वीरस्य श्रीवर्धमानस्वामिन उपदेशो मेघमुनौ
सफलो जातः, गुरुशिष्ययोर्द्वयोरप्यनुरूपत्वात्. तत्कथा चैवम्—अथ मेघकुमारकथा—

अस्ति राजगृहं नाम। पुरं मगधमंडले ॥ यत्र राजगृहायंते। पुराणि श्रीमतामपि ॥१॥ श्लोकः
पृणगुणश्रेणिः। श्रेणिकस्तत्र भूपतिः ॥ क्षीणो यस्य मनोभृङ्गः। श्रीवीरचरणांबुजे ॥२॥ तस्या-
भयकुमारोऽभू-दादिमः पुत्रमंत्रिषु ॥ धिया येन जितो जीवो। निशि स्फुरति नो दिवा ॥ ३॥
राज्ञोऽनेकावरोधस्य। धारिणी दयिताऽन्यदा ॥ सितं सप्तकरोत्सेधं। स्वप्ने मिथुरमैक्षत ॥४॥
श्रुत्वा स्वप्नफलं पुत्रं। जनुर्गर्भं बभार सा ॥ गर्भानुभावतस्तस्याः। कायेऽभूदिति दोहदः ॥५॥
सेचनं गजमारुह्य। भ्रमं वर्षति वारिदे ॥ नेतारञ्जुभराक्रान्तं। गर्भिणी का वहाम्यहं ॥ ६ ॥

यजिज्ञपन्न सा मनुं-म्मकाक्षाक्षदोहदम् ॥ गरीयसोऽप्यसंनाऽवं-याश्चाया लाघवं ध्रुवम् ॥ ७ ॥ दुर्बला दोहदाप्राप्त्या । पृष्टा भूपेन साग्रहम् ॥ सा स्वाभिप्रायमाचख्यौ । त्रपमाणा कथंचन ॥ ८ ॥ अथ पृथ्वीपतिर्ध्यायौ । नायं पूर्येत दोहदः ॥ भूयसापि द्रुजस्थाम्ना । न धनेन च साधनैः ॥ ९ ॥ ततोऽजयकुमाराय । तत्स्वरूपं जगौ नृपः ॥ रविरेव क्षते मूढे । जनेन स्मर्यते यतः ॥ १० ॥ कृताष्टमतपाः सोऽपि । निक्षीनो दर्भसंस्तरे ॥ सस्मार पौषधागार-स्थितः प्राक्संगतं सुरम् ॥ ११ ॥ तपसा रज्जुनेवाशु । समाकृष्टः समागतः ॥ सुरस्तस्य पुरः स्थित्वा । किं करोमीत्यवोचत ॥ १२ ॥ जानतापि स्वयं सर्वं । किमेतत्परिपृच्यते ॥ तेनेत्युक्ते सुरश्चक्रे । व्योम्नि वारिदमंडलम् ॥ १३ ॥ वारिप्लुतधरां धौतां-वरां विस्तारिनिर्झराम् ॥ विधायाकस्मिकीं वृष्टिं । निरोधत्त सुरोत्तमः ॥ १४ ॥ अथाजयेन विज्ञप्ता । धारिणी हर्षधारिणी ॥ सेचनं छोषमारुह्य । ययौ वैभारपर्वतम् ॥ १५ ॥ सरिदंभसि क्षिप्त्वा । जलदेवीव तत्र सा ॥ निर्गतात्मा निहत्याशु । निजमंदिरमाययौ ॥ १६ ॥ सा काले सुषुवे पुत्रं । पित्रोः कृतमहोत्सवम् ॥ दोहदानुगमान्मेघ-कुमार इति विश्रुतम् ॥ १७ ॥ स क्रमाद्युवयेचंद्र-स्येव

वार्धिरवर्धत ॥ पित्राष्टवर्षदेश्यश्च । पालितः सकला. कलाः ॥ १८॥ वयो मध्यममध्याप्य । सारमोज्ञाग्यज्ञाग्यभूः ॥ राजवंश्या. कनीरट्टौ । पर्यणैषीन्महेन स ॥ १९ ॥ स्वर्णकोटीरयाश्चेत्र -शय्यासिंहासनादिकान् ॥ क्षेत्रे पदार्थनिष्ठाप्ट । स वधूपाणिमोचने ॥ २० ॥ पितृप्रदत्तसौधेषु । प्रियाभिः सह संततम् ॥ भोगान् पुरः स्फुरत्पूर्य-वयोऽभुंक्त स देववत् ॥ २१ ॥

अन्यदा समवासार्षी-त्तत्रापश्चिमतीर्थकृत् ॥ अंभोद इव निर्भिदन् । पापतापं वचोऽमृतैः ॥ २२ ॥ तदैव केवलज्ञान-वंतं नंतुं जगद्गुरुं ॥ चेलुः पौरा. पुरश्रद्धाः । श्राद्धे भोक्तुं द्विजा इव ॥ २३ ॥ मेघ ध्वसौधमौलिस्थो । यातस्तानेकया दिशा ॥ वीक्ष्य पप्रच्छ सञ्ज्ञत्या-नूचुस्तेऽपि जिनागमं ॥ २४ ॥ अथ सद्यमालंक्ष्य । वेगवंतं जगत्त्रय ॥ वैभारगिरिमानं च । मेघो मेघ इवानिलम् ॥ २५ ॥ मुक्त्वा रथं नृश भक्ति-भारलुग्नशिरोधर. ॥ स त्रि.प्रदक्षिणीकृत्य । जिनराजमवंदत ॥ २६ ॥ शुश्रुषोत्कंठया. सर्वान् । सभ्यानुन्मुखयन्नथ ॥ वाण्या योजनयायिन्या । जिनेशो देशनां व्यधात् ॥ २७ ॥ विश्वेऽत्र विश्वेऽपि जना. सुखेच्छा । सुखं च मोक्षे विशदं वदंति ॥ तं.गंतुकामा रथवज्रजंघं । सद्ज्ञानसम्यक्त्वहृय चरित्रं ॥२८॥

पीत्वा जैनेश्वरीं वाचं । हृष्ट्वा च श्रेणिकात्मजं ॥ सन्यैमेंघोऽत्र कः सम्य–गित्यंतः समसभ्य-
त ॥ २९ ॥ प्रातशांतरसो मेघः । श्रीवीरक्षीरनीरघैः ॥ पितरौप्रति वाग्धाराः । सङ्रूपा इत्यमुं-
चत ॥ ३० ॥ आगर्भवासात्पितरौ । युवाभ्यां पालितोऽस्म्यहं ॥ तन्मां नावारिनिः क्रांतं ।
न किं-संप्रति रक्षतं ॥ ३१ ॥ तौ ततः प्रोचतुर्वत्स त्रस्ता किं त्रायते परं ॥ नावाभ्यां र-
क्ष्यते स्वात्मा । तेभ्यस्त्वं रक्ष्यसे कथं ॥ ३२ ॥ मेघोऽवदद्यदि न वां । शक्तिस्तदक्षणे त-
तः ॥ आदिशतं येन वीर-स्वामिनं शरणं श्रये ॥ ३३ ॥ यद्वारयति दुर्वारं । वैरिवारं विना-
श्रमं ॥ ततो धने महावीर । इत्याख्यां विदितामसौ ॥ ३४ ॥ श्रुत्वा श्रीवीरशिष्योऽहं । भा-
वारीन् यज्ञयाम्यथ ॥ पुत्रवत्सलयोर्मस्तु–ल्या स युवयोर्गुणः ॥ ३५ ॥ वचसा तेन वज्रस्य ।
निर्घातेनेव पीडितौ ॥ आतुरौ प्रोचतुर्माता—पितरौ गद्गदध्वनी ॥ ३६ ॥ कुमार सुकुमार-
स्त्वं । व्रतं च ककचोपमं ॥ अनेन वपुषा वत्स । व्रतेच्छुर्मेहिलोऽसि किं ॥ ३७ ॥ सोऽवदद्या-
ति यो जंतु–र्नरकं दुरितेरितः ॥ दारुणाः सहते तत्र । सोमाक्षोऽपि स वेदना. ॥ ३८ ॥ सो-
ढाजिरपि नो नात्ति–क्षांतः कोऽपि चमीरिणां ॥ अनकष्टं पुनः स्वल्प–मपि सोढुं शुचायति

॥ ३९ ॥ धारिण्यथ पृथक् स्माह । त्वं त्रैलोक्यप्रियोदयः ॥ वत्स मयाऽर्पे मे घोरं । संतापं वितनोपि किं ॥ ४० ॥ तवं हृष्टौ चते सूनु-र्यदि संसारसंकटात् ॥ उन्मुच्यते ततो मातः । किं विषादो वृथा तव ॥ ४१ ॥ इत्यादुक्तिबलात्तस्य । माता ज्ञाता निरुत्तरा ॥ एकाहं राज्य-मादत्स्व । वत्सेति तमयाचत ॥ ४२ ॥ सोऽप्येकं दिवसं राज्यं । भेजे पित्रोः समाधये ॥ सा-रसंयमसाम्राज्ये । स्वं निवेश्य मनः पुनः ॥ ४३ ॥ द्वितीयेऽह्यथ भूभर्त्रा । निर्मापितमहो-त्सवैः ॥ दीक्षां श्रीवीरपादांते । दांतेभ्यः स्वीचकार सः ॥ ४४ ॥ दिनं समाधिनातीत्य । मेघः सर्वलघुर्निशि ॥ प्रस्तरे पार्श्ववत्सर्वा-धस्तात्प्रापदवस्थितिं ॥ ४५ ॥ स हंसतूलिकाशायी । सु-तः केवलभूतले ॥ अस्पर्शि साधुसंघट्ट-नीतयेव न निद्रया ॥ ४६ ॥ वृषत्सखैस्तीक्ष्णनखै-र्घृष्यमाणो महात्मनां ॥ चरणैश्चरणोद्भिन्न-मना एवं स दध्यिवान् ॥ ४७ ॥ आशा बलवती यंऽद्य-माशयैव जगत्त्रयं ॥ कुर्वत्याशावशा एव । मुनयोऽप्यादरं नृणां ॥ ४८ ॥ राज्यस्थं मा-ममी पूर्व-मालपन् मुनयो मुदा ॥ आत्तव्रतमिदानीं तु । दारयंति नखैर्यतः ॥ ४९ ॥ अनु-भूतं व्रतं लब्धः । स्वादो नम्रो भ्रमश्च सः ॥ नमोऽस्तु तस्मै चारित्रा-याद्या यस्येदृशी निशा

॥ ५० ॥ सोऽहं राजसिको युक्तं । पितृव्यां वारितस्तदा ॥ सुखावहं कुतारेण । दारुणं न पुनर्व्रतं ॥ ५१ ॥ क्षिपा यास्यति यद्येषा । तदा स्वं वेषमर्हतः ॥ समर्प्य राज्यसौख्यानि । पुनर्जैनेन्द्रये यथारुचि ॥ ५२ ॥ एवं तस्मिन्नपध्यानं । दधाने व्यगलन्निशा ॥ सोऽपि स्वोपधिमादाय । ययौ श्रीवीरसंनिधिं ॥ ५३ ॥ पराशयस्फुटीकार-क्षमकेवलसंविदा ॥ प्रविशन्नेव वीरेण । मृदुवाग्भिरजाणि सः ॥५४॥ क्षामपुण्यपरीणामः । समागच्छसि मेघ किं ॥ मा मुह प्राक्तनं जन्म । स्मर धीर सुधीरसि ॥ ५५ ॥ इतो जन्मे तृतीयेऽभू-रुपवैताढ्यभूधरं ॥ त्वं सुमेरुप्रजारण्योऽन्य-करिणां जीपणः करी ॥ ५६ ॥ सहस्रेज्यप्रभुः सोऽभूद् । दृप्तः सप्तकरोच्छ्रयः ॥ श्वेतो दशकरव्यासः । पोमन्नवकरायतः ॥ ५७ ॥ ग्रीष्मर्त्तावन्यदारण्ये । दह्यमाने दवानले ॥ त्यक्तयूथः स यूथेशः । पलायत दिशैकया ॥ ५८ ॥ नोमेप्मणा चरणयोः । पार्श्वयोर्दावहेतिभिः ॥ मौलौ रविकरैस्तप्तः । सोऽवाध्यत तृषा भृशं ॥ ५९ ॥ इतस्ततो भ्रमन्नीराशयाऽपश्यत्पुरः सरः ॥ अतिस्वल्पंरसं भूरि-पंकं लोकं कलानिव ॥ ६० ॥ जलध्यानाज्जली-भूतो । विशंस्तत्तापवर्त्मना ॥ निममज्जांतरा पंक-संकटे स जरी करी ॥ ६१ ॥ शुंभादंताद्रि-

जिदंहा-वयवैर्दर्शयन् बलं ॥ तैरेव पंकनिर्मग्नैः । सोऽभूद्योगीव निश्चलः ॥ ६२ ॥ सरस्तदा तदायात-स्तोयेच्छुस्तद्विपुष्टिपः ॥ जघान दंतशुंकाग्रैः । सुखं तं पंककीलितं ॥ ६३ ॥ तत्प्र-हारव्यथाः सप्त । दिवसाननुभूय सः ॥ आयुः प्रपूर्य विंशत्या-धिकं वर्षशतं मृतः ॥ ६४ ॥ विंध्याटव्यां ततश्चाभू-दिभो मेरुप्रभाजिधः ॥ रक्तवर्णश्चतुर्दंतो । दंतिसप्तशतीपतिः ॥ ६५ ॥ अन्यदा वनदावाग्नि-दर्शनात् प्राग्भवं स्मरन् ॥ दवोपद्रवरक्षार्थ-मुपचक्राम सामजः ॥६६॥ पृथग् योजनविस्तार-मकार्षीन्मंडलत्रयं ॥ कालग्राहीव निर्ग्रंथो । भूमिशुद्धिं विधाय सः ॥ ॥ ६७ ॥ आदिमध्यावसानेषु । वर्षर्तावुच्चखान सः ॥ तत्रोत्पन्नांस्तृणांकुराँ-ल्लोचकारी कचा-निव ॥ ६८ ॥ ज्येष्टमासि पुनर्लग्ने । दववह्नौ स्वयूथयुक् ॥ दधावे सिंधुराधीशः । प्रति प्रथ-ममंडलम् ॥ ६९ ॥ तावत्तन्मंडलं दाव-त्रस्तैः सिंहमृगादिभिः ॥ वन्यसत्त्वैः कणैः कोष्टा-गा-रवत् परिपूर्यत ॥ ७० ॥ तत्रावकाशं सोऽप्रेदय । द्वितीयं मंडलं गतः ॥ तस्मिन्नप्यंगिभिः पू-र्णे । तृतीये प्रविवेश सः ॥ ७१ ॥ तत्रापि जीवकोटीषु । निर्वैरासु स्थितासु सः ॥ ऊर्ध्वस्थो-ऽराजत गजः । कायोत्सर्गी मुनिर्यथा ॥ ७२ ॥ कायकंडूमपाकर्तुं । तस्योत्क्षिप्तव्रतः क्रमं ॥

क्रमम्यानं शशः कोऽपि । निक्षिप्ये त्रासितः परैः ॥७३॥ तमधो वीक्ष्य संजात-करुणः करिणां प्रभुः ॥ नक्षितव्यतया भाद्रि-चन्द्र एवं व्यभावयत् ॥ ७४ ॥ अयं दवाग्निना क्षुण्णः । प्रविष्ट इह संक्षये ॥ इहापि क्षुण्णः केनापि । क्षीणो मम पदे शशः ॥ ७५ ॥ मुंचाम्यधः स्वपादं चे-द्धु-राकस्याम्य तदध्रुवं ॥ सर्वेऽपि कुपिना देव-दवर्ह्रीपिद्विपादयः ॥ ७६ ॥ न तस्मादादयप्लोषं । मया मोक्ष्यः क्षमो नुचि ॥ अनिवृत्तेति तस्थौ स । गणीव त्रिपदीस्थिरः ॥ ७७ ॥ तदा वरु-मनुष्यायुः । शांतेऽह्नोऽन्त्रिभिर्दवे ॥ जंतुजातेन समं याते । शशे सोऽधः पदं ददौ ॥ ७८ ॥ पादमोक्षक्षणे भूमौ । पतितो गिरिवज्रजः ॥ अध्यासामास सद्बुध्या । त्रिपादावस्थिति-दयया ॥ ७९ ॥ विंशत्या प्रहरैस्त्यक्त-प्राणैर्यूथ्यैरिव द्विपैः ॥ भावादविच्युतः सोऽभू-न्मृत्वा त्वं श्रेणिकांगजः ॥ ८० ॥ अज्ञातोऽपि तदा तिर्य-ग्भवे त्वं तादृशीं दयां ॥ कृपाधुरतिति-क्षिष्टाः । कथं ते मृदुताधुना ॥ ८१ ॥ बोधिं विनापि विहितः । शमस्तेऽभून्महाफलः ॥ रोषं करोषि नर्किं जो । बोधेरधिगमेऽधुना ॥ ८२ ॥ पार्श्वधारासिधाराग्रैः । पीड्यंते केऽपि निर्दयैः ॥ मन्यस्व धन्यमात्मानं । स्पृष्टस्त्वं साधुभिः पदैः ॥ ८३ ॥

" " " इत्यर्हतो गिरा जात–स्मरा जातत्रपाजरः ॥ श्रीवर्धमानमानम्य । मेघ एवं व्यजिज्ञपत् ॥ ८४ ॥ व्रतमार्गपरित्यागात् । पापकूपे निपातिनं ॥ स्ववाक्यरश्मिभिः स्वामि–न्नद्य त्वं मा-मुदक्षिपः ॥ ८५ ॥ नावतस्त्यक्तदीक्षस्य । दीक्षादानात्प्रसीद मे ॥ इत्युक्ते तेन जगवां–स्त-स्मै दीक्षां ददौ पुनः ॥ ८६ ॥ दम्बर्जं सकलं देह–मूषिभ्यः परिकल्प्य सः ॥ एकादशांग-पारीणः । प्रभुमेवं व्यजिज्ञपत् ॥ ८७ ॥ अनधीतोऽपि पूर्वाणि । प्रभो भवदनुज्ञया ॥ इच्छामि संप्रति यति–प्रतिमाः परिसेवितुं ॥ ८८ ॥ प्रभुरप्रतिमल्लं तं । प्रतिमासु विचारयन् ॥ जजल्प प्रतिमाकल्प–मित्याशाकल्पपादपः ॥ ८९ ॥ स्युः सप्त प्रतिमा एक–मासाद्या मासवृद्धितः ॥ सप्त रात्रिंदिवा तिस्रो–ऽहोरात्रिक्येकरात्रिकी ॥ ९० ॥ तत्राद्यप्रतिमायां स्या–दुपसर्गसहो मु-निः ॥ अज्ञातोंञ्छचरो नक्ते–पानेऽप्येकैकदत्तिकः ॥ ९१ ॥ अलिंदं स्वपदोरंतः । कृत्वा दात्री ददाति चेत् ॥ एकगोचरकालोऽसौ । तञ्जैदय लाति नान्यथा ॥ ९२ ॥ ज्ञातो निशां वसत्ये-का–मज्ञातस्तु निशाद्वयं ॥ अतः परं वसन् ग्रामे । स छेदपरिहारभाक् ॥ ९३ ॥ वृक्षे वि-कटगेहे वा–रामे वा स च तिष्ठति ॥ निलये दह्यमानेऽपि । वह्निना न निरेति च ॥ ९४ ॥

व्याकर्षति पदादेष । न हृषत्कंटकादिकं ॥ निर्ममोऽपनयत्यद्णो-र्न हि रेणुतृणाद्यपि ॥९९॥ समे वा विषमे वापि । यत्रास्तं याति भास्करः ॥ रात्रिमास्ते स तत्रैव । पुरः प्रातः प्रतिष्ठते ॥ ९६ ॥ स न प्रक्षालयत्यक्षि-मात्रमप्युज्ज्वलो गुणैः ॥ सिंहाश्वादिभ्वभियत्सु । धीरो नेर्या भिनत्ति च ॥ ९७ ॥ छायात व्यातपं तस्मा-छायां वा स न सर्पति ॥ प्रतिमां साधयत्याद्यां । मासं कष्टमिदं चरन् ॥ ९८ ॥ प्रतिमाः सप्तमीं याव-देवं ज्ञेयाः परा अपि ॥ तास्वेकैकोऽधिको मासो । दत्तिश्च परिवर्धते ॥९९॥ सप्तरात्रिंदिवाप्येव-मष्टमी प्रतिमा भवेत् ॥ चतुर्थं तु तपस्तत्र । नवरं स्यादपानकं ॥ १०० ॥ अंत्ये दिने बहिर्ग्रामा-दृत्तदृक् प्रासुपुद्गले ॥ तिष्ठत्युत्तानकः पार्श्व-वर्ती नैषधिकोऽथवा ॥ १ ॥ नवमी प्रतिमाप्येवं । दिनेंत्ये तूत्कटासनः ॥ स्थानं लगुडशायी वा । भजेद्दंडायतोऽपि वा ॥ २ ॥ एवं दशम्यपि परं । विशेषश्चासने स हि ॥ गोदोहिकासनी वीरा-सनी वा कुब्जकासनी ॥ ३ ॥ अहोरात्रप्रमाणेव-मेकादश्यपि केवलं ॥ कृतषष्टतपा ध्यानं । लंबमानभुजो भवेत् ॥ ४ ॥ द्वादशी प्रतिमाप्येक-रात्रिक्येवं पुनर्मुं-

निद्रयः ॥ लंबमानभुजस्तिष्ट-त्युत्कटाद्यासनाऽप वा ॥ ६ ॥ युग्मं ॥ एवं श्रीदेवदेवस्य । नि-
पीय वचनामृतं ॥ आरराध सुधीः साधु-प्रतिमाः स यथाविधि ॥ ७ ॥ अधिकाधिकपुण्यो-
त्क-मना मेघमुनिस्ततः ॥ तपः षोडशभिर्मासै-र्गुणरत्नाख्यमातनोत् ॥ ८ ॥ निर्वाह्य द्वाद-
शाब्दानि । व्रतमंते जिनाज्ञया ॥ मासं संलेख्य स तनूं । तन्वीमपि तनुं व्यधात् ॥ ९ ॥
समाधिमृत्या विजय-स्थाने कर्मारिमारणे ॥ स निस्त्रिंशस्त्रयस्त्रिंशत्-सागरायुरजूत्सुरः ॥१०॥
॥ इति मेघकुमारकथा ॥

गतं विनयद्वारं, अथ क्रियाद्वारं प्रस्तावयन्नाह—

॥ मूलम् ॥—किरियाजुत्तेणं चिय । नाणेण जिणा भणंति फलसिद्धिं ॥ सत्थग्गह अं-
धपंगुल-नरित्थिसंजोगदिट्ठंता ॥ ३२ ॥ व्याख्या—क्रिया यथोक्तानुष्ठानाचरणं, तद्युक्तेनैव
ज्ञानेन जिनाः केवलज्ञानोपलब्धस्याद्वादमुद्रामुकुलितसकलवस्तुतत्त्वाः पुण्यानुष्ठानफलभूतां
सिद्धिं फलसिद्धिं; यद्वा फलसिद्धिं कार्यनिष्पत्तिं निर्जरारूपां भणंति. अथ दृष्टांतत्रयमाह-
" सत्थग्गहेत्यादि " स्पष्टं. दृष्टांतत्रयभावना चैवं—न केवलं तीक्ष्णमपीह शस्त्रं । करोति

नंगं स्थितां कदापि ॥ न तेन हीन· प्रबलोऽपि योद्धा । पुनार्स्थियोगे रणसिद्धिरस्ति ॥ १ ॥ तथा–एकस्मिन् विपिने प्रदीप्तदहने दग्धौ दवाग्निप्लुता । चक्षुष्मानपि पंगुलो गतिरतोऽप्यंधश्च विन्नाशयौ ॥ अंधो मूर्ध्नि दधाति चेदचरणं तत्तत्प्रणीताध्वना । धावन्नेष सुखं निरेति दवतः पंगुश्च तद्योगत· ॥ २ ॥ तथा–अध्वस्तबीजोऽपि पुमान् विधत्ते । स्त्रिया विहीनो नहि वंशवृद्धिं ॥ विना पुमांसं न तु साप्यवंध्या । योगे द्वयोः स्यात् पुनरिष्टसिद्धिः ॥ ३ ॥ एवं न क्रियाविहीनेन ज्ञानेन, न च ज्ञानहीनया क्रियया सिद्धिर्जायते, तत्संयोग एव सङ्गावात्; यदाहुः—संजोगसिद्धीइ फलं वयंति । न हु एगचक्केण रहो पयाइ ॥ अंधो य पंगू य वणे समिच्चा । तेसि पउत्ता नगरं पविट्ठा ॥ १ ॥ अथ यः कश्चित्क्रियालालसो ज्ञानेनैव सं कृतकृत्यं मन्यते तंप्रत्याह—

॥ मूलम् ॥—मा जाणसु जीयहिए । जियअहिए किं नयं सुए अहिए ॥ अहिए पसि नवोहे । जइ किरियाए पमाएसि ॥ ३३ ॥ व्याख्या—जो आलस्योपहत! मा एवं

जितादिते, एवंविधे श्रुते आवश्यकादिकेऽधीते मम किं नय? श्रुतमेव मां तारयिष्यतीति. यदि त्वं क्रियायां चरणकरणरूपायां प्रमाद्यसि. तदाऽधीतश्रुतोऽप्यज्ञानावस्थातोऽधिके नवौघे संसारपूरे पतसि. जानतः प्रमादकरणे प्रभूततरकर्मबंधात्. ॥३३॥ एतदेव विशेषं भावयति—

॥ मूलम् ॥—चउदसपुव्वीवि तया । पाविज्जंते पमायपरिवत्तिया ॥ साहारणेसुऽणंता । श्यसंखया सेसकाएसु ॥ ३४ ॥ व्याख्या—आसतामदृष्टपाठिनः, चतुर्दशपूर्विणोऽपि प्रमादेन क्रियाशैथिल्येन परिपतिता ज्ञानादिगुणेभ्यो भ्रष्टास्तिर्यग्नारकादिभवपरंपराः स्पृशंतः कदाचिन्निगोदवासमप्यनुभवंति. ते च कालस्यानंत्यात् पिंडिताः संतो यदा विवक्षितक्षणे चिंत्यंते, तदा साधारणेषु सूक्ष्मेषु बादरेषु च निगोदेषु सदा सर्वकालं अनंताः प्राप्यंते, तत्र जीवराशेरनंतत्वात्. शेषेषु स्थानेषु पृथ्व्यप्तेजोवायुप्रत्येकवनस्पतिद्वित्रिचतुःपंचेंद्रियतिर्यग्देवनारकरूपेषु असंख्येयास्ते प्राप्यंते, उक्तराशीनामसंख्यजीवात्मकत्वात्. मनुष्येषु पुनः कदाचित्संख्येयाः कदाचिदसंख्येयाश्चेत्यनुक्तमपि दृष्टव्यं, मनुष्याणां द्विस्वभावत्वात्. यदाह प्रज्ञापनाकारः—नेरइयाणं भंते केवइया आहारगसमुग्घाया अइया? गोयमा!

यमंत्रिज्जा, केवइया पुरक्कमा? गोयमा! असंखिज्जा, एवं जाव वेमाणियाणं. नवरं वण-
स्सइकाइयाणं मणुस्साणं च इमं नाणत्तं. वणस्सइकाइयाणं भंते केवइया आहारगसमुग्घा-
या अइया? गोयमा! अणंता.मणुस्साणं भंते केवइया? गोयमा! सिय संखिज्जा सिय असंखि-
ज्जा, एवं पुरक्कमावित्ति ॥३५॥ अथ यः क्रियाहीनोऽपि परप्रतिबोधमात्रेण मायति;तंप्रत्याह—

॥ मूलम् ॥—नीसारेसि नवाउं । नविए कह अप्पणा न नीसरसि ॥ जं तरइ अ-
प्पणावि हु । तारंतो तारउं लोयं ॥ ३६ ॥ व्याख्या—स्पष्टा, पुनरेतदेव दृष्टांतांतरेणाह—

॥ मूलम् ॥—भुंजसि बोहेसि परं । तेणं किं जइ सयं न उज्जमसि ॥ नाणेणुवएसेण
य । अभुंजमाणस्स न हि तुट्ठि ॥ ३७ ॥ व्याख्या—बुध्यसे स्वयं तत्वं, बोधयसि च परमु-
पदेशद्वारेण, तेन बोधेन बोधनेन च तव किं? न किंचित्कार्यं सिध्यतीत्यर्थः. यदि हे
मूर्ख! स्वयं नोद्यच्छसि क्रियायां. यतः स्वयं मोदकादिकमभुंजानस्य स्वादु पुष्टिर्वचैतदिति
ज्ञानेन त्वं भुंक्ष्वेदं, ते तृप्तये भविष्यतीत्याद्युपदेशेन च न हि मनागपि तुष्टिर्जायते. प्रति-

तः श्रीभद्रयशोगाङ्गो । न ज्ञानात् सुखितो भवेत् ॥ १ ॥ अत्र ज्ञाननया ज्ञानस्यैव प्राधान्यं वृते, क्रियानयस्तु क्रियाया एव. ततो मिथ्यादृशावेतौ एकांशावलंबित्वात्. जिनमतं पुनर्द्वं अपि समुदिते ज्ञानहेतू वदति, न तु विच्छिन्ने, सम्यगेवैतत् सर्वनयात्मकत्वात्. एवं शेषेऽपि कालस्वभावादिपदार्थैरन्योन्यं निरपेक्षेषु स्वस्वप्राधान्यं वदत्सु मिथ्यादृष्टिता. तत्समुदायिप्रतिपत्तौ च सम्यग्दृष्टिता भावनीया. उक्तं च—कालो सहाव नियइ-पुव्वकयं पुरिसकारणेगंता ॥ मिच्छत्तं ते चेव उ । समासओ होइ सम्मत्तं ॥ १ ॥ इत्यल बहु वक्तव्यं तत्तु नोच्यतेऽनधिकृतत्वात्. ॥३६॥ व्याख्यातं क्रियाद्वारं, अथ क्रमायातान् संयमभेदानाह—

॥ मूलम् ॥—पंचमहव्वयधरणं । चउपंचकसायइंदियनिग्गहो ॥ गुत्तितियं इय संयमं । नेया सत्तरस भणंति ॥ ३७ ॥ व्याख्या—पंचानां महाव्रतानां धरणं, चतुर्णां कषायाणां, पंचानामिंद्रियाणां च निरोधो निग्रहः, गुप्तित्रिकं मनोगुप्त्यादिकं, एते सर्वसंख्यया सप्तदश. सं सामस्त्येन यमनं सावद्ययोगेभ्य उपरमणं संयमस्तस्य भेदा भणंते. ॥ ३७ ॥ तत्र प्रथमं महाव्रतान्याह—

॥ मूलम् ॥-पाणिवहपमुहाणं । पंचण्हं आसवाण भावेण ॥ जं सव्वविरमणं तं । महव्वया पंचमूलगुणा ॥ ३८ ॥ व्याख्या—आ इति स्वनिमित्तमर्यादया अवंत्यशुभं कर्मेत्याश्रवाः प्राणिवधादयः पंच. तेभ्य आश्रवेभ्यः, विनक्तिर्भयलयः प्राकृतत्वात्, भावेनांतःकरणशुद्ध्या, न तूच्चारमात्रेण, यत्सेवः करणकारणानुमतिभेदैर्विरमणं. तानि पंच महाव्रतानि भवंति. एतानि साधूनां मूलगुणा इति व्यपदिश्यंते. ॥ ३८ ॥ अथैतेषां स्वरूपमाह—

॥ मूलम् ॥—तसथावरेवि जीवे । तिनिहा न हणेइ जिअसरूवविऊ ॥ हासलयकोहलोहा । अलियंपि न भासए कहवि ॥ ३९ ॥ व्याख्या—साधुत्रसान् द्वींद्रियादीन्, स्थावरान् पृथ्व्यादीनपि जीवान् न हंति. न देशविरतवत् त्रसानेव केवलमित्यपिशब्दार्थः. कथं न हंतीत्याह-त्रिविधेति, इह हि प्रथमशब्दः करणकारणानुमतिवाची. द्वितीयस्तु मनोवाक्कायार्थः. ततोऽयमर्थः-मनसा, वाचा, कायेन च स्वयं जीवान्न-हंति. न चान्येघातयति, न च घ्नंतमन्यमनुजानातीत्येवंरूपेण एकैकेनैव भंगकेन, कथंभूतः साधुः? जीवस्वरूपवित्, न हि अज्ञातजीवस्वरूपस्तत्परिणामविनाशदुःखोत्पादश्चिरनंसंक्लेशात्मिकां त्रिविधामपि हिं-

सा ।नषध्धुमल. उक्त च–जो जीवेवि न याणेइ । अजीवेवि न याणई ॥ जीवाजीवे अ याणंतो । कहं सो नाइ संयमं ॥ १ ॥ उक्तं प्रथमं महाव्रतं, अथ द्वितीयमुच्यते, हासे-ल्यादि. हास्यात् हसनात्, अनेन प्रेमद्वेषकलहाभ्याख्यानादिपरिग्रहः, भयाज्जीतेः, क्रोधाद-प्रीतेः, लोभादजिघ्वंगात्, आद्यंतग्रहणान्मानमायापरिग्रहः, अलीकं मृषावादं प्राणांतेऽपि न भाषंते. तदलीकं चतुर्धा–सद्भावनिषेधः १, असद्भावोद्भावनं २, अर्थांतराभिधानं ३, ग-र्हावचनं ४ चेति. तत्राद्यं यथा नास्त्यात्मेत्यादि. द्वितीयं यथा श्यामाकतंडुलमात्र आत्मा ललाटस्थो वेत्यादि. तृतीयं तु गामश्वं ब्रुवाणस्य, चतुर्थं तु काणं काणमेव वदतः ॥ ३९ ॥ इत्युक्तं द्वितीयं महाव्रतं, अथ तृतीयचतुर्थे आह—

॥ मूलम् ॥—वज्जेइ जीवकेवली–सामिगुरूहिं अदिन्नमाउत्तो ॥ न य सेवेइ सिवठा। अठारसहावि अवंभं ॥ ४० ॥ व्याख्या—आयुक्त उपयुक्तः सन् साधुर्जीवादिभिरदत्तं वस्तु वर्जयतीति तृतीयं महाव्रतं, तत्र जीवादत्तं सचित्तमुच्यते, तापाय शंकिना जीवेन स्वाश्रि-तदेहस्यानर्पणात्तद्गृह्णतो जीवादत्तं, यद्वा हठेन प्रव्राज्यमानः शिष्योऽपि जीवादत्तमित्युच्यते.

सो परिग्गहो वुत्तो । नाइपुत्तेण ताइणा ॥ मुच्चा परिग्गहो वुत्तो । इइ वुत्तं महेसिणा ॥२॥ पुनर्विध्यंतरमाह–अथ द्रव्यादिषु चतुःषु यन्मूर्छत्वं न करोति. तत्र द्रव्यत उपध्यादौ श्रावकादौ वा; क्षेत्रतो नगरादौ निर्वातवसत्यादौ वा, कालतः शरदादौ दिवसादौ वा, भावतो वपुरुपचयादौ क्रोधादौ वा. अत्रायंतयोर्महाव्रतयोस्त्रिविधत्रिविधभंगकग्रहणात् शेषेष्वपि स एव प्रतिपत्तव्यः. ॥४१॥ एवं सर्वमपि परिग्रहं त्याज्यमुक्त्वार्थविषयस्य तस्य विशेषत्याज्यतामाह–

॥ मूलम् ॥–पडिसिद्धो साहूणं । सतोवि परिग्गहो परमगुरुणा ॥ सव्वाणत्थनिमित्तं । विसेसउ अत्थविसउ सो ॥ ४२ ॥ व्याख्या–प्रतिषिद्धस्तावत्साधूनामुपसर्गतः सर्वोऽप्यधिकोपकरणधरणात्मकः परिग्रहः परमगुरुणार्हता. यदाह—जं वट्टइ उवयारे । उवयरणं तंमि उवगरणं ॥ सेसं अहिगरणं पुण । अजउं अजयं परिहरंतो ॥ १ ॥ अपवादतस्तु क्वचित् क्वचिदनुज्ञातोऽपि, यथा पंचकल्पभाष्यं–एगो तित्थयराणं । निरुवममाणाए होइ उवहीउ ॥ तेण परं निरुवहिणो । जावज्जीवाइ तित्थयरा ॥ १ ॥ गणणाइप्पमाणेणं । उवहिपमाणं दुहा मुणेयव्वं ॥ गणणाइ जिणाणं तु । इक्को दोतिन्नि वाकप्पा ॥ २ ॥ दोरयणीसंघाडो ।

सोत्थउवावि होइ आयामो ॥ रुंदो दिवड्ढहत्थं । एयप्पमाणप्पमाणेण ॥ ३ ॥ दो खोमियाउ इक्को । थेराणं तिन्नि होंति गणणाए ॥ आयायामपमाणा । दुहत्थमऊं च वित्थिन्ना ॥ ४ ॥ एसो उ नवे कप्पो । पुकप्पउं गिलाणए गुरुणं च ॥ चउ सत्त वावि पाउणे । माणइरित्तं च धारिज्जा ॥ ५ ॥ परं स परिग्रहोऽर्थविषयः, अर्थमाश्रित्य विशेषतोऽपवादतोऽपि निषिद्ध एव, सर्वानर्थनिमित्तत्वात्. अयं भावः—गृहिणां भवत्यर्थः, क्वापि क्वापि सत्केवलोपयोगेनार्थकार्यपि भवति, साधूनां तु केवलोद्धाहहेतुत्वादनर्थ एव. यदाह—दोससयमूलजालं । पुव्वरिसिविवज्जियं जइवंतं ॥ अत्थं वहसि अणत्थं । कीस निरत्थं तवं चरसि ॥ १ ॥ ४२ ॥ अथ महाव्रतोपयोगित्वात् षष्ठं रात्रिभोजनविरमणव्रतमपि साधुभिरवश्यं धार्यमित्याह—

॥ मूलम् ॥—तेसिं परिपालणट्ठा । चउहा चउयव्वमेव निसिभत्तं ॥ न हु छप्पा-ऽप्पाविहु । वसहीए सन्निही मुणिणा ॥ ४३ ॥ व्याख्या—इह रात्रौ पर्यटनेनेर्यापथाऽशुद्धेराद्यव्रतस्य भंगः. रात्रिबलेनागस्यगमनमपि कृत्वाहं गोचरचर्यां गतोऽभूवमिति कूटोक्त्या गुरुं प्रत्युत्तरुयतो द्वितीयस्य. तमिस्रबलात्परस्वं एहतः स्त्रियं वा कामयमानस्य तृतीयचतुर्थयोरपि. त-

ङ्गे तु पंचमं भग्नमेव. यद्वा रात्रिभुक्तेऽधिकीभूतं नक्तार्थं पुनः प्रातर्नोद्ये, इति बुध्या स्थापयतः पंचमव्रतभंगो वाच्यः, यत एवं ततस्तेषां महाव्रतानां पालनार्थं मुनिना चतुर्धा निशिभुक्तं रात्रिभोजनं त्यक्तव्यमेव. यदाह्यं—जम्हा मूलगुणा चिय । न हुंति तव्विरहियस्स पमिपुणा ॥ तो मूलगुणग्गहणे । तग्गहणं निच्छओ नेयं ॥ १ ॥ चातुर्विध्यं चास्यैवं—दिवा गृहीतं दिवा भुक्तं १, दिवा गृहीतं रात्रौ भुक्तं २, रात्रौ गृहीतं दिवा भुक्तं ३, रात्रौ गृहीतं रात्रौ भुक्तं ४ इति. अत्र दिवाऽशनाद्यं गृहीत्वा रात्रौ तद्भुसतावस्थाप्य पुनर्द्वितीयदिने भुंजानस्य प्रथमो भेदः, शेषास्त्रयः सुबोधाः. तथा न चाल्पोऽपि लवणमात्रोऽपि सन्निधिर्वसतौ स्थाप्यः. लिंगव्यत्ययः प्राकृतत्वात्. इह चतुर्विधाहारमध्ये यत्किमपि निशि वसतौ निवसति, स समयभाषया सन्निधिरुच्यते, सोऽपि रात्रिभोजनप्रायत्वादुत्सर्गतस्त्याज्य एव. यदागमः—"संनिहिं च न कुविज्जा । अणुमायंपि संजए ॥" इदं च रात्रिभोजनविरमणं महाव्रतानामत्यंतोपकारित्वात् साधूनां मूलगुणः. श्रावकाणां चाहारविरतिमात्रत्वाद्भुत्तरगुणस्तपोवत्. यदाह्यं—निसिभत्तविरमणंपि हु । नणु मूलगुणो कहं न गहियं तं ॥

वयधारिणो ऽपि तयं । मूलगुणो सेसयस्सियरो ॥ १ ॥ ४३ ॥

॥ मूलम् ॥—जं अप्पयासठाणे । जं वा अपयासभावणे असणं ॥ तंपि हु राईनोय-
ण-सरिसं रिसिणो उवइसंति ॥ ४४ ॥ व्याख्या—यदप्रकाशे स्थानेऽपवरकादौ; यद्वाऽप्र-
काशे संकटमुखे भाजनेऽशनमन्यवहरणं तदपि रात्रिभोजनसदृशं ऋषय उपदिशंति, सूक्ष्म-
जीवानिरीक्षणान्निर्दयपरिणामत्वाच्च. ॥ ४४ ॥ तस्मात्किं कार्यमित्याह—

॥ मूलम् ॥—सपरसमए निसिद्धं । असक्कपरिहारसुहुमजीववहं ॥ पच्चक्खनाणिणंपि
हु । वज्जं वज्जेह निसिभुत्तं ॥ ४५ ॥ व्याख्या—स्वपरसमये निषिद्धं, स्वसमयनिषेधः प्रती-
तोऽन्यदर्शनांतः पतितत्वात्. परसमये त्वेवं—ब्रह्मादितेजःसंभूतं । भानुं वेदविदो विदुः ॥ स्पृष्टं
करैस्ततस्तस्य । शुद्धं कर्म समाचरेत् ॥ १ ॥ तथा—नैवाहुतिर्न च स्नानं । न श्राद्धं देवता-
र्चनं ॥ दानं वा विहितं रात्रौ । भोजनं तु विशेषतः ॥ २ ॥ अन्यच्च—मध्याह्ने ऋषिभिर्भुक्तं
। पूर्वाह्णं त्रिदशैस्तथा ॥ अपराह्णे तु पितृभिः । सायं भुंजंति दानवाः ॥ ३ ॥ संध्यायां यक्ष-
रक्षोभि-र्भुक्तमेवं यथाक्रमं ॥ सर्ववेलामतिक्रम्य । रात्रौ भुक्तमभोजनं ॥ ४ ॥ युग्मं ॥ तथाऽ-

शक्यपरिहारः परिहर्तुमशक्यः सूक्ष्मजीवानां कुंथुपनकादीनां वधो यत्र तत्तथा. अत एव प्रत्यक्षज्ञानिनां अवध्यादिज्ञानवतामपि वर्ज्य, ते हि ज्ञानबलाद्यद्यपि पश्यंति सूक्ष्मजीवान्, तथापि परिहर्तुं न शक्नुवंतीति निशि न जुंजते. यदागम.—जइवि हु फासुयदवं । कुंथुपणगा य तहवि दुप्पेसा ॥ पच्चक्खनाणिणोवि हु । राइन्नत्तं परिहरंति ॥ १ ॥ तत एवंविधं निशि भुक्तं हे साधवो यूयं वर्जयत? चर्मचक्षुषां युष्माकं तत्सर्वथा न युक्तमित्यर्थः. इत्युक्तं पंचमहाव्रतप्रतिपालनं. ॥ ४५ ॥ अथ चतुर्णां कषायाणां निरोधमाह—

॥ मूलम् ॥—भवपुरदुवारभूए । मोहमहाचरटपयडसामंते ॥ रुंधिज्ज पावपायव-विडवे चत्तारिवि कसाए ॥ ४६ ॥ व्याख्या—कप्यंते कदर्थ्यंते प्राणिनोऽनेनेति कपं कर्म, तस्यायो लाभो येभ्यस्ते कषायाः, यद्वा कप्यंते प्राणिनोऽत्रेति कपः संसारस्तं अयंते गच्छंत्येभिरिति कषायाः क्रोधादयश्चत्वारस्तान् रुंध्यान्मुनिरनुदितानामनुदीरणेनोदयप्राप्तानां वा विफलीकरणेन. शेषं सुगमं, नवरं पादपस्य विटपान् शाखाप्रायान् ॥ ४६ ॥ अथ कषायाणां सप्रभे-

"॥ मूलम् ॥—कोहाइ त चउरा । नया चत्तारि तेसिं पत्तेयं ॥ अण अप्पचक्काणा । पच्चक्काणा य संजलणा ॥ ४७ ॥ व्याख्या—ते कषायाः क्रोधादयश्चत्वारो भवंति, क्रोधो, मानो, माया, लोभश्चेति. तेषां च चतुर्णामपि प्रत्येकं प्रत्येकं चत्वारो भेदास्तद्यथा—"अणत्ति" सूचामात्रत्वात्सूत्रस्य, अनंतं भवं भ्रमणीयत्वेनानुबध्नंतीत्यनंतानुबंधिनः क्रोधादयः, येषामुदये जीवः सम्यक्त्वं न लभते, लब्धं वा सम्यक्त्वं वमति. "अप्पचक्काणत्ति" नञः सर्वनिषेधवाचित्वान्नास्ति सर्वथापि विरतिरूपं प्रत्याख्यानं येषु तेऽप्रत्याख्यानाः, यदुदये प्राप्तसम्यक्त्वानामपि न जायते देशविरतिपरिणामः, जातो वा निर्नाम नश्यति. "पच्चक्काणत्ति" प्रत्याख्याने सर्वविरतिरूपमावृण्वंतीति प्रत्याख्यानावरणाः, यदुदये न सर्वविरतिं प्राप्नोति, प्राप्तापि वा सा विलीयते. संज्वलयंति औदयिकभावमानयंति चारित्रिणमपि ये ते संज्वलनाः, यदुदये न भवति यथाख्यातचारित्रं, शेषचारित्रभेदास्तु भवंत्येव. बहुवचनं क्रोधादिषु चतुष्केषां संबंधार्थं. तद्यथा—अनंतानुबंधी, अप्रत्याख्यानः, प्रत्याख्यानावरणः, संज्वलनः क्रोधः. अनंतानुबंधी, अप्रत्याख्यानः, प्रत्याख्यानावरणः, संज्वलनश्च मानः. एवं माया

लोजनयोरपि योजना कार्या. ॥ ४७ ॥ अथ स्थितिगतिभ्यां गुणघातकत्वेन चैषामनंतानुबंध्यादीनां विशेषलक्षणमाह—

॥ मूलम् ॥—जम्म वासं चउमासु-मद्धमासं कमा ठिई एसिं ॥ नारयतिरियनरामर-गईसु-एसु मया जंति ॥ ४८ ॥ सम्मत्तं गिहिधम्मं । जइधम्मं अणुकमा-ऽहक्खायं ॥ वीसासघायगा इव । वीसत्थाणं हणंति इमे ॥ ४९ ॥ व्याख्या—इदं अप्युत्तानार्थं, नवरं " एसु मयत्ति " एष्वनंतानुबंध्यादिकषायाध्यवसानेषु मृताः. आह परः—ननु अनंतानुबंध्युदये नरकगतिः, संज्वलनोदये तु देवगतिरिति गतिनियमोऽत्रानिर्हितस्ततः कथं क्षायिकसम्यग्दृष्टित्वादनंतानुबंधिषु क्षीणेष्वपि श्रेणिकादीनां नरकगमनं ? मिथ्यादृष्टित्वात्-सत्यप्यनंतानुबंध्युदयेऽन्यानां च देवगतिगमनमागमे प्रत्यपादीत्यत्रोच्यते—सत्यं, किंत्वत एव वचनबलादेषामनंतानुबंध्यादिभेदानां प्रत्येकं अनंतानुबंध्यादिभेदतुल्यत्वमागमे साक्षादनुक्तमपि युक्तियुक्तत्वात् प्रतिपत्तव्यं, तद्यथा—अनंतानुबंधी क्रोधोऽनंतानुबंधितुल्यः, अप्रत्याख्यानतुल्यः प्रत्याख्यानावरणतुल्यः, संज्वलनतुल्यश्च. एवमप्रत्याख्यानक्रोधोऽनंतानुबंधितुल्यः,

अप्रत्याख्यानतुल्यः, प्रत्याख्यानावरणतुल्यः, संज्वलनतुल्यश्च. एवं प्रत्याख्यानावरणसंज्वलनावपि क्रोधौ प्रत्येकमनंतानुबंध्यादिभेदचतुष्टयतुल्यौ वाच्यौ. एवं मानमायालोभेष्वपि चतुर्णामप्यनंतानुबंध्यादिभेदानां प्रत्येकं चातुर्विध्यं भावनीयं. ततश्च श्रेणिकादीनामप्रत्याख्यानाअपि कषाया अत्यंतदुस्सहतयाऽनंतानुबंधिकल्पाः संजाव्यंते. अप्रत्याख्यानां चानंतानुबंधिनोऽपि ज्ञानध्यानादिभिः प्रतनुकृताः संज्वलनतुल्याः, तेन तेषां नरकगतिदेवगती न व्यभिचरतः, हेत्वंतरं वा सुधीभिर्विमृश्यं, तत्त्वस्य केवलिगम्यत्वात् ॥ ४८ ॥ ४९ ॥ अथ कषायाणां सामर्थ्यसीमानमाह—


॥ मूलम् ॥—इक्कारस्स गुणठाण-गस्स सीसंपि जं समारूढो ॥ पाविज्ज कसाएहिं । जणाहि को तेसिं वीसंतो ॥ ५० ॥ व्याख्या—एकादशं गुणस्थानकमुपशांतमोहमित्युच्यते. एतच्च यथा श्रेणिक्रमेण भवति तथा प्ररूप्यते. इहोपशमश्रेणिप्रारंभकोऽप्रमत्तसंयतो भवतीति केचित्. अविरतदेशविरतप्रमत्ताप्रमत्तानामन्यतर इत्यन्ये. श्रेणिसमाप्तौ च निवृत्तोऽप्रमत्तगुणस्थाने प्रमत्तगुणस्थाने वावतिष्ठति. कालगतस्तु देवेष्वविरतो वा भवति. उक्तं च—

उवसामगसेढीए । पढवओ अपमत्तविरओ य ॥ पज्जत्तसाणे सो वा । होइ पमत्तो अविरओ य ॥ १ ॥ अन्ने भणंति अविरय-देसपमत्तापमत्तविरयाणं ॥ अन्नयरो पन्निवओ । दंसणसमणंमि उ नियट्टी ॥ २ ॥ कर्मग्रंथाभिप्रायेण तु प्रतिपतितोऽसौ मिथ्यादृष्टिगुणस्थानमपि यावद्गच्छति. तत्रेत्थमेतामारूढतेऽसौ प्रतिपत्ता प्रशस्तेष्वध्यवसायस्थानेषु वर्तमानः प्रथमं युगपदंतर्मुहूर्तेनानंतानुबंधिनः क्रोधमानमायालोभानुपशमयति. ततो मिथ्यात्वमिश्रसम्यक्त्वरूपं दर्शनत्रिकं युगपदंतर्मुहूर्तेनोपशमयति. ततो यदा पुरुषः श्रेणिसमारूढा स्यात्तदानुदीर्णमपि नपुंसकवेदमंतर्मुहूर्तेनोपशमयति. ततः स्त्रीवेदमंतर्मुहूर्तेन, ततो हास्यरत्यरतिशोकजुगुप्सालक्षणं षट्कं युगपदंतर्मुहूर्तेन, ततः पुरुषवेदमंतर्मुहूर्तेनोपशमयति.

अथ स्त्री प्रारंभिका, ततः पूर्वं नपुंसकवेदं, ततः पुरुषवेदं, ततो हास्यादिषट्कं, ततः स्त्रीवेदं. अथ नपुंसकः प्रारब्धा, ततोऽसावनुदीर्णमपि पूर्वं स्त्रीवेदं, ततः पुरुषवेदं, ततो हास्यादिषट्कं, ततो नपुंसकवेदं. अयं भावः—यो वेद उदये वर्तते, तस्मात्तेषस्य वेदद्वयस्य मध्ये यो जघन्यो वेदस्तं प्रथममुपशमयति, ततो द्वितीयं, ततो हास्यषट्कं, ततो य उदये

वर्तते तं वेदमुपशमयतीति क्रम. अत परमप्रत्याख्यानप्रत्याख्यानावरणौ क्रोधौ युगपदंत र्मुहूर्तेनोपशमयति. ततः संज्वलनं क्रोधमेकाकिनमेवांतर्मुहूर्तेनोपशमयति. ततोऽनया रीत्याऽप्रत्याख्यानप्रत्याख्यानावरणौ मानौ युगपत्, ततः संज्वलनं मानं, ततोऽप्रत्याख्यानप्रत्याख्यानावरणौ मायौ, ततः संज्वलनां मायां. ततोऽप्रत्याख्यानप्रत्याख्यानावरणौ लोभौ, ततः संज्वलनं लोभं. अमुं चोपशमयत्त्रिधा कृत्वा द्वौ भागौ युगपदुपशमयति. तृतीयं तु भागं संख्येयानि खंडानि करोति. तान्यपि पृथक्कालभेदेनोपशमयंश्चरमखंडमसंख्येयानि खंडानि करोति. तान्यपि समये समये एकैकमुपशमयन्नंतर्मुहूर्तेन सर्वाण्युपशमयति. इह च दर्शनसप्तके उपशांतेऽपूर्वकरणोऽनिवृत्तिबादरो वाभिधीयते, न पुनस्तत्र किंचिदुपशमयति. तत ऊर्ध्वमनिवृत्तिबादरो यावत् संख्येयखंडानां चरमाद्यखंडनिष्पन्नानि त्वसंख्येयखंडान्युपशमयन् सूक्ष्मसंपरायः, ततः परमंतर्मुहूर्तमुपशांतमोहो भवति. सर्वापि चेयं श्रेणिरारोहतामंतर्मुहूर्तेन समाप्यते.

—अस्याः स्थापना—



अत्र शून्यस्थाने अनंतानुबंधिचतुष्टयादयो ज्ञेयाः. येषामुपशमस्य प्रारंभो निष्ठा च समकालं तत्तच्छून्यानि निर्यक् समतया स्थाप्यंते. अत्र यदि वद्धायुरिमां श्रेणिमारभते, तदा श्रेणेः समाप्तावसमाप्तौ वा कालं कृत्वा नियमादनुत्तरसुरेष्वेवोत्पद्यते. उक्तं च—बद्धाऊपडिवन्नो । सेढिगउवा पसंतमोहो वा ॥ कुणइ कोइ काले । सो बच्चइणुत्तरसुरे य ॥ १ ॥ अबद्धायुः पुनः श्रेणिं संपूर्णांकृत्यांतर्मुहूर्तमुपशांतमोहो भूत्वा कुतश्चिन्निमित्ताद्युदितकषायः प्रतिपतन्नियमाद्यथारूढस्तथा श्रेणेः पश्चान्मुखं निवर्तते. उक्तं च—अनिवद्धाउ होउ । पसंतमोहो मुहुत्तमित्तं तु ॥ उइयकसाउं नियमा । निवत्तए सेढिपडिलोमं ॥ १ ॥ अथ गाथार्थं उच्यते—इत्युक्तस्वरूपस्य एकादशस्य गुणस्थानस्य शीर्षमग्रविभागमपि समारूढो यदि कषायैः पात्यते. पुनर्मिथ्यात्वमपि नीयते साधुः. ततो

नण कस्तेषां सर्वानर्थमूलानां कषायाणां विश्रंभो विश्वासः? सर्वथा नैषां विश्वसितव्यमित्यर्थः. उक्तंच—जइ उवसंतकसाउ। पडइ अणंतं पुणोवि पडिवायं ॥ न हु ते वीससिअव्वं। थोवेवि कसायसेसंमि ॥ १ ॥ ५० ॥ एतत्कषायाणां दौरात्म्यमजानानास्ताननिगृह्य ये धर्मार्थं क्लिश्यंति ते जमा एवेत्याह—

॥ मूलम् ॥—कट्ठकिरियाहिं देहं। दमंति किं ते जमा निरपराहं ॥ मूलं सव्वदुहाणं। जेहिं कसाया न निग्गहिया ॥ ५१ ॥ व्याख्या—स्पष्टा, न त्वरं कष्टक्रियाभिस्तपोवनवासकायोत्सर्गादिभिर्निरपराधमिति देहस्याचेतनत्वात् ॥ ५१ ॥ अत एव—

॥ मूलम् ॥—तत्तमिणं सारमिणं। दुवालसंगीइ एस नावत्थो ॥ जं भवजवणसहाया। इमे कसाया चइज्जंति ॥५२॥ व्याख्या—मोक्षमार्गप्रकाशिकाया द्वादशांग्या इदं तत्त्वं रहस्यं, इदं सारं दध्न इव नवनीतं. एष च तात्पर्यार्थः. यद्भवभ्रमणसहाया इमे प्रागुक्तस्वरूपाः कषायास्त्यज्यंते. एभिस्त्यक्तैर्भवभ्रमणमपि त्यक्तमेव, निःसहायत्वात्. ॥ ५२ ॥ एवं सामान्यतः कषायनिग्रहमुपदिश्याथ पृथक् पृथक् तन्निग्रहाय विशेषोपदेशमाह—

॥ मूलम् ॥—एसु दुहनट्टरंगे । निच्चिमहावह्निमलणमायंगे ॥ सुविवेयदिसामोहे । रं जिज्जइ कहसु कह कोहे ॥ ५३ ॥ व्याख्या—एषु कषायेषु वैरव्यसनविग्रहादिदुःखान्येव नानारूपत्वान्नाट्यानि, तेषामत्तिनयनाय रंगे रंगभूमौ, मैत्री सौहार्दं सैव चिरप्ररूढत्वान्महावह्नी, तस्या मर्दनाय मत्तमातंगे समदहस्तिनि, सुविवेकस्य प्रतिपदं स्खलनाय दिग्मोहे कथय कथमेवंविधे क्रोधे रज्यते, नैव रज्यत इत्यर्थः. ॥ ५३ ॥ अथ श्लिष्टविशेषणगर्भं क्रोधस्य वह्नेरपि वैषम्यमाह—

॥ मूलम् ॥—कट्ठाइं पवड्ढंतो । पज्जलइ जलंमि न हु जलइ नेहे ॥ दिप्पंतो देइ तमं । कोहहुयासो इह अपुव्वो ॥ ५४ ॥ व्याख्या—इह अपूर्वं जनराग्निभ्यो विलक्षणः क्रोध एव हुताशः क्रोधहुताशो वर्तते, तद्यथा—क्रोधः कष्टानि स्वशिरउरःकुट्टनादीनि वर्धयन् जडे मंदबुद्धौ जने प्रकर्षेण ज्वलति, न पुनर्जलति स्नेहेऽन्योन्यप्रीतिबंधात्मके, दीप्यमानो ज्वलन् सन् तमः पापं ददाति. अन्यो हि हुताश. काष्टानि भस्मीकुर्वन् जलेंजलसि न ज्वलति. ज्वलति च स्नेहे तैलादौ दीप्यमानः सन् तमोंधकारं नाशयतीति क्रोधहुता-

शस्य युक्तमपूर्वत्वं. ॥ ५४ ॥ यत एवं ततः साधुनियत्कर्तव्यं तदाह—

॥ मूलम् ॥—मा रुसह रोसिल्ले । मा वसह परंमि अहिसवंतंमि ॥ मा पहरह पहरंते ।
उवसमसारं खु सामणं ॥ ५५ ॥ व्याख्या—स्पष्टा, अथ मानस्वरूपमाह—

॥ मूलम् ॥—नासियगुरूवएसं । विज्जा अहलत्तकारणमसेसं ॥ कुग्गहगयआलाणं ।
को सेवइ सुवउं माणं ॥ ५६ ॥ व्याख्या—नाशिता दूरीकृता गुरुपदेशा येन तं तथा, न हि मानेन गजनिमीलिकां दधतां गुरवो हितोपदेशं ददतीति भावः. तथा अशेषं पूर्णं विद्यानां प्रज्ञप्त्यादीनां शास्त्राणां वा अफलत्वस्य कारणं. न हि मानवतां विद्याः फलंतीति भावः. कुग्रहोऽसद्ग्रहः, स एव सवलत्वाद्गजस्तस्य स्थिरीकरणायालानं कः सुव्रतः सेवते मानं? ॥ ५६ ॥ अथ मानस्य सांदृष्टिकं फलमाह—

॥ मूलम् ॥—जेणं माणो पाणो । वसाविउं नियहियए ठाणंमि ॥ जुत्तं नाणाइगुणा ।
सुपवित्ता तं न छिप्पंति ॥ ५७ ॥ व्याख्या—येन केनचिन्मान एव पाणो देशीन्यायया चंडालः स्वकीयहृदयस्थाने वासितः, युक्तमुचितं ज्ञानादयो गुणास्तं मानचंडालसंसर्गमलिनं न

स्पृशंति. कथंभूता गुणाः? सुष्ठु अतिशयेन पवित्राः, सुपवित्रैर्हि आस्तां चंक्रमस्तत्संपर्ककारी अपि क्षुरतल्यते इत्यर्थः. ॥ ५७ ॥ अथ पारत्रविकं फलमाह—

॥ मूलम् ॥—पवरकुलजाइबलसुय—तवरूवे सरियलाभगणेसु ॥ जो जेणं इह मच्चइ । मुच्चइ सो परभवे तेणं ॥ ५८ ॥ व्याख्या—प्रवराणि वर्तमानकालापेक्षया प्रधानानि कुलादीनि, तत्र कुलं पैतृकं उग्रादिकं वा, जातिर्मातृकी विप्रादिका वा, बलं शारीरिकं स्थाम, श्रुतं प्रज्ञोन्मेषजन्मशास्त्राधिगमः, तपो विकृष्टतपश्चरणं; रूपं सुसंस्थानत्वं, ऐश्वर्यं गृहादिप्रभुत्वं, लाभो धनाद्यातिः. एतेष्वष्टसु मदस्थानेषु यः कश्चिद्येन मदहेतुना माद्यति, अहो अहं कुलीनोऽहं बलवान्, इत्याद्युत्कर्षं धत्ते, स परभवे तेनैव जात्यादिना गुणेन मुच्यते, हीनो भवतीत्यर्थः. ॥ ५८ ॥ अथ मायायाः परिहारमाह—

॥ मूलम् ॥—दुव्वुड्ढितिमिरराई । विविहदुरायारवञ्चिवणराई ॥ नीसेसदोसमाया । वंजाजाइ दूरउ माया ॥ ५९ ॥ व्याख्या—दुर्वृद्धयः परवंचनन्यासापहारादिचिंतात्मिकास्ता

विश्वासघातकूटलेखनकूटतुलामानकरणाद्याः, त एव जरूप्रियत्वाद्वयस्तासामवस्थानाय वनराजिरिव वनराजिः, निःशेषाणां दोषाणां पैशुन्यादीनां पोषणाय मातेव माता माया दूरतो वर्ज्यते. ॥ ५९ ॥ यतः—

॥ मूलम् ॥—कुडिलगई कूरमई । होइ सया चरणवज्जिउ मलिणो ॥ मायाइ नरो भुयंगुव्व । दिट्ठमित्तोवि नयजणउ ॥ ६० ॥ व्याख्या—मायया हेतुभूतया नरः पुरुषो भुजगः सर्प इव दृष्टमात्रोऽपि भयजनको भवति, तत एव न कोऽपि तस्य विश्वसितीत्यर्थः. कथंभूतः सः? कुटिला शाठ्यबहुला गतिश्चर्या यस्य सः कुटिलगतिः. क्रूरा दुष्टाध्यवसायवती मतिर्यस्य स क्रूरमतिः. तथा सतामाचरणानि न्यायव्यवहारसत्यभाषणादीनि, तैर्वर्जितः, तथा मलिनः पापबहुलत्वात्, भुजंगपक्षे कुटिला गोमूत्रिकाकारा गतिर्यस्य स., तथा क्रूरमतिरिति विशेषणं स्पष्टं. सदा शश्वच्चरणवर्जिता गूढपादत्वात्, मलिनः कालमूर्तित्वात्. ॥ ॥ ६० ॥ अन्यच्च—

॥ मूलम् ॥—हाइ अविससणिज्जो । जवहयकित्ती विरत्तसयणो य ॥ परवंचणं कुणं-

तो । मायिल्लो वंचिउं विहिणा ॥ ६१ ॥ व्याख्या—मायावी पुरुषः परुषहृदयतया परवंचनां कुर्वन् स एव विधिना वंचितो भवति. विधिर्दैवं कर्म चेत्येकार्थाः. यतोऽसौ पूर्वं सर्वेषां विश्वासपात्रं भूत्वा मायया सर्वत्राऽविश्वसनीयो जायते, यशस्वी भूत्वा उपहतकीर्तिर्जायते, स्वजनप्रियो भूत्वा विरक्तस्वजनश्च जायते. ततो यः परं वंचयितुं मायां प्रयुक्ते, वस्तुतः स एव स्वकर्मणा वंच्यते, सर्वस्वार्थभ्रंशादिति तात्पर्यार्थः. ॥ ६१ ॥ अथ लोभमाह—

॥ मूलम् ॥—गुणतिमिं तिमिंगिलसमं । सुचारुचारित्तचंदराहुवमं ॥ नयपायवनइउंदं । विबुहो वहुमन्नइ न लोहं ॥ ६२ ॥ व्याख्या—गुणा एव सज्जनहृदयांभोधिजातत्वात्तिमयो मत्स्यास्तेषां ग्रसनाय तिमिंगिलसमं, यथा तिमिंगिलस्तिमीन् ग्रसते, तथा लोभो गुणानिति भावः. यत्परेऽप्याहुः—भूमिस्थोऽपि रथस्थांश्च । पार्थः सर्वधनुर्धरान् ॥ एकोऽपि वारयामास । लोभः सर्वगुणानिव ॥ १ ॥ तथा सुचारित्रमेव निर्मलत्वाच्चंद्रस्तदाछादनाय राहूपमं. नयो न्यायव्यवहारः, स एव जनमनःकमनीयत्वात्पादपो वृक्षस्तस्य ध्वंसनाय नद्योघं सरित्प्रवाहं, एवंविधं लोभं विबुधो विद्वान्न बहु मन्यते. ॥ ६२ ॥ अथास्य सामर्थ्यमाह—

॥ मूलम् ॥—कोहाईणो कसाया । नवमगुणं जंति लोभपरिग्गहिया ॥ इक्कारस खी-
णुवि हु । वच्चइ दसमं गुणं सोहो ॥ ६३ ॥ व्याख्या—क्रोधादयस्त्रयः कषायाः समर्था अपि
लोभपरिगृहीता लोभसहिता एव नवमं गुणस्थानकमनिवृत्तिबादरं यान्त्यांति, न परतः, त-
त्र तेषामुदयस्य सत्तायाश्च व्यवच्छेदात्. लोभः पुनरेकोऽपरकषायनिरपेक्षोऽपि तथा खंडितः
किट्टीकृतोऽपि दशमं गुणस्थानकं सूक्ष्मसंपरायं व्रजति. ततः कथं नाम सामर्थ्यमस्य न
प्रशस्यते? यथा चासौ खंडितस्तथोपशमश्रेणिग्रहणे भावितमेव. ॥ ६३ ॥ किंच—

॥ मूलम् ॥—कोहो माणो माया । तिन्निवि लोभं विणा अणाहव्व ॥ तत्तो कसाय-
सिन्ने । मन्ने अस्सेव सामित्तं ॥ ६४ ॥ व्याख्या—क्रोधो मानो माया चेति त्रयोऽपि कषाया
लोभं विना अनाथा इव न क्वचित्प्रवर्तमाना दृष्टाः, ततोऽहमेवं मन्ये, निजबलनिर्विरुद्धं-
वितविश्वत्रये सुरासुरपतिभिरप्यप्रतिहतप्रसरेऽस्मिन् कषायसैन्येऽस्यैव लोभस्य स्वामित्वं दृ-
श्यते. हि स्वामिना विना कृता महायोधा अपि न परेभ्यः प्रहर्तुमुद्यच्छंतीति. ॥ ६४ ॥ एवं च-
तुर्णामपि कषायाणां दौरात्म्यमुक्त्वाथ तन्निग्रहोपायमाह—

॥ मूलम् ॥--कीकियपयत्तमेलिय—धम्मकणाणं दवा इमे चउरो ॥ उवसममद्दवज्ज-
ज्जव-संतोसजलेहिं जिप्पंति ॥ ६५ ॥ व्याख्या—यथा कीटिका शनैः शनैः स्वगात्रोचितप्र-
यत्नेन नीवारादिकणान् संचिनोति, दवानलस्तु ज्वलन्नेकपदे क्षणेन तान् दहति. तथा प्र-
मादबहुलत्वाज्जीवैः कीटिकाप्रयत्नेन कथंचिन्निमीलिता ये धर्मकणास्तेषां सपदि भस्मीकर
णाय दवानलप्राया इमे प्राग् निर्दिष्टाश्चत्वारः क्रोधादयः कषाया उपशममार्दवार्जवसंतोषै-
रेव जगदानंदकत्वाज्जलैर्मेघोदकैः क्रमाज्जीयंते. ॥ ६५ ॥ अथ कषायत्यागस्य मुख्यं मोक्षांग-
त्वमाह—

॥ मूलम् ॥—सव्वेसुवि तवेसु । कसायनिग्गहसमं तवो नत्थि ॥ (अत्रोपपत्तिमाह) जं
तेण नागदत्तो सिद्धो बहुसोवि जुंजंतो ॥ ६६ ॥ व्याख्या—यद्यस्मात्कारणात्तेन कषायनिग्र-
हेण नागदत्तो मुनिर्बहुशोऽपि युंजानः सिद्धः ॥ ६६ ॥ तत्कथा चैवं, अथ नागदत्तमुनिकथा-

क्वापि गच्छे पुरा साधुः । क्षपकोऽभून्महामनाः ॥ सोऽतिन्म प्रतिपद्दं । मासक्षपणपार-
णे ॥ २ ॥ एका पदा तदामर्दि । मंडूकी तेन वृष्टिजा ॥ प्रमादमाचरंतं च । स्मारितः कुव-

केन सः ॥ २ ॥ मंजूकीमंदिता लाक-दशायन्नवद-मुनिः ॥ क्रिमेता अपि रे दुष्ट । अल दृष्ट
मया हताः ॥ ३ ॥ सोऽपि कोप परिज्ञाय । मुनेर्मौनमशिश्रयत् ॥ प्रतिक्रमणकाले च । तं
प्रमादमसस्मरत् ॥ ४ ॥ प्रतिक्रांतेरनुक्रुद्धः । कृतांत इव मूर्तिमान् ॥ क्षुल्लके श्लेष्मपात्रेण ।
हंतुं साधुरधावत ॥ ५ ॥ अंतरा स्फालितः स्तंभे । साधुः सद्यो व्यपद्यत ॥ क्रोधः स्वाश्रय-
नाशाय । क्षयव्याधिरिव ध्रुवं ॥ ६ ॥ उदपद्यत सोऽटव्यां । कुक्षे दृग्विषनोगिनां ॥ मूर्त्यांति-
मसिः क्रोध-मातंगस्येव संगतः ॥ ७ ॥ कुले च तत्र ये सर्पा—स्ते विद्यंतेऽखिला अपि ॥
प्राग्विराधितचारित्रा-जातिस्मरणशालिनः ॥ ८ ॥ मास्मभूजंतुसंघात-घातोऽस्माकं इशा दि-
वा ॥ इति सर्वे निशि ध्रांत्वा । प्रांशु. प्रासुकमेव वै ॥ ९ ॥ सोऽपि तत्र स्मरन् जातेः । स्वं
निनिंद मुहुर्मुहु. ॥ विदधे प्रासुकाहारै-र्वृत्तिं च विचरन्निशि ॥ १० ॥ इतश्च निश्चलस्थामा ।
श्रीवसंतपुरे पुरे ॥ पुत्रोऽरिदमनक्षोणी-भर्तुर्दृष्टोऽहिना मृतः ॥ ११ ॥ कोपकंप्राधरः क्षमापो ।
जातिवैरं वहन्नथ ॥ जघान घातयामास । स्वयमन्यैश्च योगिनः ॥ १२ ॥ निहत्याहेरन्वयवं ।
तस्य य कोऽप्यदर्शयत् ॥ तस्मै ददौ स दीनारं । चर्मण्वामिव भूपतिः ॥ १३ ॥ तदा गा-

रुमिकः कोऽपि । तदेवालोक्यन् वनं ॥ जुवि नोजंगमी रेखा । शूयसीवींदयं पिप्रियें ॥ १४ ॥
तत्र प्रतिविलद्वार-क्षितौषधबलेन सः ॥ सर्पान् संदंशकेनेवा-चकर्षं निजघान च ॥ १५ ॥
सोऽप्यौषधबलान्मध्ये-बिलं स्थातुमशक्नुवन् ॥ दध्यौ कृपकजीवाहिं-रयं मा मद्दृशा मृतः ॥
॥ १६ ॥ निरगंउत्ततः पुत्रे-नैप सोऽपि च निर्विदे ॥ कृष्णेंकुयष्टिवत्तस्य । निर्गतं निर्गतं
वपुः ॥ १७ ॥ अमुंचन् शमसाम्राज्यं । वेदनाव्याकुलोऽपि सः ॥ समत्यज्यत कुस्थान-वासो-
ऽग्नेरिवासुजिः ॥ १८ ॥ तथा सोऽप्रीणयद्भूपं । हतानादाय जोगिनः ॥ स्वयमेवाभवद्भोगी ।
तद्वत्तऽविर्णेर्यथा ॥ १९ ॥ इतश्च भूपतिं नाग-देवता काप्यवोचत ॥ मावधीः फणिनः सू-
नु-र्नविता तव भृधव ॥ २० ॥ स एव कृपकात्माथ । भूनायस्य सुतोऽजनि ॥ चक्रे च ना-
गदत्तास्या । पितृव्यां तस्य सान्वया ॥ २१ ॥ तस्यामूत्पयसः शैत्य-मिव स्वाभाविकः शमः ॥
कृपा प्रियसखीवास्य । जातु तत्याजनांतिकं ॥ २२ ॥ सोऽन्यदा श्रमणान् वीक्ष्य । सस्मार
प्राच्यजन्मनः ॥ कथंचित्पितरौ पृष्ट्वो-ररीचक्रे च संयमं ॥ २३ ॥ आभवं प्राग्जवाभ्यासात् ।
इषे ऽसरी ॥ अनप्रतिदिनं स त्रि-रयुक्त व्रतधार्यपि ॥ २४ ॥ नीरागसंवरानंदी । च-

नागमधृतोदयः ॥ तत्रागत्तपःस्फातो । मुनींद्रो म्लायतिस्म सः ॥ २५ ॥ चतुःस्त्र्यब्दमासा-
त--नुजोऽभूवन्महर्षयः ॥ गच्छे तत्रैव चत्वारः । पुण्यनेदा इवांगिनः ॥ २६ ॥ तपस्यतः स
तान् वीक्ष्य । दध्यौ बालर्षिरंजसा ॥ धन्या अमी तपःखड्गै-र्यें लुपंत्यांतरद्विषः ॥ २७ ॥ न
पयःपूतरो धान्य-कीटः कुर्वे कदाप्यहं ॥ एकाशनकमप्येषां । वैयावृत्यं करोमि तत् ॥ २८ ॥
तं क्षुल्लमन्यदा नित्य-वैयावृत्यपरायणं ॥ क्षपकर्षीनतिक्रम्य । ववंदे शासनामरी ॥ २९ ॥ प्र-
त्यावृत्तां चतुर्मास-क्षपकस्तामवोचत ॥ वंद्यक्रमं लंघमाना । कासि रे कटपूतने ॥ ३० ॥ व-
दुमन्ये च पांथानां । श्रेयः प्रत्यूहसूचिकां ॥ त्वत्तस्तां वन्यचटकां । देवीं च व्योमगामपि ॥
॥ ३१ ॥ यदेनं वंदसे बालं । विहायाम्मांस्तपस्यतः ॥ ततस्त्वमपि बालासि । तुल्यैः प्रायेण
सोहृदं ॥ ३२ ॥ उवाच देवता साधो । किमेवं कलहायसे ॥ किं द्रव्यक्षपकैर्नाम-क्षपकेषु
ममादरः ॥ ३३ ॥ यज्जीवितं तपस्याया । यच्च नीवी महात्मनां ॥ वर्तते निष्कषायत्वं ।
तदस्मिन्नपि बालके ॥ ३४ ॥ सुखं घ्नंति नृणामुद्ग्राः कषाया । वपुः शोष्यते किं तपोनिर्वरा-
कं ॥ नृशंसैर्जगद् ग्रस्यते कृष्ण सर्पै-र्विनाश्येत हि गोनसो न्युनसत्वैः ॥३५॥ तपो द्वादशधा तत्।

वैयावृत्यं विशिष्यते ॥ तस्म न्नेकाग्रहृत्वेन । वाक्षोऽप्येषोम हातपाः ॥३६॥ इत्युक्त्वा व्यरमद्देवी । सोऽपि क्षुल्लो घुनुक्षितः ॥ प्रातः करंजमानीय । न्यमंत्रयत तंमुनिं ॥ ३७ ॥ आयूनः क्षोत्रयत्येष । किमस्मानिति कोपनः ॥ स तत्पतद्ग्रहे श्लेष्म—स्तवकं मुमुचे रुचिः ॥ ३८ ॥ एवमामंत्रिता-स्तेन । त्रयः शेषा महर्षयः ॥ चक्रुस्तथैव तेषां हि । न क्रोधः पंक्तिभेदकृत् ॥ ३९ ॥ क्षुल्लो दध्यौ चनाऽद्यापि । यत्तेषां कफभाजनं ॥ निष्ठीवंतस्तदस्थाने—ऽप्येते निंद्याःकिमुत्तमाः॥४०॥ क्षुधाहं न तपस्यायां । शक्तः किं क्षोभयाम्यमुं ॥ स्वयं दुर्गतो दैवात् । किं लक्ष्मीवत्सु कु-प्यति ॥ ४१ ॥ नासंभाव्या किल कफौ–घधिलब्धिस्तपस्विनां ॥ कासोऽयं तन्ममाप्यस्तु । कर्मव्याधिविनाशनः ॥ ४२ ॥ एवं विभावयन्नंतः । क्षपकैर्वारितोऽपि तैः ॥ कफं तं तेमनी-कृत्य । करंमं घुनुजे मुनिः ॥ ४३ ॥ व्यराध्यंत समाधिस्था । यन्मयामी तपस्विनः ॥ अपु-न.करणेनैत—न्मिथ्यादुष्कृतमस्तुमे ॥ ४४ ॥ इति ध्यानमहावातो—ध्वस्तदुष्कर्मशैवले ॥ केवलश्रीर्मरालीना—खेलत्तस्यात्मपल्वले ॥ ४५ ॥ तदेव स्वर्णकमलं । समलंकृत्य दैवतं ॥ श-मडुममुधां चक्रे । साधुचक्री स देशनां ॥ ४६ ॥ नत्वा केवलिनं सेवं । देवता क्षपकान् ज-

गौ ॥ महिमानममानं सो । यावत्स्याप्रपश्यत ॥ ४७ ॥ विहाय वस्तपाराशीन् । बालेऽस्मि-
न्ननुरागिणीं ॥ मामित्वोपलब्धवे किं । नाधुना केवलश्रियं ॥ ४८ ॥ ते दध्युर्ज्ञानमुत्पेदे ॥ य-
देतस्य तपोविना ॥ ततस्तत्प्रशमायत्तं । तं विना वंचिता वयं ॥ ४९ ॥ न कषायात्तचित्तस्य ।
स्यात्तपोऽपि फलप्रदं ॥ अंतर्वह्नि वसंतोऽपि । किं नु पल्लवति द्रुमं ॥ ५० ॥ एवं ते शममापन्ना ।
वव्रिरे केवलश्रिया ॥ क्रमादवक्रमानंचु—र्गतिं पंचापि पंचमीं ॥ ५१ ॥ यन्नागदत्तस्य मुनेर-
नेकदा—श्रतोऽपि तेषां च तपस्यतामपि ॥ इयान् विशेषः किल केवलश्रिया । चक्रे तदेत
त्प्रशमस्य जृंभितं ॥ ५२ ॥ इत्युपदेशचिंतामणौ कषायजये नागदत्तमुनिकथा. ॥

तदेवमुक्तः कषायनिग्रहरूपः संयम. अथ पंचेंद्रियनिग्रहरूपं तं प्रस्तावयन्नाह—

॥ मूलम् ॥—अकसाइत्तं इच्छइ । जइ ता कुण इंदियाण निग्गहणं ॥ मुत्तूण रागदोसे ॥ पंचसु सद्दाइविसएसु ॥ ६७ ॥ व्याख्या—हे चारित्रिन्! यदि त्वमकषायत्वमिच्छसि, तदा कुरु इंद्रियाणां श्रोत्रनेत्रजिह्वाघ्राणस्पर्शानां निग्रहं. कथमित्याह—पंचसु शब्दादिषु शब्दरूपरसगंधस्पर्शेषु तद्विषयेषु रागद्वेषौ मुक्त्वा. अयं भावः—यदा वेणुवीणावनितावि

लयादीनां शुभं, काककुररघूकेघरट्टादीनां त्वशुभं शब्दमाकर्ण्य, विभूषितहयहस्तिहरिणा-
क्षीणां शुभं, वृद्धकुष्ठिकुणपादीनां त्वशुभं रूपं निरीक्ष्य; कर्पूरागुरुचंदनादीनां शुभं, मलमू-
त्रमृतगात्रादीनां त्वशुभं गंधमाघ्राय, मधुमत्स्यंडीमोदकादीनां शुभं, रूक्षपर्युषितान्नक्षारज-
लादीनां त्वशुभं रसमास्वाद्य, तरुणीतूलिकादुकूलादीनां शुभं, दृषत्कंटककर्करादीनां त्वशु-
भं स्पर्शमनुभूयेष्टमेतन्ममेति रागः; अनिष्टमेतन्ममेति द्वेषश्च नोपजायते, तदा क्रमेण श्रो-
त्रादींद्रियनिग्रहो भवति. एतेषु निगृहीतेषु कषाया निग्रहीता एव, तन्मूलत्वात्कषायाणां.
तथाहि—अनिष्टेंद्रियार्थेषु गोचरं गतेषु क्रोधः, प्राप्तसर्वेंद्रियसुखस्य च नान्यो मत्तः सु-
खीत्यभिमानः, इंद्रियार्थसाधनस्य धनस्य वार्जनाय मायालोभौ प्रादुर्भवतः. जितेंद्रियस्य
च निर्हेतुकत्वात्कथं नाम क्रोधादयः प्रवर्तेरन्? ततः कषायजयमिच्छता पूर्वमिंद्रियजयः का-
र्य इति तत्वं. ॥ ६७ ॥ अथेंद्रियजयस्य दुष्करत्वमाह—

॥ मूलम् ॥—हणइ रणंमि अरिणो । अरिणसेणंपि दुक्खलक्खेण जओ ॥ पिंभत्थे-पंच-
रिंज । निहणेउं सोवि किवुव ॥ ६८ ॥ व्याख्या—कश्चिन्नटो नीमनागर्वादिर्हरिशिखरिशि-

खरानुकारिकरिनिकरा- जलाधकल्लोलोलरंगत्तुरंगसंयता; चंचत्प्रासादवर्तिमपृथुलरथसम-
र्दनुःसंचरा, निजबलसमुद्बलत्सुभटकोटिकोलाहलवाचालितसकलदिग्वलया, निशितेतरवा-
रिपरिघपट्टिशप्रमुखप्रहरणप्रस्थापितपरप्राणामरीणां सेनामपि भुजबलेनारीणोऽखिन्नःसन् हं-
ति, सोऽपि पिंजस्थान् पंचरिपूनिंद्रियलक्षणान्निहंतुं क्लीबः कातर इव चेष्टते. ॥ ६८ ॥ अ-
थेंद्रियनिग्रहोपायमाह—

॥ मूलम् ॥—सव्वत्थ अहयदप्पा । इंदियसप्पा न तं परिज्जवंति ॥ हिययम्मि जस्स
जग्गइ । इय अणुसिट्ठिमहामंतो ॥ ६९ ॥ व्याख्या—सुगमा, तामेवानुशिष्टिमाह—

॥ मूलम् ॥—परिमियमाउ जुव्वण—मसंठियं वाहिवाहियं देहं ॥ परिणइविरसा वि-
संया । अणुरज्जसि तेसु किं जीव ॥ ७० ॥ व्याख्या—यदा कस्यचित्साधोर्भुक्तभोगस्य पूर्व-
क्रीडितस्मरणादिना, इतरस्य च कुतूहलीतया इंद्रियाण्युत्खलीभवंति; तदा स एवमात्मा-
नमनुशास्ति, गाथार्थः सुगम एव. ॥ ७० ॥ विषयाणां वैरस्यमेव भावयति—

॥ मूलम् ॥—धम्मधणवहारिणं । अणेगभवदुक्खकारिणं ॥ विसयाण अरीणंपि-

व०। को मज्झं देइ अवयासं ॥ ७१ ॥ व्याख्या—स्पष्टा, न वरं, अवयासंति 'अवकाशं' ॥ ॥ ७१ ॥ अथ पूर्वानुभूतदिव्यसुखस्मरणं हि करुणेपु (तुच्छेपु) मनुष्यभोगेषु वैराग्यं जनय-नीति तद्व्याख्यानमाह—

॥ मूलम् ॥—बहुलरूवणो तरुणो । चिरागउं सह मणाणुकूलाए ॥ भुंजंतो पंचविस-ए । जुंजंतो जं लहइ सुक्खं ॥ ७२ ॥ तो वंतराण सुक्खं । णंतगुणं भवणवासिणं तत्तो ॥ तो जोइसाण वेमा-णियाण कमणो अणंतगुणं ॥ ७३ ॥ व्याख्या—इह मनुष्यलोके तरुणो युवा पंच विषयान् शब्दादीन् भुंजानो यत्सौख्यं लभते, तरुणस्याप्येकाकिनो न तादृग्मनोविनोदः स्यादित्याह—भार्यया, सापि यदि अयोग्या, तदा कुतो रतिरित्याह—मनोऽनुकूलया, तस्यापि दारिद्र्ये क्व सौख्यमित्याह—लब्धधनः, एवंविधोऽपि सततं गृहावस्थायितया न तादृग्मान्यः स्यादित्याह—चिरागतः. अयं भावः—कश्चिद्युवा देशांतरे षोडश वर्षाणि स्थित्वा तत्रोपार्जितप्रभूतद्रव्यः स्वस्थानमायातः स्नातः सरससदृशभक्ष्यभोजनजनिततृप्तिः सकुमारस्पर्शशयनीये कमनीयकलत्रसंतर्पितसंतान

कामोपचारचतुरया, वयोवेषवचनविज्ञासादिगुणग्रामसमन्वया. सरागसंगतभावशृंगारया, चिरमिलनोत्कंठासंवर्धितस्नेहग्रहिलया महिलया सह स्वेच्छया पंचविधान् विषयानुपभुंजानो यत्सौख्यमनुभवति, ततस्तस्मात् सौख्याद्विविधं अल्पर्द्धिकमहर्द्धिकादिकमंतरं येषां ते व्यंतराः पिशाचादयस्तेषां सौख्यमनंतगुणं. ततस्तस्माद्व्यंतरसौख्याज्जवनेषु बहिर्वृत्तिष्वंतश्चतुरस्रेष्वधः पुष्करकर्णिकासंस्थानेषु वसंतीत्येवंशीला जवनवासिनो नागकुमारादयोऽसुरकुमाराणां प्रायेणावासेष्ववस्थानात्. आवासाश्च कायमानस्थानीया महामंडपास्तेषां सौख्यमनंतगुणं. ततोऽसुरकुमाराणां सौख्यमनंतगुणमित्यनुक्तमपि बोधव्यं. ततो द्योतयंति स्वशिरोमुकुटाग्रवर्तिभिः स्वमंडलकल्पैश्चंद्रादिचिह्नैर्जगदीति ज्योतिषश्चंद्रादयः, तेषां सौख्यमनंतगुणं, तस्माज्ज्योतिःसौख्याद्विविधं मन्यंते भुज्यंते पुण्यवद्भिरिति विमानानि. तेषु भवा वैमानिकाः कल्पोपपन्नादयस्तेषां सौख्यमनंतगुणं चंद्रप्रज्ञप्त्याद्यागमेषु प्रतिपादितं, तच्च त्वया हे आत्मन्ननंतशोऽनुभूतं. यदागमः—सोहम्मीसाणेसुणं कप्पेसु सव्वे पाणा, सव्वे भूया, सव्वे जीवा; सव्वे सत्ता पुढविकाइयत्ताए जाव वणस्सइकाइयत्ताए देवत्ताए देवित्ताए. आसणसयणजा

णत्तंमोवगरणत्ताए उववज्जपुव्वा, हंता गोयमा! असइं अदुवा अणंतखुत्तो सेसेसु कप्पेसु, एवं चेव नवरं नो चेवणं देवित्ताए जाव गेविज्जगा अणुत्तरोववाइएसुवि, एवं चेव नो चेवणं देवत्ताए देवित्ताएत्ति. ॥ ७३ ॥ ततश्च—

॥ मूलम् ॥—जाइतिएहिं दिवेहिं । तुह न जोगेहि पसमिया तिह्मा॥ सा कह समिद्धी माणु—सएहिं तुच्छेहिं कलुणेहिं ॥ ७४ ॥ व्याख्या—सुगमा, न वरं तुच्छैः क्षणिकत्वादद्यैः, करुणैर्मानुष्यशरीरिणां मलमूत्रादिमयत्वाज्जुगुप्सनीयैः, उक्तं च स्थानांगे—सिंगारा कामा देवाणं, कलुसा कामा मणुस्साणं, बीभच्छा कामा तिरिक्खजोणीयाणं, रुद्दा कामा नेरइयाणं. सूक्तं चात्र, किंच—

॥ मूलम् ॥—विसएसु सुहं पिच्छसि । न उ नरयं जीव कंकरीउव ॥ जह मुच्छाए म्हो। पिच्छइ मंसं न उण वडिसं ॥ ७५ ॥ व्याख्या—सुगमा, नवरं वडिशं मत्स्यबंधनं गलिकेति प्रसिद्धं. ॥ ७५ ॥ कंकरीककथानकं यथा कंकरीककथा—

* [illegible] ॥ [illegible] कथानके ॥ [illegible] ।

भूत् ॥ १ ॥ तत्रोद्याने सुभूजागे । वर्द्धमानो जिनेश्वरः ॥ अन्यदा पुण्यदानाय । सोद्भासः समवासरत् ॥ २ ॥ प्रज्ञोर्वक्रियामृतैः शांत-नवतापः क्षमापतिः ॥ महासालेऽनुजे राज्य— श्रियं साल्लो न्यधित्सत ॥ ३ ॥ उक्के संयमराज्याय । तस्मिन् राज्यमगृह्णति ॥ आह्वयामास कांपिल्या-ज्झागिनेयं स गागलिं ॥ ४ ॥ तस्मै प्रदत्तराज्योऽथ । श्रीवीरचरणांतिके ॥ प्राव्राजीत्सानुजन्मासौ । साध्वाचारमबुद्ध च ॥ ५ ॥ अन्यदा मगधदेशा-ज्जठंश्चंपापुरींप्रति ॥ तांच्यां व्यज्ञप्यत स्वीय—ज्ञातीन् वंदयितुं जिनः ॥ ६ ॥ श्रीगौतमं पुरस्कृत्य । जगदीशनिदेशतः ॥ जग्मतुः पृष्टचंपां तौ । महर्षी हर्षशालिनौ ॥ ७ ॥ समं मात्रा यशोमत्या । पित्रा पितृव्यजेन ॥ गागलिः सपरिवारं । ववंदे गौतमं गुरुं ॥ ८ ॥ श्रीगौतमस्वेर्गोत्रि-त्रोधितापचित्तपंकजात् ॥ नवाशाभ्रमरी तेषां । त्रयाणामपि निर्ययौ ॥ ९ ॥ पुत्रप्रदत्तराज्यश्रीः । पितृव्यां सह दुर्वहां ॥ महाव्रतधुरां वोढुं । नाजवज्झागलिर्गलिः ॥ १० ॥ कलभैरिव यूथेशः । पंचभिस्तैः समन्वितः ॥ कृतकृत्यस्ततो नंतु । श्रीवीरं गौतमोऽचलत् ॥ ११ ॥ धन्या वयमर्मी येषां । संपन्नो गुरुरीदृशः ॥ इति भावनया प्राप्तु-र्ज्ञानं ते पंच-पंचमं ॥ १२ ॥ न गंजी-

रा गुरुमपि । स्वं ते ज्ञानमजिज्ञपन् ॥ रहो लब्धं निधानं हि । प्रकाशयति कः सुधीः ॥१३॥ प्राप्ताः समवसरणं । ते सुरासुरपूजितं ॥ प्रभुं प्रदक्षिणीचक्रु-र्नयज्ञा गुरुणा सह ॥ १४ ॥ ते स्वामिनमनत्वैवा-सीनाः केवलिपर्षदि ॥ नैते नीतिं विदंतीति । गौतमेन वितर्किताः ॥ १५ ॥ जगौ च गौतमो ज्ञान-हीनानां च तपोधनाः ॥ न निःस्वानामिवाढ्येषु । युक्ता केवलिषु स्थितिः ॥ १६ ॥ जगदे जगदीशेन । गौतमो गोतमोत्तिदा ॥ व्याशातयसि किं वत्स । केव-लज्ञानिनो ह्यमून् ॥ १७ ॥ शिष्याणां केवलं श्रुत्वा । चिखिदे यत्नणाग्रणीः ॥ तद्युक्तं स्वस्व-युक्तेन । जनः सर्वोऽपि तृप्यति ॥ १८ ॥ ज्ञानं प्रापुरमी राज्य-च्युतः स्वल्पदिनव्रताः ॥ चि-रव्रतोऽपि नाहं तु । विममर्शेति गौतमः ॥ १९ ॥ सज्ञायामादिदेशाथ । नाथस्तस्य समाधये ॥ भूचरोऽष्टापदं गंता । यः स तच्चक्रसिञ्जिनाक् ॥ २० ॥ तत् श्रुत्वा गौतमो व्योम्ना-ऽचा-लीदष्टापदंप्रति ॥ लूतातंतून् करे धृत्वा । दिनकृत्करपद्य या ॥ २१ ॥ श्रुतश्चाष्टापदोपांते । संति काननवासिनः ॥ कोडिन्यदत्तशैवाल-नामानस्तापसाश्रयः ॥ २२ ॥ एकद्वित्र्युपवासा-[illegible]-स्तपस्तेषां यथाक्रमं ॥ पारणं च फलैः शुष्क-दलैर्नीरसशैवलैः ॥ २३ ॥ तापसानां श्र-

तान्येकैकस्य पंच परिछदे ॥ शुश्रुवुस्तेऽपि देवेभ्यो । व्योम्न तद्भारजापत ॥ २४ ॥ शक्र
निजामजानाना-स्त्रयस्ते मोक्षकांक्षिणः ॥ तं तुंगशृंगमारोढु-मारजंत गिरीश्वरं ॥ २५ ॥ ए-
कद्वित्रिषु सोपाने-ष्वारूढानां तपोबलात् ॥ तेषां शक्तिः क्रमात् क्षीणा । स्वदृष्टैवेव दी-
पिका ॥ २६ ॥ तत्र स्थित्वा गुणस्तोम-हारिणां व्योमचारिणां ॥ ते श्रीगौतममालोक्या—
लोचयांचक्रिरे मिथः ॥ २७ ॥ एष स्थूलः कथं तूल-लीलया प्लवतेंबरे ॥ यदिवा त्रुटिते श-
क्ति—रनेन तपसैव नः ॥ २८ ॥ अमुमेव गुरुं कुर्मो । येन सिद्धिं लभामहे ॥ एवं प्रजल्प-
तां तेषा-मारुरोह गिरिं गुरुः ॥ २९ ॥ त्रिगव्यूतोन्नये तत्र । चैत्ये भरतकारिते ॥ इंद्रभू-
तिरवंदिष्ट । चतुर्विंशतिमर्हतां ॥ ३० ॥ अशोकपादपस्याधो । दिश्यैशान्यां जिनौकसः ॥
शिलापट्टे विशश्राम । स्वामी तीर्थोपवासकृत् ॥ ३१ ॥ तदा तत्रागतः श्रीदः । सह सामानि-
कैः सुरैः ॥ जिनपूजां तनोतिस्म । भक्त्या शक्त्या च पूर्णया ॥ ३२ ॥ अष्टापदं समारूढं ।
जीवंतं साधुकुंजरं ॥ तं निरीक्ष्य दधच्चित्रं । व्यमृशन्नरवाहनः ॥ ३३ ॥ जिनयात्रार्थमेताना-
मत्र श्रीगौतमेक्षणात् ॥ बभूव द्विगुणो लाभो । व्यवसायं विनापि नः ॥ ३४ ॥ वंदित्वा धन-

रा गुरुमपि । स्वं ते ज्ञानमजिज्ञपन् ॥ रहो सद्भं निधानं हि । प्रकाशयति कः सुधीः ॥१३॥ प्राप्ताः समवसरणं । ते सुरासुरपूजितं ॥ प्रभुं प्रदक्षिणीचक्रु-र्नयज्ञा गुरुणा सह ॥ १४ ॥ ते स्वामिनमनत्वैवा-सीनाः केवलिपर्षदि ॥ नैते नीतिं विदंतीति । गौतमेन वितर्किताः ॥ १५ ॥ जगौ च गौतमो ज्ञान-हीनानां च तपोधनाः ॥ न निःस्वानामिवाढ्येषु । युक्ता केवलिषु स्थितिः ॥ १६ ॥ जगदे जगदीशेन । गौतमो गोतमोनिदा ॥ श्याशातयसि किं वत्स । केव-लज्ञानिनो ह्यमून् ॥ १७ ॥ शिष्याणां केवलं श्रुत्वा । चिखिदे यज्ञणाग्रणीः ॥ तद्युक्तं स्वस्व-सुकृतैः । जनः सर्वोऽपि तृप्यति ॥ १८ ॥ ज्ञानं प्रापुरमी राज्य-भुजः स्वदृपदिनम्रताः ॥ चि-रव्रतोऽपि नाहं तु । विममर्शेति गौतमः ॥ १९ ॥ सज्ञायामादिदेशाथ । नाथस्तस्य समाधये ॥ भूचरोऽष्टापदं गंता । यः स तज्ज्ञवसिद्धिभाक् ॥ २० ॥ तत् श्रुत्वा गौतमो व्योम्ना-ऽचा-लीदष्टापदंप्रति ॥ लूतातंतून् करे धृत्वा । दिनकृत्करपद्य या ॥ २१ ॥ इतश्चाष्टापदोपांते । संति काननवासिनः ॥ कौडिन्यदत्तशेवाल-नामानस्तापसाश्रयः ॥ २२ ॥ एकद्वित्र्युपवासा-

तान्येकैकस्य पंच परिछदे ॥ शुश्रुवुस्तेऽपि देवेभ्या । व्याप्ति तद्धीरजायितं ॥ २४ ॥ शक्ति
निजामजानाना-स्वयस्ते मोक्षकांक्षिणः ॥ तं तुंगशृंगमारोढु-मारचंत गिरीश्वरं ॥ २५ ॥ ए-
कद्वित्रिषु सोपाने-ष्वारूढानां तपोबलात् ॥ तेषां शक्तिः क्रमात् क्षीणा । स्वल्पतैलेव दी-
पिका ॥ २६ ॥ तत्र स्थित्वा गुणस्तोम-हारिणां व्योमचारिणां ॥ ते श्रीगौतममालोक्या—
लोचयांचक्रिरे मिथः ॥ २७ ॥ एष स्थूलः कथं तूल-लीलया प्लवतेंवरे ॥ यदिवा त्रुटिते श-
क्ति—रनेन तपसैव नः ॥ २८ ॥ अमुमेव गुरुं कुर्मो । येन सिद्धिं लभामहे ॥ एवं प्रजल्प-
तां तेषा-मारुरोह गिरिं गुरुः ॥ २९ ॥ त्रिगव्यूतोन्नये तत्र । चैत्ये भरतकारिते ॥ इंद्रभू-
तिरवंदिष्ट । चतुर्विंशतिमर्हतां ॥ ३० ॥ अशोकपादपस्याधो । दिश्यैशान्यां जिनौकसः ॥
शिलापट्टे विशश्राम । स्वामी तीर्थोपवासकृत् ॥ ३१ ॥ तदा तत्रागतः श्रीदः । सह सामानि-
कैः सुरैः ॥ जिनपूजां तनोतिस्म । भक्त्या शक्त्या च पूर्णया ॥ ३२ ॥ अष्टापदं समारूढं ।
जीवंतं साधुकुंजरं ॥ तं निरीक्ष्य दधच्चित्रं । व्यमृशन्नरवाहनः ॥ ३३ ॥ जिनयात्रार्थमेताना-
मत्र श्रीगौतमेक्षणात् ॥ बभूव द्विगुणो लाभो । व्यवसायं विनापि नः ॥ ३४ ॥ वंदित्वा धन-

वां ॥ कयाचिच्चिंतया यद्वा। जगवन् दृश्यते कृशः ॥५६॥ गुरवोऽथ जगुर्नित्यं । तपः कुर्यं महात्मभिः ॥ कथं तार्यो भवांभोधि-रिति चिंतापि शाश्वती ॥५७॥ पुनरस्य कृपे रोगै-र्जग्रसे प्रासुकाशिनः ॥ निरौषधं वपुर्गेह-मनाथमिव तस्करैः ॥ ५८ ॥ पितृप्रायो यतिजन-स्याज्यधाऽसुधाधवः ॥ उपेक्ष्यते प्रजोवह्नि-स्फुलिंग इव नामयः ॥ ५९ ॥ तपस्तावज्जपस्ताव-त्ता-वद्धर्मो गुणा अपि ॥ यावत्पतति नात्मायं । दुःसाध्यव्याधिसंकटे ॥ ६० ॥ धर्मः स्यादक्षते देहे । रक्ष्यते तेन तद्बुधैः ॥ तदादिशत येनैवं । साधुमुल्लाघयाम्यहं ॥ ६१ ॥ कंगरीकमथादिक्षद् । गुरुराजः सगौरवं ॥ चिकित्स्यं वपुः साधो । बंधोराशां च पूरय ॥ ६२ ॥ गुर्वाज्ञया समं ज्ञात्रा । गतोन्तर्नगरं मुनिः ॥ अंतिके राजसौधस्य । तस्थौ सद्मनि पुष्कले ॥ ॥ ६३ ॥ अगदैरगदंकारा । आदिष्टा अवनीभुजा ॥ तं लघूल्लांघयांचक्रु-र्गुरवश्चान्यतो ययुः ॥ ६४ ॥ अंतरांतःपुरं तस्य-ह्रदयग्रहणलंपटः ॥ पुष्टो बभूव देहेन । प्रमादेन च स क्रमात् ॥ ६५ ॥ सातगौरवतः क्षीणा-मपि ग्लानिमियेष सः ॥ स्थानवासाय मिष्टान्ना-शनाय प्रतिमूर्छि सा ॥ ६६ ॥ वचःप्रेषणे राज्ञा । प्रेरितोऽपि गुरून् प्रति ॥ वार्तामपि विदुरस्य । अ-

दधौ गलिवन्न सः ॥ ६७ ॥ तमथो पृथिवीनाथो । बलेनापि व्यहारयत् ॥ श्रावका अंकुशा-
यंते । यतीनां हि प्रमादिनां ॥ ६८ ॥ आसाद्य कंचन ग्रामं-माश्रितः स्थपुटां कुटीं ॥ लेने
पर्युषितं रूक्षं । नैक्षं निष्काक्षणे मुनिः ॥ ६९ ॥ प्रजावतीरसवंती-रसग्रंसनलालसः ॥ इक्षु-
कीट इवारिष्टे । नक्ते तस्मिन्न सोऽतुषत् ॥ ७० ॥ स दध्यिवान् क तत्सौधं । सस्नेहाः श्रा-
द्धिकाः क ताः ॥ क सा रसवती सर्वं । दुष्टदैवेन दूरितं ॥ ७१ ॥ यस्मादिह नवे कष्टं । किं
परत्र सुखं ततः ॥ विद्वांसोऽपीति किं तत्र । व्रते रज्यंति जंतवः ॥ ७२ ॥ अलं व्रतेन राज्यां-
श-मादास्येऽहं पुनर्निजं ॥ इति निश्चित्य स व्याघ्रो । ववल्गे कवलेच्छया ॥ ७३ ॥ प्रातः पुर्या
उपवनं । वनपालेन भूपतिं ॥ स्वागमं ज्ञापयामास । कंरुरीकः स निस्त्रपः ॥ ७४ ॥ वज्रपात-
मिव श्रुत्वा । चंद्रोराकस्मिकागमं ॥ तमभ्यगान्नृपः साकं । सचिवैः शुचिवेषभाक् ॥ ७५ ॥
उपधिं चौरवद् वृक्ष-शाखायामवलंबितं ॥ लुठंतं शाल्वले तं च । स लुलोके लुलायवत् ॥
॥ ७६ ॥ मन्येऽसौ सर्वथोत्तीर्ण-चेताश्चारित्रपर्वतात् ॥ स्तुत्यस्तयापि स्तुत्या हि । कदाचि-
द्भजते त्रपां ॥ ७७ ॥

॥ ९९९ ॥ संनिकृष्टादयो गोष्ठात् । प्रजुरेकं पतद्ग्रहं ॥ आनयत्पायसंनूतं । दुर्लभं तादृशां दि किं ॥ १०० ॥ कृष्णचित्र इव क्षिते । पात्रे तत्रेंद्रभूतिना ॥ स्वदक्षिणकरांगुष्टे । न पायसमदीयत ॥ १ ॥ शिष्यव्रातं कणेहत्या–ध्रुजुजडसुनूतिजः ॥ व्याधाच्च पारणं स्वेन । सावशेषेण तेन सः ॥ २ ॥ ध्यायँल्लब्धिं गुरोर्लब्ध्वा । शेषाज्ञः प्राप केवलं ॥ सत्यं ज्ञानकरो जज्ञे । स हि तस्य गणाधिपः ॥ ३ ॥ प्राकारपुष्पप्रकरा–दिकां वीरजिनेशितुः ॥ श्रियमालोक्य दत्तोऽपि । वने केवलसंविदा ॥ ४ ॥ लोकोत्तरस्फुरद्रूपं । साक्षाद्दीक्ष्य जगत्प्रभुं ॥ आनंच पंचमं ज्ञानं । कोऽन्यः सपरिछदः ॥ ५ ॥ प्रभुं प्रदक्षिणीकृत्य । यांतः केवलपर्षदं ॥ गौतमेन न्यषेध्यंत । ते सुवत्सलया धिया ॥ ६ ॥ दधानो वनवासित्वा–त्तेषु मुग्धमृगत्रमं ॥ सोऽज्ञाणि प्रभुणा वत्स । किं केवलिषु कुप्यसि ॥ ७ ॥ निशम्य केवलं तेषां । केवलं शोकमाबद्नन् ॥ वीरेणोचे स किं जैनी । वाक् तथ्या वितथायवा ॥ ८ ॥ तथ्या चेत्तर्हि किं धन्य । मन्निरं नानुमन्यसे ॥ व्याजामंतें भविष्याव–स्तुल्यांविति पुरातनीं ॥ ९ ॥ चतुर्धाः स्युः

मम ते ज्ञान-मिति वीरगिरा गुरुः ॥ गातमोऽमोदत श्रोक्त-मेतत्सर्वं प्रसंगतः ॥११॥ इतोद्दु
ष्टायति कंकरीक-राजस्य सम्यक् चरितं निशम्य ॥ चिराय चारित्रमवाप्य चारु । को या-
ति मोहं विषयेषु विद्वान् ॥ १२ ॥ इत्युपदेशचिंतामणिटीकायां कंकरीककथा. ॥

तदेवं विषयगृद्धानां नरकनिपातं निध्यायाथ विशेषवैराग्याय तदुःखानि विभावयति-

॥ मूलम् ॥—सव्वो पुग्गलकाउं । सव्वं जलनिहिजलं च संमिलियं ॥ न हु नारयाण
सक्कइ । खुहं पिवासं उवसमेउं ॥ ७६ ॥ व्याख्या—सर्वस्त्रैलोक्योदरविवरवर्ती घटपटभवन-
वनादिपरिणामेन परिणतोऽपरिणतो वा पुद्गलकायो मूर्तद्रव्यराशिः संमिलितः समुदितः,
तथा सर्वमसंख्येयानां जलनिधीनां जलं च संमिलितं, नैव नारकाणां क्षुधां पिपासां चो-
पशमयितुं शक्नोति. अयं भावः—यदि कदाचिदतरकल्पनया नारकाः सर्वं पुद्गलकायं, स-
र्वं च जलं युगपदत्यवहरंति, तथापि तेषां क्षुत्तृष्णे न शाम्यतः. एवं नाम ते नित्यं क्षुधि-
तास्तृषिताश्च वर्तंते, इति. उक्तं च जीवाभिगमे—इमीसेणं भंते रयणप्पभाए पुढवीए नेरइ-
या केरिसं खुहं पिवासं पच्चणुभवमाणा विहरंति? गोयमा! एगमेगस्सणं रयणप्पभापुढवी-

नेरइयस्स असप्पावपट्ठवणाए सव्वोदही वा सव्वपुग्गले वा आसगंसि पक्खिविज्जा, नो चेव णं से रयणप्पभाए पुढवीए नेरइए तित्तेवासिया वितत्तेवासिया परिसयणं गोयमा! रयणप्पभाए पुढवीए नेरइया खुहं पिवासं पच्चणुब्भवमाणा विहरंति. एवं जाव अहे सत्तमाए त्ति. ॥ ७६ ॥ अन्यच्च—

॥ मूलम् ॥–जे उण्हवेइया तत्थ। ते य इहं लोहगारअगणिमि ॥ खित्ता चंदणसित्ताव। तावमणिंति सव्वंपि ॥ ७७ ॥ व्याख्या—तत्र तेषु नरकेषु ये नैरयिका उष्णवेदकाः संति, तत्राद्ये नरकत्रये सर्वेषु नरकावासेषु, चतुर्थे च भूयस्सु नरकावासेषु, पंचमे च स्वल्पेषु तेषु नैरयिकाः शीतयोनावुत्पद्य मुहूर्तात्परत उष्णक्षेत्रं संक्रांता उष्णां वेदनां वेदयंति. ते उष्णवेदना नारका असत्कल्पनया तत उद्धृत्य इह मनुष्यलोके लोहकाराणां, उपलक्षणात् कांस्यकृतादीनां चाग्नौ क्षिप्यंते, क्षिप्ताः संतस्तत्क्षणाच्चंदनक्षिप्ता इव, उपलक्षणात् कदलीदलवीज्यमाना इव सर्वमपि प्राक्तनं तापमपनयंति, एवं नाम तत्र नैरुष्णवेदना अनुभूयंते, वाजिगमे—असप्पावपट्ठवणया उसिणवेयणिज्जेहिंतो नरएहिंतो नेरइए उववज्जिए

समाणे जाइं इमाइं मणुस्सलोए भवंति अव्वारियाइं
वा कवेल्लागराणि वा जाव जंतवाकचुल्ली वा, तत्ताइं समजोईभूयाइं फुल्लकिंसुयमाणाइं जा-
सासहस्साइं पमुच्चमाणाइं अंतो हूहूयमाणाइं चिट्ठंति ताइं पासइ पासइ ताइं उग्गहइ उ-
ग्गहइ, सेणं तत्थ उण्हंपि पविणिज्जा, तण्हंपि खुहंपि जरंपि दाहंपि पविणिज्जा निवाइज्ज
वा पयलाइज्ज वा सइं वा धिइं वा रइं वा मइं वा उवलभिज्जा सीए सीयभूए सायासुख-
वडुलेयावि विहरिज्जत्ति ॥ ७७ ॥ तथा—

॥ मूलम् ॥—जेसीयनारया ते। इह हिमकुंभम्मि माहयणीए ॥ सुत्ता निवायगि-
हिव। सीयमवणिंति तक्कालं ॥ ७८ ॥ व्याख्या—इह चतुर्थ्यां नरकपृथ्व्यां खल्वेषु, पंच-
म्यां च प्रभृतेषु अधस्तन्योर्नरकपृथ्व्योः सर्वेष्वपि नरकावासेषु नारका उष्णयोनावुत्पद्य मु-
हूर्तात्परतः शीतक्षेत्रं संक्रांताः शीतवेदनां वेदयंति. ते शीतवेदका नारकास्तत उद्धृत्यास-
त्कल्पनया इह मनुष्यलोके माघमासस्य रजन्यां रात्रौ हिमकुंडे स्थाप्यंते, ततस्ते तत्र स-
न्निहितज्वलल्लोहशकटीके दत्तकपाटसंपुटे निर्वातगृह इव सुतास्तत्कालं शीतमपनयंति. उ-

कं च तत्रैव—गोयमा! असन्नावपहवणाए सीयवेयणेहिं तो नेरइएहिंतो नेरइए उववट्टिए समाणे जाइं इमाइं इह मणुस्सलोए भवंति, तं जहा–हिमाणि वा, हिमपुंजाणि वा, हिमपडलाणि वा; हिमकुंडानि वा, ताइं पासइ पासइ ताइं उग्गहइ उग्गहइ. से णं तत्थ सीएणं पविणिज्जा, खुहंपि पविणिज्जा, जाव उसिणे उसिणभूए सायासुखबहुलेयावि विहरिजत्ति. ॥ ७८ ॥ अथोपसंहारमाह—

॥ मूलम् ॥—किं बहुणा अवरकयं । खित्तभवं नारयाण जं दुक्खं ॥ तं जाणंतोवि जिणो । न सक्कए कहिउमन्नस्स ॥ ७९ ॥ व्याख्या—किं बहुनोक्तेन? स्वल्पाक्षरैरेव तावद्भवभ.. नारकाणामपरैः परमाधार्मिकैः प्राग्भवबैरिभिर्देवनारकादिभिर्वा कृतं अपरकृतं, तथा क्षेत्रानुभावाद्भवतीति क्षेत्रभवं च यद्दुःखं, तत्रापरकृतं कुंभीपचनभ्राष्ट्रभर्जनवैतरण्यवतरणासिपत्रवननयनसर्वलोहरथवाहगृध्रपक्षिभक्षणव्योमोल्लालनत्रिशूलवेधनोष्णवालुकालोलनकरचरणकर्त्तनपट्टिशविदारणविरूपत्रापणादिकं, क्षेत्रभवं तु क्षणमपि दुर्गंधायां, कुद्दूरा-

नित्यक्षुधित्वं, अनिष्टाहारोच्छ्वासत्वं च. तत्र क्षेत्रजन्य सप्तस्वपि नरकपृथ्वीष्वपरस्प
मेव यावदत्र परस्परकृता वेदना, तत्त्वतः परकृतैवेति न पृथगभिहिता. तत्तेषां दुःखं जिनः
केवली सर्वज्ञतया जानन्नप्यन्यस्य कथयितुं न शक्नोति. आयुषः परिमितत्वाद्वाचः क्रमव-
र्तित्वाच्च. ततो यदि जिनोऽपि वक्तुं न शक्तस्ततः कथमस्माद्दक्षैस्तदुच्येतेति गाथार्थः ॥७९॥

अथ प्रकृतमाह—

॥ मूलम् ॥—इय चिंतंतो नारय-दुहाइं तक्कारणेसु विसएसु ॥ अणुरायमबंधंतो । जि-
इंदिओ नणु मुणि होइ ॥ ८० ॥ व्याख्या—उत्तानार्था. तदेवमुक्त इंद्रियजयरूपः संयमः,
संप्रति गुप्तित्रयात्मकं तं विवक्षुराह—

॥ मूलम् ॥—मणवयणकायजोगा । सुसंवुडा तिन्नि हुंति गुत्तीओ ॥ दिंति किर दु-
प्पउत्ता । एए दुक्कोहमक्कोहं ॥ ८२ ॥ व्याख्या—युज्यंते इति योगा मनोवचनकायलक्ष-
णाः, सुष्ठु आगमोक्तविधिना संवृत्ता अकुशलकर्मबन्धो निवर्तिताः कुशलकर्मणि प्रवर्तिता इ-
त्यर्थः, त्रयो गुप्तयो भवंति. तत्र मनसः सुसंवृतत्वं मनोगुप्तिः, वचनस्य सुसंवृतत्वं वचनगु-

तिः, कायस्य सुसंवृतत्वं कायगुप्तिरिति. असंवृतत्वे प्रत्यपायमाह—किलेत्यागमोक्तौ, एते योगा दुःप्रयुक्ताः संतोऽक्षोभं दुर्निरोधं दुःखौघं ददाति. ॥ ८२ ॥ तत्र पूर्वं मनोगुप्तिमभिधित्सुर्मनसः प्राधान्यमाह—

॥ मूलम् ॥—कम्माण बंधमुक्को । जं भणुयत्तंति मणपरीणामं ॥ तम्हा मणजोगुच्चिय । गुरुउ तिएहंपि जोगाणं ॥ ८१ ॥ व्याख्या—यद्यस्मात्कारणादष्टानामपि कर्मणां बंधमोक्षौ अन्वयव्यतिरेकाभ्यां मनस एव परीणाममनुवर्तते. तथाहि—मायाविनो दुष्टेन मनसा परस्य विश्वासनार्थं वचसामृतमपि किरतः, कायेन विनयादिकमप्याचरतोऽस्त्येव मायाप्रत्ययः कर्मबंधः. इतरस्य पुनः सुप्रणिहितमनसः सुनृतं वक्तुकामस्य सहसात्कारादिनाऽसत्यमपि वदतो दयापरिणतस्य च सहसात्कारादिना जीवमपि घ्नंतो नास्ति तत्प्रत्ययः कर्मबंधः. यदार्ष—उच्चालियंमि पाए । इरियासमियस्स संकमट्ठाए ॥ वावज्जेज्ज कुलिंगी । मरिज्जंतं जोगमासज्ज ॥ १ ॥ न उ तस्स तन्निमित्तो । बंधो सुहुमोवि देसिउ समए ॥ अणुवज्जो य पउंगेण । सव्वभावेण सो जम्हा ॥ २ ॥ तस्मान्मनोयोग एव त्रिष्वपि योगेषु

गुरुः प्रधानः. उक्तन्यायेन तस्यैव बंधमोक्षौ प्रत्यंगरंगत्वात्. वाक्काययोगयोस्तु गौणत्वादत एव सुस्थचित्तस्य विषयान् गृह्णतोऽपि नास्ति दोष इत्याह—॥ ८२ ॥

॥ मूलम् ॥—गिह्णंतु इंदियाइं । नियनियविसये न कोइ वारेइ ॥ जइ रागदोसकलुसि-य-मेयं चिय होइ नो चित्तं ॥ ८२ ॥ व्याख्या—स्पष्टा, अत्र श्लोकः—न शक्यं रूपमद्रष्टुं । चक्षुर्गोचरमागतं ॥ रागद्वेषौ तु यौ तत्र । तौ बुधः परिवर्जयेत् ॥ १ ॥ ८२ ॥ एतदेवाह—

॥ मूलम् ॥—जो तिव्वो कम्माणं । बंधो सो रागदोसनिम्माउ ॥ मायालोभो रागो । मच्छरमाणा भवे दोसो ॥ ८३ ॥ व्याख्या—इह प्रकृतिप्रदेशस्थित्यनुभागभेदाच्चतुर्धा कर्मणां बंधः, तत्र प्रकृतिबंधः कर्मणां ज्ञानावरणादिस्वभावापादनं (१). प्रदेशबंधः स्वात्मप्रदेशावगाढकर्मवर्गणांतर्गताऽभव्यानंतगुणसिद्धानंतगुणहीनपरमाणुनिष्पन्नानंतकर्मस्कंधग्रहणं (२.) स्थितिबंध. कर्मणामंतर्मुहूर्तादिसप्ततिसागरोपमकोटाकोटिपर्यंतस्थितिविधानं (३). अनुभागबंधः कर्मपरमाणूनां ग्रहणक्षण एव सुखदुःखविपाकहेतुमधुरकटुतिक्तादिरसत्वापादनरूपः (४). एषु यः कश्चित्तीव्रश्चिरस्थितिकतया कटुरसतया च दुःखविपाकहेतुर्दुरपोहश्च कर्मणां

बंधः, स रागद्वेषनिर्मितो रागद्वेषोपचये उपचीयते, तदपचये त्वपचीयते इत्यर्थः. यद्यपि मिथ्यात्वाविरतिकषाययोगाः सामान्येन बंधहेतवोऽभिहितास्तथापि स्थितिबंधेऽनुभागबंधे च मुख्यतया कषाया एव व्याप्रियंते, मिथ्यात्वादयस्तु तत्सहकारणानि भवंतीत्यवसुच्यते. यदागमः—जोगा पयडिपएसं णिइ अणुभागं कसायाउं कुणइत्ति. ननु यदि कषायाः कर्मणां स्थित्यनुभागबंधहेतवस्ततो रागद्वेषयोः किमायातमित्यत्रोच्यते. नैवं, रागद्वेषयोः कषायात्मकत्वात्. तथा चाह—मायेत्यादि, एषु कषायेषु यौ मायालोभौ तौ राग इति व्यपदिश्येते. यौ च मत्सरमानौ क्रोधाहंकारौ तौ द्वेष इति. अयं भावः—प्रीत्यप्रीती हि रागद्वेषयोर्लक्षणं, ततश्च लोभोऽभिष्वंगात्मकत्वात्प्रीतिरूपः, मायामपि किंचिदभिलषन् प्रयुंक्ते, अभिलाषश्च प्रीतिरूप इति, सापि प्रीत्यात्मिका. ततो मायालोभौ प्रीत्यात्मकत्वाद्रागः, तथा क्रोधोऽप्रीत्यात्मकः प्रतीत एव. मानोऽपि परगुणासहनत्वादप्रीत्यात्मकः. ततोऽप्रीत्यात्मकत्वादेतौ द्वावपि द्वेषः. एतत्संग्रहनयमतेनोक्तं. शेषनयविचारस्तत्र प्रज्ञापनावृत्तेरवसेयः. ततो रागद्वेषयोः कषायेभ्योऽभिन्नत्वात् कषायकृतौ कर्मणां

स्थित्यनुभागौ रागद्वेषकृतावपि प्रतिपत्तव्यौ. उक्तं च प्रज्ञापनायां-जीवाणं भंते नाणावर-
णिज्जं कम्मं कइहिं ठाणेहिं बंधंति? गोयमा! दोहिं ठाणेहिं, तं जहा-रागेण य दोसेणंय.
रागे दुविहे पन्नत्ते, तं जहा-माया य लोभे य. दोसे दुविहे पन्नत्ते, तं जहा-कोहे य
माणे य, इच्चेएहिं चउहिं ठाणेहिं वीरियउवग्गहिएहिं एवं खलु जीवा नाणावरणिज्जं क-
म्मं बंधंति. एवं दंसणावरणिज्जं जाव अंतरायं. ॥ ७३ ॥ अथ रागद्वेषाविभूतस्य मनसश्च-
पलाद्भुतमालोक्य विस्मित इव प्राह—

॥ मूलम् ॥—लंघई तरुणो गिरिणो य । लंघए लंघए जलनिहीवि ॥ जमइ सुरासुर-
ठाणे । एसो मणमक्कडो कोइ ॥ ७४ ॥ व्याख्या—एष मनोमर्कटः कोऽप्यपूर्वः, यतो मर्क-
टस्तरूनेव लंघते, मनश्च न केवलं तरूनेव लंघते, गिरींश्च मेर्वादीन् लंघते जलनिधीन् स-
मुद्रानपि लंघते, भ्राम्यति च सुरासुरस्थानयोः स्वर्गपातालयोः, ततोऽपूर्वमेवास्य किमपि का-
पेयमितीह सर्वेष्वपि वस्तुषु प्रायो मर्कटश्चपलतरो भवतीति तद्ग्रहणं ॥ ७५ ॥ अत एवे-
दं दुर्दममित्याह—

॥ मूलम् ॥-- जिप्पई सुहेण वयणं । जिप्पंति सुहेण कायचिट्ठाउ ॥ पण्ण ठुज्झेयं अ-
णगय । सुयसारस्सावि मणमिणमो ॥ ७५ ॥ व्याख्या—जीयते सुखेनानायासेन वचनं उ-
ष्टपुटमीलनेन स्वाध्यायादिना वा. कायचेष्टा अपि सुखेन जीयंते, आसनबंधेन वैयावृत्या-
दिव्यापृततया वा. पुनरिद साक्षादनुभूयमानं मनोगतश्रुतसारस्यापि परिशीलितप्रवचनं-
रहस्यस्यापि मुनेर्दुर्जेयं चपलत्वात्. ॥ ७५ ॥ ततस्तज्जयोपायमाह—

॥ मूलम् ॥—ता तस्स थिरीकरणठ-मायरो नावणासु कायवो ॥ ता अणुदाउ व-
णेगा । सुहाउ एवं दुयाइसहा ॥ ७६ ॥ व्याख्या—उत्तानार्था, ता एवमाह—

॥ मूलम् ॥—अधुवाऽसरणेगत्ता-वरत्तत्त असुइ आसवोवाए ॥ संवरनिज्जरधम्मे ।
लोगं बोहिं च जाविड ॥ ७७ ॥ व्याख्या—एषा द्वारगाथा व्यक्तार्था. ॥ ७७ ॥ तत्र पूर्व-
मधुवत्वभावनामाह—

॥ मूलम् ॥—सामित्तणधणजुवण-रूवरयणाउउड्ढसंजोगा ॥ अइलोला वणपवणा-रु-
यणवणयवफफसत्त ॥ ७८ ॥ व्याख्या—सुगमा. एवं समस्तनामानामध्रौव्यं नावगन् ध्रुवेत्यो

ज्ञानादिगुणेभ्य उद्यन्मनःसमाधिं प्राप्नुयात्. ॥ ८८ ॥ अथ अशरणत्वभावनामाह—

॥ मूलम् ॥—पिउभाउभयणिवज्जा-जमाण पच्चक्खमिक्कमाणाणं ॥ जीवं हरेइ म-
च्चू । पुण कोइ न होइ से सरणं ॥ ८९ ॥ व्याख्या—स्पष्टा. न वरं मृत्युरिह परभवायु-
रुदयः, न तु लोकप्रसिद्धो यम इति. एवं मरणाद्यापदि स्वमशरणं भावयन्नजरामरस्थान-
लाभाय यतते. ॥ ८९ ॥ अथैकत्वभावनामाह—

॥ मूलम् ॥—गमणं आगमणं जम्म-णं च इक्कस्स होइ जीवस्स ॥ इक्को सुही दुही
वा । इक्को चिय जाइ परमपयं ॥ ९० ॥ व्याख्या—उत्तानार्था, नवरं गमनं भवांतरंप्रति,
आगमनं च पूर्वभवात्. एवं वस्तुवृत्त्या स्वस्य सर्वत्रैकत्वं ध्यायन् धर्ममेवात्मनः सहायं कु-
र्यात्. ॥ ९० ॥ अथान्यत्वभावनामाह—

॥ मूलम् ॥—चिरलालियंपि देहं । जइ जियमंतंमि नाणुवट्टेइ ॥ ता तंपि होइ अन्नं ।
धणकणयाईण का वत्ता ॥ ९१ ॥ व्याख्या—पाठसिद्धा, नवरं "नाणुवट्टेइत्ति" नानुवर्तते
जीवं गच्छंतं नानुगच्छतीत्यर्थः. एवं तनुधनस्वजनादिष्वन्यत्वं ध्यायन्न तेषु तात्त्विकं स्नेहं

चिंतयात्. ॥ ९१ ॥ अथ जवंचावनामाह—

॥ मूलम् ॥—जोइमिगं मुंचंतो । अवरं जाइं तहंक गछंता ॥ नमइ चिरं अविरामे । नमरोवं जिउं जवारामे ॥ ९२ ॥ व्याख्या—व्यक्तार्था, नवरं जीवपक्षे जातिरेकेंद्रियादिकी, भ्रमरपक्षे जातिर्मालती, सा हि भ्रमस्य प्रायः प्रियातस्तद्ग्रहणं. उक्तं च—कलियामिसेण उ नेउं । अंगुलिं मालईइमहमहियं ॥ वारेइ जा समत्था । मइइंतं महुअरजीवाणं ॥ ॥१॥ एवं हि नवभ्रांतीर्नावयन् भ्रमणशीलस्तासु विरज्येत ॥९२॥ अथाशुचित्वचावनामाह—

॥ मूलम् ॥—मेयवसरेयमलमुत्त-पूरियं चम्मवेढियं तत्तो ॥ जंगममिव वच्चहरं । कद्दं एयं सुरूप देहं ॥ ९३ ॥ व्याख्या—सुबोधा, नवरं, मेदः शरीरस्थूलत्वापादकोऽस्थिकृद्धातुः वसा नलिकांतर्वर्ती स्नेहः. रेतो वीर्यं. एवं शरीरस्य नित्यमशुचित्वं चिंतयन् तत्पवित्रं व्यवहारमात्रेण कुर्वाणस्तात्त्विकये विद्युध्येज्जंतुरुद्यतेत्. ॥९३॥ अथाश्रवचावनामाह—

॥ मूलम् ॥—मिच्छत्ताविरइकसाय-जोगहेऊहिं हेउं. अणुरूवं ॥ जं कम्मपुग्गलाणं. । गहणं सो आरवो होइ ॥ ९४ ॥ व्याख्या—इहाश्रवस्य सामान्यतो मिथ्यात्वाविरतिकषा-

पंचयोगलक्षणाश्चत्वारो हेतवः; विस्तरतस्तु सप्तपंचाशत्. तथाऽनिग्रहिकान्नानिग्रहिकानिनिवे-
शिकसांशयिकानाभोगिकभेदात्पंचधा मिथ्यात्वं. षट्कायारंभान्मनइंद्रियासंयमाच्च द्वादश-
धाऽविरतिः. अनंतानुबंधिक्रोधादयः षोडश प्रागुक्ताः पुंस्त्रीनपुंसकभेदाद्भेदास्त्रयः. हास्यरत्यर-
तिशोकभयजुगुप्साश्चेति पंचविंशतिः कषायाः. सत्यासत्यसत्यामृषाऽसत्यामृषामनोवचनौदारि-
कौदारिकमिश्रवैक्रियवैक्रियमिश्राहारकाहारकमिश्रकार्मणभेदात्पंचदश योगाः. सर्वेऽप्यमी स-
प्तपंचाशदाश्रवहेतवः. पंचेंद्रियचतुष्कषायपंचाव्रतत्रियोगपंचविंशतिक्रियाभेदादमी द्विचत्वा-
रिंशदप्युच्यंते. एतैर्मिथ्यात्वादिभिर्हेतुभिर्हेत्वनुरूपं, हेतुप्राबल्ये प्रबलं. तद्दौर्बल्ये त्वल्पं य-
त्कर्मपुद्गलानां ग्रहणमादानं क्रियते, स आश्रवो भवति. एवमाश्रवद्वाराणां कर्मबंधहेतुतां
भावयंस्तत्पिधानाय यतेत. ॥ ९४ ॥ अथ संवरभावनामाह—

॥ मूलम् ॥ आसवहेउपिधानं । सम्मत्ताइहिं संवरो नेउ ॥ पिहियासवो हि जीवो ।
सुतरिव तरेइ भवजलाहिं ॥ ९५ ॥ व्याख्या—सम्यक्त्वमादिर्येषां विरतिप्रशमगुप्तीनां, तैः
सम्यक्त्वादिभिः प्रकारैर्यत्पूर्वोक्तानामाश्रवहेतूनां मिथ्यात्वादीनां पिधानं स्थगनं स संवरो

ङ्गयः. संवरस्य फलं साक्षादाह–पिहिताश्रवो हि जीवः सुतरीव तरति भवजलधिं, यथा तरी स्थगितजलप्रवेशद्वारा सुखं जलधिं तरतीति योगः. ॥ ९५ ॥ अथ निर्जराभावनामाह–

॥ मूलम् ॥—कम्माण पुराणाणं । निकंतणं निज्जरा दुवालसहा ॥ विरयाण सा स-कामा । तहा अकामा अविरयाणं ॥ ९६ ॥ व्याख्या—पुराणानां प्राग्बद्धानां कर्मणां तपसा निकर्त्तनं छेदनं निर्जरेत्युच्यते. बध्यमानकर्मविषयः संवरः प्राग्बद्धकर्मविषया च निर्जरेत्य-नयोर्भेदः. इयं च द्वादशधा. बाह्याभ्यंतरस्य च तपसः षड्भेदत्वात्. तत्र बाह्यं तपः षो-ढा यथा–अणसणमुणोयरिया । वित्तीसंखेवणं रसच्चाउ ॥ कायकिलेसो संलीण–या य ब-ज्झो तवो होइ ॥ १ ॥ तत्रानशनमाहारत्यागः, तद् द्विधा, इत्वरं यावत्कथितं च. तत्रेत्वरं चतुर्थादिषण्मासांतं, यावत्कथितं तु पादपोपगमनेंगितमरणभक्तपरिज्ञाभेदात् त्रिधा. तथा ऊ-नोदरता. वत्तीसं किर कवला । आहारो कुक्षिपूरिओ मणिओ ॥ पुरिसस्स महिलियाए । अट्ठावीसं भवे कवला ॥१॥ इत्येवंरूपस्य स्वाहारमानस्य संक्षेपात्पंचधा, तद्यथा–अप्पाहारादिवड्ढा । डुभा-गपत्ता तहेव किंचूणा ॥ अट्ठ दुवालस सोलस–चउवीसिगतीसकवलेहिं ॥२॥ तथा वृत्तेर्निक्षाच-

र्यायाः संक्षेपो द्रव्याद्यनिग्रहविशेषः. संकोचनं वृत्तिसंक्षेपः. तथा रसाः क्षीरादयस्तत्परिहारो रसत्यागः. तथा कायस्यासनबंधेन लोचादिना वा कष्टकरणं कायक्लेशः. स्त्रीपशुपंढकादिवर्जितस्थानेऽवस्थानं संलीनता. एतत्तपः क्रियमाणं लोकेनापि ज्ञायते, कथंचित्कुतीर्थिकैरपि क्रियते, इति बाह्यमुच्यते.

अथाभ्यंतरं पोढा यथा-पायछित्तं विणउ । वेयावच्चं तहेव सज्झाउ ॥ झाणं उस्सग्गोवि य । अब्भंतरउ तवो होइ ॥ १ ॥ तत्र प्रायश्चित्तं दशधा, आलोचनाभेदात्, यदाह-आलोयणपडिक्कमणे । मीसविवेगे तहाविउस्सग्गे ॥ तवछेयमूलअणव-ट्ठिया य पारंचिए चेव ॥ १ ॥ विनयो ज्ञानादिभेदात्सप्तधा, नाणे दंसणचरणे मणवइकाउवयारिउ विणउत्ति. वैयावृत्यं आचार्यादीनामन्नपानादिसंपादननिर्धौ व्यापृतत्वं. यदाहु.—आयरिय उवज्झाए । थेरतवस्सीगिलाणसेहाणं ॥ साहम्मियकुलगणसंघ-संगयं तमिह कायव्वं ॥ १ ॥ स्वाध्यायो वाचनादिर्वक्ष्यमाणः पंचधा, ध्यानं धर्मं शुक्लं च, तत्स्वरूपं यथा-सूत्रार्थसाधनमहाव्रतधारणेषु । बंधप्रमोक्षगमनागमहेतुचिंता ॥ पंचेंद्रियव्युपरमश्च दया च भूते । ध्यानं तु

धर्म्यमिति संप्रवदंति तद्विज्ञाः ॥ १ ॥ यस्येंद्रियाणि विषयेषु पराङ्मुखानि । संकल्पकल्पन-विरुद्धविकारदोषैः ॥ योगैः सदा त्रिभिरहो निभृतांतरात्मा । ध्यानोत्तमं प्रवरशुक्लमिदं वदंति ॥ २ ॥ उत्सर्गो द्रव्यतो गणशरीरोपध्याहारत्यागात्, भावतः क्रोधादित्यागात्. एतत्त्रयो योगैरनिश्रयत्वात्त्रांतरीयैश्च सम्यगनासेव्यमानत्वान्मोक्षप्राप्त्यंतरंगत्वाच्चाभ्यंतर-मित्युच्यते. इयं द्वादशधापि निर्जरा विरतानां विरतिपरिणतानां सकामा. सह कामेनाभि-लाषेण वर्तते इति व्युत्पत्तेः. तयाऽविरतानां विरतिपरिणामरहितानां दारिद्र्यादिदुः-खनिःस्यंदेव जवति सा निर्जरा अकामा नवति. निर्जरां हि नावयन् सकामनिर्जरप्रयो-गेण चिरबद्धान्यपि कर्माणि निर्जरयेदिति. ॥ ९६ ॥ अथ धर्मनावनामाह—

॥ मूलम् ॥—धम्मो जिणेहिं निरुवहि-उवयारपरेहिं सुठु पन्नत्तो ॥ समणाणं समणो वा-सगाण दसहा दुवालसहा ॥ ९७ ॥ व्याख्या—स्पष्टा. नवरं श्रमणानां धर्मो दशधा क्षांत्यादिर्देशयमाणः. धर्मनावनां हि नावयन् शुनानुबंधि सत्कर्म संचिनुयात्. ॥ ९७ ॥ अथ बोधिनावनामाह—

॥ मूलम् ॥—अहमुहगुरुमल्लयठिय-लहुमल्लयजुअलसंठय लाग ॥ धम्माऽयं च द-
वेहिं । पूरियं मणसि चिंतिज्जा ॥ ९८ ॥ व्याख्या—अधोमुखमवाङ्मुखं गुरु बृहत्प्रमाणं
मल्लकं शरावस्तस्योपरिस्थं लघु, अधस्तनमल्लकापेक्षयाऽल्पप्रमाणं मल्लकयुगलं शरावसंपुटं,
तद्वत्संस्थितं संस्थानं यस्य तं. अधोमुखगुरुमल्लकस्थितलघुमल्लकयुगलसंस्थितं लोकं मनसि
चिंतयेत् इदमुक्तं भवति—अधस्तनलोकतलात् सप्तरज्जुविस्ताराद्ध्वं शनैः शनैः संकुचन्
लोकस्तिर्यग्लोके एकरज्ज्वायतो भवति. ततोऽप्यूर्ध्वं क्रमेण विस्तारं व्रजन् ब्रह्मलोकतृतीय-
प्रस्तटे पंचरज्ज्वायतो भवति. ततश्च पुनः शनैः शनैः संक्षेपं व्रजन् सर्वोपरितने लोकाग्रप्र-
देशप्रतरे रज्जुप्रमाणो भवति. ततो भवति यथोक्तसंस्थानो लोकः. कथंभूतं लोकं? धर्मादि-
भिः पंचभिर्द्रव्यैः. पूरितं. तत्र स्वभावतो गतिप्रवृत्तानां जीवपुद्गलानामुपष्टंभकारी मत्स्यानां
जलमिव धर्मास्तिकायः. एवं स्थितिरतानां तेषामुपष्टंभदायी पथिकानां छायेवाऽधर्मास्तिका
यः. एतौ च द्वावपि लोकालोकव्यवस्थाहेतू प्रदेशतः प्रमाणतश्च लोकाकाशतुल्यौ. तथा
एतेषामेव स्थितिगतिप्रवृत्तानामवकाशदानादवगाहनधर्माकाशास्तिकायः. तथा चेतना ल

क्षणः कर्मणां कर्ता भोक्ता च जीवनधर्मा जीवास्तिकायः. तथा भूधराब्ध्यादिसमस्तवस्तूनां परिणामिकारणं पूरणगलनधर्मा पुद्गलास्तिकायः. एतेष्वाद्याश्चत्वारोऽमूर्ताः, अंत्यस्तु मूर्तः. जीववर्जाः सर्वेऽप्यचेतनाः. एतैः पंचभिर्द्रव्यैः पूरितोऽयं लोकः. न हि स कश्चिदेकोऽपि प्रदेशो लोके विद्यते यत्र धर्माधर्माकाशानामेकैकः प्रदेशो जीवपुद्गलानां चानंताः प्रदेशाः स्वस्वरूपेण नावतिष्ठंत इति. अत्र च मनुष्यक्षेत्रे एव वर्तिष्णुत्वात् षष्ठस्य कालद्रव्यस्य ग्रहणं न कृतं. एवं हि लोकस्वरूपं भावयन् धर्मध्याने स्थैर्यं लभते. यदार्षं—खिइवलयदीवसायर-नरयविमाणभवणाइसंठाणं ॥ वासाइपइट्ठाणं । निययं लोगट्ठिइविहाणं ॥ १ ॥ धर्मध्यानी ध्यायेदिति शेषः. ॥ ९८ ॥ अथ बोधिभावनामाह—

॥ मूलम् ॥—पंचिंदियत्तणाइय-सामग्गीसंभवेवि अइदुलहा ॥ तत्तावबोहरूवा । बोही सोहि जियस्स जउ ॥ ९९ ॥ व्याख्या—प्रकटार्था. नवरं यतो यस्माद्बोधेर्मिथ्यात्वपंककलुषस्य जीवस्य शोधिर्भवति. एवं बोधेर्दुर्लभतां भावयन् धनांगनादिव्यतिरेकेण बोधिभावनामेव प्रार्थयेत्. ॥ ९९ ॥ अथोपसंहरन्नाह—

॥ मूलम् ॥—नाविज्ञातं इह ज्ञा-यणादि कल्याणसाधनं होइ ॥ चलरसचलंपि चित्तं। पसन्नचंदस्सव जईणं ॥ १०० ॥ व्याख्या—यतीनां मुनीनां प्रसन्नचंद्रस्य राजर्षेरिव चेतश्च-लरसचलमपि पारदवच्चपलमपि, इति पूर्वोक्तान्निर्भाग्यनानिर्ज्ञाव्यमानं सत् कल्याणसाधकं पुण्यानुबंधि भवति. चलरसोऽपि गुरुगम्यान्निर्नाविनानिर्ज्ञाव्यमानः पीतधातोः साधको जन-तीति संटंकः. ॥ १०० ॥ प्रसन्नचंद्रदृष्टांतस्त्वयं—अथ प्रसन्नचंद्रराजर्षिकथा—

सत्कोटिपात्रमस्त्यत्र । पोतवत्पोतनं पुरं ॥ यत्क्रोडे परिचिक्रीडे । लक्ष्मीरंभोधिसंभवा ॥ १ ॥ भूपस्तत्र बभौ सोम-चंद्रो निस्तंद्रविक्रमः ॥ तस्य शीलद्रुमाराम-धरणी धारिणी प्रिया ॥ २ ॥ प्रसन्नचंद्र इत्यासी-त्तनयः सज्ञतिस्तयोः ॥ नालीकस्योऽपि यः क्वापि । नापुप-त्कलंहंसतां ॥३॥ कदापि कुर्वती वेणी-बंधे भूधवमूर्द्धनि ॥ दृष्ट्वैकं पलितं राज्ञी । चक्रापे द्यूनमागतं ॥४॥ इतस्ततस्ततः पश्य-न्नपश्यन् द्यूतमग्रतः ॥ धारिण्या भूपतिः प्रोचे । विस्मितः स्मितपूर्वकं ॥५॥ संदेह इव सिद्धांते । शुद्धांते तव किं नृप ॥ द्यूतो विशति तद्द्यूतं । पश्यामुं पलिताग्निधं ॥६॥ सकर्णः कर्णपार्श्वस्थो । न्यग्भूतो वक्त्रयसो तव ॥ संप्राप्तेव जराधाटी । विरमं व्याप पापतः ॥ ७ ॥ वि-

पणोऽथ नृपोऽध्याय-दहो मोहादचेतसः ॥ पदं मूर्ध्नि ममाधत्त । पलितव्यलतो जरा ॥ ८ ॥ यन्मूर्ध्नि कृष्णचिकुरप्रकराव्दगम्या । प्रावृद् न वोधरविरेपु वित्तति युक्तं ॥ येषां पुनः प-लितकाशविकाशसारा । श्रीः शारदी स्फुरति तेष्वधिकं न किं सः ॥ ९ ॥ वैरिणी दुर्निवा रेयं । पुत्रमित्रजनैरपि ॥ रूपं विनाशयत्येव । पलितं करिणी जरा ॥ १० ॥ भुक्ता भोगाः कृतं राज्यं । जातश्च तनयो मम ॥ गततारुण्यपूरस्य । सांप्रतं सांप्रतं व्रतं ॥ ११ ॥ एवं चिं-तातुरं भूपं । सहास्यं धारिणी जगौ ॥ हृतकोश इव स्वामिन् । किं जरां वीक्ष्य खिद्यसे ॥ ॥ १२ ॥ जरानिगूहनोपायं । वच्मि नाथ यथानयं ॥ पलितं भ्रमयित्वेत-त्पुरे घोषय सर्वतः ॥ १३ ॥ लोकाः शृणुत यः कश्चि-देवं धवलमूर्धजं ॥ वदयति क्षितिपं वृद्धं । स ध्रुवं दंक्ष्यि-प्यते ॥ १४ ॥ राजदंष्ट्रभयादेवं । कश्चिदुक्ता न ते जरां ॥ वीतशंकस्ततो भोगान् । भुंजी-या भूप चिरिशः ॥ १५ ॥ भूपः प्रोचे प्रिये हास्यं । किमकांडे विधीयते ॥ जरां कालक्रमाया-तां । वीक्ष्य वैक्लव्यमेति कः ॥ १६ ॥ अदृष्टपलिता एव । पूर्वेजाः प्राग्जन्मम ॥ अहं तु प-लिते दृष्टे । गृहेऽस्मीति त्रपाकरं ॥ १७ ॥ जगाद धारिणी स्वामि-न्नेषा खेदप्रथा वृथा ॥ स-

मयोऽस्ति समर्थस्या-ष्यपि प्रव्रजितुं तत्र ॥ १८ ॥ अथ राज्ञ्यानुज्ञातः । पुत्रं राज्येऽभि-
षिच्य सः ॥ आदाय तापसीं दीक्षां । प्राप नूपस्तपोवनं ॥ १९ ॥ मा त्यक्ष्टु मे हृदीशेन ।
सह यानमनोरथः ॥ इत्यज्ञापितगर्भैव । राज्ञी तमनुजग्मुषी ॥ २० ॥ दधतोः सोदरस्नेहं ।
जन्मांतरितयोरिव ॥ जपतीप्रेम तत्रोट । तशोटजगयास्तयोः ॥ २१ ॥ तत्रासून सुतं राज्ञी ।
धर्मबुद्धिरिवोज्ज्वला ॥ प्रसूः प्रसूतिरोगार्त्या । व्यपद्यत तदैव सा ॥ २२ ॥ अवाप्य चंद्रदे-
वीत्वं । देवी प्रेमवशंवदा ॥ बालं तं सैरिभी भूया-रण्ये स्तन्यमपीप्यत ॥ २३ ॥ तस्य राज-
कुमारस्य । वने वल्कलवाससः ॥ नाम वल्कलचीरीति । रीतिज्ञैस्तापसैर्दधे ॥ २४ ॥ वर्द्धमा-
नः स्वकैः पुण्यै-स्तारं तारुण्यमाप सः ॥ शशो शैत्यमिव श्रीमे । जहौ मौग्ध्यं तदापि न ॥
॥ २५ ॥ स प्रीतः स्वयमानीतै-र्दलैः पुष्पफलैर्जलैः ॥ पितरं तर्पयामास । जरसा जर्जरौजसं
॥ २६ ॥ वनं प्रसन्नचंद्रोऽथ । प्रणंतुं पितरं गतः ॥ अनुजं यौवनोद्भेद-सुभगं तमवैक्षत ॥
॥ २७ ॥ अचिंतयच्च बालोऽयं । सोमलः सहते हहा ॥ वनवासव्यथा ज्येष्ठ-बंधौ राजधरे-
मयि ॥ २८ ॥ नेजे पित्रोचितं क्षीर-दारुणातपसेवनं ॥ बाल्येऽप्यसौ-किं कुरुते । दारुणा-

तपसेवनं ॥ २९ ॥ पितुस्तपोनिधेः क्रोडे । पारींद्रस्येव संस्थितं ॥ न सूरोऽप्येनमाकृष्टु-मीष्टे
कश्चित्करोमि किं ॥ ३० ॥ इत्यंतरुल्लसच्चिंता-धूमरीधूसराननः ॥ पुनः स्वजवनं प्राप । नृपः
कृपणनैपुणः ॥ ३१ ॥ अध्यासीनं सत्तामध्य-मध्यात्मव्यथयाकुलं ॥ पप्रच्छुर्वरवनिता । विन-
यावनता नृपं ॥ ३२ ॥ देवाद्य किं न ते वश्याः । संति शुद्धांतयोषितः ॥ किं वा कन्या स-
लावण्या । कापि कापि निरीक्षिता ॥ ३३ ॥ प्रोक्ते राज्ञा स्वदुःखेऽथ । ताः प्रोचुर्यौवनोन्म-
दाः ॥ तत्तद्बुद्धिमयीरम्या-नेवात्रार्थे नृपादिशं ॥ ३४ ॥ ग्रहीतुं तास्ततो राज्ञा-ज्ञया वल्क-
लचीरिणं ॥ धूर्तविद्या इवांगिन्यो । रथारूढाः प्रतस्थिरे ॥ ३५ ॥ रथेषु शर्कराखंड-मतसं-
क्षीमोदकादि च ॥ पीयूषरसनिष्पदे-नेव निष्पादितं न्यधुः ॥ ३६ ॥ जग्मुश्च तत्र यत्रास्ति ।
सोमचंद्रो महामनाः ॥ नाविशंश्च वनं राज-समाजं सरमा इव ॥ ३७ ॥ प्रतीक्षमाणाः परि-
तो । वनं वल्कलचीरिणं ॥ तस्थुर्भूम्नि तरोर्न्यस्य । चरं ताश्चोरचर्यया ॥ ३८ ॥ तस्मापहृत
देहश्च-जटावांस्तावदाययौ ॥ फलानिलाषी बालर्षिः । स मुग्धमृगवद्भ्रमन् ॥ ३९ ॥ रूपी-

॥ ४० ॥ इत्यलौकिकमालाक्य । ।वनयं तस्य विस्मिताः ॥ ।मथः प्राथतहास्य ताः । स्व स्वे-
नैव न्यवारयन् ॥ ४१ ॥ ताभ्यः फलानि वन्यानि । विनीतः सोऽढौकत ॥ वर्ण्यतेऽतिथि-
पूजातो । नान्यत्पुण्यं तपस्विनिः ॥ ४२ ॥ चर्वं चर्वं शठास्तास्ता-न्यरसानीति तत्यजुः ॥ ऋू-
रिखंमानखंमान-प्यदुस्तस्मै च मोदकान् ॥ ४३ ॥ तानास्वाद्य सुधास्वादून् । व्याचष्ट स
पुनः पुनः ॥ न ऋजुस्तस्य जिह्वा सा । रसज्ञेति श्रुता यतः ॥ ४४ ॥ रसगृद्धः स ताः प्रोचे.।
मुनींद्रा आश्रमः क्व वः ॥ मत्पितुर्जरिणो योग्या । कत्या चेयं फलावली ॥ ४५ ॥ अहो ज-
टा सुखलिता । नवतां जाति मूर्द्धसु ॥ सौकुमार्यमकल्केषु । वल्केष्वप्यहहोल्वणं ॥ ४६ ॥
युष्माकमंगरागोऽयं । दिशः सुरभयत्यहो ॥ अहो बालडुसेकार्यौ । कलशौ वः स्थितौ हृदि
॥ ४७ ॥ कथं हृदीव मालिन्यं । मुखेऽपि श्मश्रुणा न च ॥ किं वायं वदने रागो । वैरी वै-
राग्यशालिनां ॥ ४८ ॥ पाणिपादश्रवोमूर्ध्नि । स्थितोऽपि न दहत्ययं ॥ यत्कृशानुः प्रदीप्तोऽपि
। तदेतद्धि तपोबलं ॥ ४९ ॥ अथ ता जगदुर्वीणा-काणप्राणहरस्वराः ॥ वयमध्यास्महे
बाल-रूपे श्रीपोतनाश्रमं ॥ ५० ॥ फलश्रेण्यानया तत्र । नित्यं कल्पितपारणाः ॥ कुर्मः क-

मागतं कर्म । कलाकेलिगुरोर्गिरा ॥ ५१ ॥ जटाबलकलरागाद्यं । तन्नेदृग्न च दुर्लभं ॥ वक्त्य-
ल वदने रागो-ऽनुरागं त्वयि वीक्षिते ॥ ५२ ॥ आश्रमाः संति भूयांसो । न पुनः पोतनो-
पमाः ॥ कृपयोऽस्मादृशा यत्र । सरागा अपि निर्वृताः ॥ ५३ ॥ तत्र पुत्र त्वमागच्छेः । का-
र्यमेभिः फलैर्यदि ॥ वेत्ति नानारसान् भूरि-व्रत्तिर्भ्रमरवन्नरः ॥ ५४ ॥ स जगाद तदा गूढं
। द्रुमारूढचरश्च ताः ॥ रेरे श्रीसोमचंद्रर्षि-रेति नश्यत नश्यत ॥ ५५ ॥ ता अनेशन्नृपेर्नी-
ता । निह्राका इव विद्युतः ॥ मुक्त्वा बालं रथेनाशु । ततो निर्व्याजवाजिना ॥ ५६ ॥ आ-
वाप्य स्वपुरं जात-जीविताशा नरेश्वरं ॥ हिया त्रिया च नम्रास्या-स्तत्स्वरूपमजिज्ञपन्
॥ ५७ ॥ ततः शतगुणां पीडां । दधानो वसुधाधवः ॥ मग्नः शोकोदधौ कष्टं । गमयामास
वासरान् ॥ ५८ ॥ स चैकाकी जरी तातः । स च त्रातोऽयच्युतः ॥ खादत्यक्ते शल्यवत्तस्य ।
शश्वदेतद् हृयं हृदि ॥ ५९ ॥ सोऽपि बालरूपिर्धावं-स्तत्राणित्वयमवाप्नुवन् ॥ वव्राम कान-
ने यूथ-भ्रष्टश्चल्लूकवच्चिरं ॥ ६० ॥ पितुर्गृहान्नयन्नारीं । निजग्रामं नरः पुरः ॥ तेनादर्शि र-
थारूढः । कोऽपि निःकोपचेतसा ॥ ६१ ॥ तातान्निवादयामीति । ववंदे दंपती स्म तौ ॥

हास कामिनी तस्या-नुचितादुपचारतः ॥ ६२ ॥ ऋषिरेष ऋजुर्वन्यो । न परिहासमर्हति ॥ निषेध्येति नरः पत्नीं । क यासीति मुनिं जगौ ॥ ६३ ॥ पोतनाश्रमपांथोऽह-मित्युक्ते मुनिनोन्मनाः ॥ स जगाद तदेहीति । मयाप्यत्रैव गम्यते ॥ ६४ ॥ ऋषिः पथि रथे वीक्ष्य । वाहवाहनमन्वयधात् ॥ निस्तृंशेनेव वाह्येते । किमेतौ हरिणौ त्वया ॥ ६५ ॥ एषोऽस्मदाश्रमाचार । इत्युक्त्वा मोदकानलौ ॥ सुधासमधिकस्वादां-स्तस्यादाद् दृढसौहृदः ॥ ६६ ॥ तत्स्वादवर्धितास्वादः । स प्रोचे वेद्म्यहं मुने ॥ फलान्येतानि तान्येव । यानि ते तापसा ददुः ॥ ६७ ॥ पथि प्रादुरभूत्तस्य । चौरः क्रूरतरः पुरः ॥ रथी विजित्य तं तस्या-दत्ताजितचिरं धनं ॥ ६८ ॥ निरजैषमसङ्गोऽपि । यदेनं स्तेननायकं ॥ महिमा सोऽयमस्यैव । ऋषेरित्युन्निनाय सः ॥६९॥ प्रीतस्तं स्वरथे न्यस्य । स ययावुपपोतनं ॥ गुणक्रीतमिवामुष्मै । स्वर्णखंडमदत्त च ॥ ७० ॥ स्वर्णादग्निधिया त्रस्य-न्मुनिस्तेनाऽन्यधीयत ॥ मा नैस्तपोनिरास्माकैः । प्रजावत्येष नानलः ॥ ७१ ॥ अमी त्वामाह्वयंतीव । पोतनाश्रमपादपाः ॥ चलद्दलकरैः संख्या-मिलदंभजकूजितैः ॥ ७२ ॥ अत्रामुना विना प्रायो । वासस्थानं न लभ्यते ॥ इत्यस्मै

मागतं कर्म । कलाकेलिगुरोर्गिरा ॥ ५१ ॥ जटावल्कलरागाद्यं । तत्रेदृग्न च दुर्लभं ॥ वक्त्र-
ल वदने रागो-ऽनुरागं त्वयि वीक्षिते ॥ ५२ ॥ आश्रमाः संति भूयांसो । न पुनः पोतनो-
पमाः ॥ रूपयोऽसादृशा यत्र । सरागा अपि निर्वृताः ॥ ५३ ॥ तत्र पुत्र त्वमागच्छेः । का-
र्यमेजिः फलैर्यदि ॥ वेत्ति नानारसान् भूरि-व्रजन्निर्भरवत्तरः ॥ ५४ ॥ स जगाद तदा गूढं
। द्रुमारूढचरश्च ताः ॥ रेरे श्रीसोमचंद्रर्षि-रेति नश्यत नश्यत ॥ ५५ ॥ ता अनेशन्नृपेर्जी-
ता । निहाका इव विद्युतः ॥ मुक्त्वा बालं रथेनाशु । ततो निर्व्याजवाजिना ॥ ५६ ॥ अ-
वाप्य स्वपुरं जात-जीविताशा नरेश्वरं ॥ ह्रिया त्रिया च नम्रास्या-स्तत्स्वरूपमजिज्ञपन्
॥ ५७ ॥ ततः शतगुणां पीडां । दधानो वसुधाधवः ॥ मग्नः शोकोदधौ कृच्छ्रं । गमयामास
वासरान् ॥ ५८ ॥ स चैकाकी जरी तातः । स च त्रातोत्तयच्युतः ॥ खादत्यके शल्यवत्तस्य ।
शश्वदेतद् द्वयं हृदि ॥ ५९ ॥ सोऽपि बालऋषिर्धावं-स्तज्ञाणिक्यमवाप्नुवन् ॥ वव्राम कान-
ने यूथ-भ्रष्टश्चल्लूकवच्चिरं ॥ ६० ॥ पितुर्गृहान्नयन्नारीं । निजग्रामं नरः पुरः ॥ तेनादर्शि र-
थारूढः । कोऽपि निःकोपचेतसा ॥ ६१ ॥ तातान्निवादयामीति । ववंदे दंपती स तौ ॥ ज-

हास कामिनी तस्या-नुचितादुपचारतः ॥ ६२ ॥ रूपिरेष ऋजुर्वन्यो । न परिहासमर्हति ॥ निषेध्येति नरः पत्नीं । क यासीति मुनिं जगौ ॥ ६३ ॥ पोतनाश्रमपांथोऽह-मित्युक्ते मुनिनोन्मनाः ॥ स जगाद तदैहीति । मयाप्यत्रैव गम्यते ॥ ६४ ॥ रूपिः पथि रथे वीक्ष्य । वाहवाहनमन्यधात् ॥ निस्तृंशेनेव वाह्येते । किमेतौ हरिणौ त्वया ॥ ६५ ॥ एषोऽस्मदाश्रमाचार । इत्युक्त्वा मोदकानसौ ॥ सुधासमधिकस्वादां-स्तस्यादाद् दृढसौहृदः ॥ ६६ ॥ तत्स्वादवर्धितादूलादः । स प्रोचे वेद्म्यहं मुने ॥ फलान्येतानि तान्येव । यानि ते तापसा ददुः ॥ ६७ ॥ पथि प्राडुरभूत्तस्य । चौरः क्रूरतरः पुरः ॥ रथी विजित्य तं तस्या-दत्तार्जितचिरं धनं ॥ ६८ ॥ निरजैषमसज्जोऽपि । यदेनं स्तेननायकं ॥ महिमा सोऽयमस्यैव । रूपेरित्युन्निनाय सः ॥६९॥ प्रीतस्तं स्वरथे न्यस्य । स ययावुपपोतनं ॥ गुणक्रीतमिवामुष्मै । स्वर्णखंरूमदत्त च ॥ ७० ॥ स्वर्णादग्निधिया त्रस्य-न्मुनिस्तेनान्वधीयत ॥ मा नैस्तपोनिरास्माकैः । प्रज्ञवत्येव नानलः ॥ ७१ ॥ अमी त्वामाह्वयंतीव । पोतनाश्रमपादपाः ॥ चलद्दलकरैः संध्या-मिलदंभजकूजितैः ॥ ७२ ॥ अत्रामुना विना प्रायो । वासस्थानं न लभ्यते ॥ इत्यस्मै

कांचनं दत्वा । स्वग्रामंप्रति सोऽचलत् ॥ ७३ ॥ परिखाविशिखावप्र-सज्ञाशोभां निजालयन् ॥
विवेशांतःपुरं सायं । नृपाज्ञ इव भूपजूः ॥ ७४ ॥ चलध्वजपटव्याजा-न्नृत्यंतीव तदागमे ॥
वेश्यावेश्मानि नगर-प्रवेशे प्रददर्श सः ॥ ७५ ॥ जीवन्नेव तपोनिः किं।लंचितोऽस्मि त्रिवि-
ष्टपं ॥ प्रविशंस्तेषु वेश्मैकं । स मुनिर्दध्यिवानिति ॥ ७६ ॥ गौरांगीर्गणिकास्तत्र । वीक्ष्यान-
रणजासुराः॥ ऋषींस्ताणोंटजावास-दग्धदेहान्निनिंद सः ॥ ७७ ॥ कांश्चिन्नडासनासीनां । सोऽ-
भिवादनपूर्वकं ॥ दत्वा तत्कांचनं वेश्यां । वासस्थानमयाचत ॥ ७८ ॥ गणिका गणकोक्ता-
य । तस्मै दित्सुर्निजांगजां ॥ विवाहस्याथ सामग्रीं । स्वचेटीभिरकारयत् ॥ ७९ ॥ निषिध्य-
तोऽपि तस्य स्वं । वेणीदंडं प्रदर्श्य सा ॥ मस्तके विभृणोतिस्म । वटपादोपमां जटां ॥ ८० ॥
स्नानांगरागभूषाद्यं । विंध्यं वारवधूकृतं ॥ अस्याश्रमस्य कल्पोऽय-मित्यसौ बहुमन्यत ॥८१॥
अरुचिर्विषयज्ञाता-नभिज्ञोऽपि व्यवाहयत ॥ शमी शमीमिवाश्वत्थः । स ताभिर्निजकन्यकां
॥ ८२ ॥ विवाहे तत्र यस्ताभि-र्वाद्यो लूलुध्वनिः कृतः ॥ जागृता बंधुवैधुर्या-न्निशि सोऽ-
श्रावि भूभुजा ॥ ८३ ॥ दध्यौ नृपतिरित्येवं । सपौरे मयि दुःखिनि ॥ कस्यायं श्रीमतः श्री-

ति-संगी संगीतकध्वनिः ॥ ७४ ॥ राज्ञानुज्ञातुमादिष्टो । नृत्यः शब्दानुसारतः ॥ ययौ तदै-
व वेश्यौकः । शब्दवेधीव सायकः ॥ ७५ ॥ गणिकां सोऽन्यधान्मुग्धे । शुचा दग्धेऽथ भूपतौ
॥ ज्वलति ज्वलने शैत्य-मिव कोऽयं तवोत्सवः ॥ ७६ ॥ सापि वाचां विशेषज्ञो-वाच तं र-
चितांजलिः ॥ प्राग् जामातृचिंतार्तो । कोऽपि कार्तांतिको जगौ ॥ ७७ ॥ अत्रोपैति शिशुः
सायं । यः कश्चिन्मुग्धतापसः ॥ स्वर्णरेखां कपस्येव । तस्य दद्याः स्वनंदिनीं ॥ ७८ ॥ सोऽद्य
सायं समायासी-दाहूतो मन्मनोरथैः ॥ क्रियमाणोऽस्ति वीवाहे । तस्यास्तदयमुत्सवः ॥७९॥
जानेऽहं भूपतेर्दुःखं । जाने रोषं च भूपतेः ॥ अंतरात्मा तु नापत्य-स्नेहात्तौ गणयत्यदः ॥
॥ ८० ॥ एतत्सर्वं नरेंद्राय । नत्वा नृत्योऽन्यधत्त स. ॥ स एवायं कदापि स्या-दिति नृपो-
ऽप्यमोदत ॥ ८१ ॥ सूर्ये तदाशयोदस्त । श्व प्रातः समुज्जते ॥ यैः कुमारो वने दृष्ट-स्तैरे-
त्याघादि नृपतेः ॥ ८२ ॥ नृप रूपवतीसीमां । वेश्याजिः प्राकृतीकृतां ॥ परिणीय कनीम-
न । बंधुर्विजयते तव ॥ ८३ ॥ आनानयद्भूयुक्तं । नृपः संसदि सोदरं ॥ जिष्णुर्विष्णुमिव
भीणा । रागागतं स सभ्यजे ॥ ८४ ॥ अशिक्षयत विलासौघं । निपुणैः स नृपाज्ञया ॥ अवि-

राक्षसिकोऽहं । चूतश्चैत्रदिनैरिव ॥ ९५ ॥ उद्भूतानेकनृपाल-बालाश्चटुलचेतस. ॥ तस्या-
तिचक्रमुर्यामा । इव द्वादश वत्सराः ॥ ९६ ॥ निशाशेषेऽन्यदा दध्यौ । कुमारो धिग्मया व-
ने ॥ एकाकी भोगगृद्धेन । मुक्तस्तातोऽपि वैरिवत् ॥ ९७ ॥ शिष्यो गुरोरिवामुष्य । कः फ-
लान्युपनेष्यते ॥ को जन्तेः सेत्स्यते बाला-रामं तत्त्वमिव श्रुतेः ॥ ९८ ॥ अनेकानिव विश्व-
स्ता-न्शिवारांजसिदानतः ॥ प्रोणयिष्यति को बाल-मृगानुद्भटचारिणः ॥ ९९ ॥ क तन्मे कुं-
जरस्येव । सुखं वनविहारजं ॥ केदं राजगृहम्यस्य । नारीजंजीरबंधनं ॥ १०० ॥ अथ जा-
स्यति तच्चिंता-तमो नेतुमिवोदिते ॥ तातपादाब्जमेवायै । स नरेंद्रं व्यजिज्ञपत् ॥ १ ॥
राजा प्रसन्नचंद्रोऽपि । पितुर्मिलनमुत्सुकः ॥ चचालालपरीवारः । सह वल्कलचीरिणा ॥२॥
इतश्च सोमचंद्रर्षि—स्तदारभ्ये भ्रमन् भ्रमन् ॥ अवाप्यक्षेत्रपीयूष-सत्रं पुत्रं न्यवर्त्तत ॥ ३ ॥
रोदं रोदं चिरं दृग्भा-र्द्रीभूतेक्षणः क्षण ॥ नपैवक्त्रमवन्निन्ये । सोऽपि द्वादशवत्सरीं ॥४॥
ततः प्रसन्नचंद्रेण । निस्तंद्रेण सबंधुना ॥ संस्थाप्य पतितः सैन्य । मध्येऽरण्यमगम्यत ॥ ५ ॥
कच्चिन्नारंग रंगस्ते । कृशोऽसि त्वमशोक किं ॥ किं म्लायसि मार्कंद । न कोदुंबर संवर ॥

॥ ६ ॥ आलाप्यैवं कुमारेंडो ! नागरानिव पार्थिवः ॥ हर्षाश्रुधारयासक्त । पुरापरिचयांस्त-
रून् ॥ ७ ॥ पुरस्तो दृष्टिक्रियाशून्यं । सेव्यमानं जरन्मृगैः ॥ हस्तन्यस्ताक्षमालाकं । वृद्धं तात-
मपश्यतां ॥ ८ ॥ समादाय निजं नाम । प्रणामपरयोस्तयोः ॥ संस्पृश्य पाणिना पृष्टं । ददौ
राजर्षिराशिषं ॥ ९ ॥ युवापि बालवत्तातो-त्संगविन्यस्तमस्तकः ॥ स्वमागः क्षमयामास ।
रुदन् बल्कलचीर्यपि ॥ १० ॥ द्वैधीभावमिवच्छेतु-मार्श्विगत्सोऽपि तं मुदा ॥ हर्षाश्रुधौत का-
ङ्क्ष्यं । चक्षुषोः प्राप पाटवं ॥ ११ ॥ प्रविश्योटजमेकांते । पूर्वाभ्यासवशंवदः ॥ त्वङ्मयान्यु-
त्तरीयाणि । कुमारः प्रममार्ज सः ॥ १२ ॥ एवं प्रमार्जनं क्वापि । कृतपूर्वाणि चिंतया ॥ जा-
तिस्मरः स सस्मार । श्रामण्यं प्राग्भवार्जितं ॥ १३ ॥ घटी यामो दिनं पक्षः । स कदा नवि-
ता यदा ॥ सा मे संगस्यते दीक्षा । वियुक्तस्येव वल्लभा ॥ १४ ॥ इति साक्षिणि तच्छ्रा-
न्ते-नले धर्मः पुरोहितः । व्यवाहयत्कुमारेंद्रं । समं केवलसंपदा ॥ १५ ॥ तदा स भगवा-
न् दिव्य-स्वर्णांभोजकृतस्थितिः ॥ सुरासुरसमज्यायां । निर्ममे धर्मदेशनां ॥ १६ ॥ निश-
म्य तद्वचःश्रेणीं । निःश्रेणीमिव निर्वृतेः ॥ सोमचंद्रोऽजनदीक्षां । छिन्नमिथ्यात्वबंधनः ॥१७॥

प्रसन्नचंडे निस्तंडे । प्राप्ते श्रावकधूर्यतां ॥ श्रीवीरः शिश्रिये पित्रा । सत्रा वल्कलचीरिणा ॥ १७ ॥ प्रसन्नचंद्रनृपाले । पाति तात इव प्रजाः ॥ कदाचित्पोतनपुरे । श्रीवीरः समवासरत् ॥ १९ ॥ श्राकर्ण्य कर्णपीयूष-पारणं प्रभुदेशनां ॥ सुतं शिशुमपि न्यस्य । साम्राज्ये प्राव्रजन्नृपः ॥ २० ॥ समं जगवता कुर्वन् । विहारं वसुधातले ॥ प्रसन्नचंडराजार्षि-र्ययौ राजगृहं पुरं ॥ २१ ॥ व्याख्यावप्रत्रयाग्रेऽसौ । तस्थौ प्रतिमया मुनिः ॥ श्रंतरंगरिपुसंग-कीर्तिस्तंज इवार्हतः ॥ २२ ॥ यस्य योगत्रयी जैन-ध्यानमंत्रपवित्रिता ॥ स तदा वंदितुं वीरं । चचाल श्रेणिको नृपः ॥ २३ ॥ श्रजूतां तस्य नासीरे । सुनासीरेऽतेजसः ॥ सुमुखो दुर्मुखश्चेति । यथार्थौ पुरुषावुभौ ॥ २४ ॥ पिंडस्थमिव सद्ज्ञानं । पदस्थमिव संवरं ॥ रूपस्थमिव चारित्रं । रूपातीतं मनोजुवः ॥ २५ ॥ पथि तं सुमुखो वीक्ष्य । महर्षिं हर्षितो जगौ ॥ त्वमेव मुख्यो धुर्याणां । यस्येयं ध्यानसाधना ॥ २६ ॥ युग्मं ॥ पूर्वं बाह्यास्ततः पिंड-वर्तिनोऽपि विजिग्यिरे ॥ द्विषो येन समं तेन । त्वया कः स्पर्धनां जटः ॥ २७ ॥ अथ तं दुर्मुखः प्रोचे । न त्वं सुमुख बुध्यसे ॥ अस्येक्षुयष्टिवन्नूनं । निःफला संयमक्रिया ॥ २८ ॥ राज्ये न्यवे-

शि योऽनेन । बालः स किल वैरिन्निः ॥ वारिन्निर्दुर्बलः सेतु-रिवाप्लाव्यत संप्रति ॥ २९ ॥
हास्तिकं जगृहेऽश्वीयं । जहे संजहिरे जटाः ॥ अवारि धेनुकं तत्किं । यन्न चक्रेऽस्य वैरि-
ञ्जिः ॥ ३० ॥ नास्य कूर्चं मुखं किंतु । पुत्रं तैरश्वलक्षणं ॥ यो जज्ञे नैतदपि य-द्वाले रा-
ज्यं न दीयते ॥ ३१ ॥ दुर्निवारं लगत्येव । व्रतिनोऽप्यस्य तद्भजः ॥ इत्युक्त्वा सोऽग्रतोऽचा-
क्षी-दहो दोषदृशः खलाः ॥ ३२ ॥ त्यक्त्वा चंदनपंकमत्र रमते श्लेष्मह्रदे मक्षिका । मु-
क्त्वा पल्वलमभ्यवारि महिषः पंके क्षुतत्यन्वहं ॥ हित्वा सुंदरतिग्मरश्मिदिवसं कौशेयुलू-
को निशि ॥ प्रायो दिव्यति दूषणे गुणगणत्यागात्खलानां मतिः ॥ ३३ ॥ एभिस्तद्वचनैः क-
ल्पा-वसानपवनैरिव ॥ स्थिरः क्षमाधरः सारा-कारः साधुरचाल्यत ॥ ३४ ॥ ताम्यतिस्म त-
पस्तस्य । गलितं गुणगौरवं ॥ च्युता चारित्रचिंतापि । विशीर्णं श्रुतपाटवं ॥ ३५ ॥ दृष्यौ
स किमहं दृष्टो । जीवन्नपि मृतोऽरिन्निः ॥ यज्जिघृक्षति मज्जाता-दहो ते राज्यसंपदं ॥३६॥
मय्युदस्तायुधे योधे । युधि भूरिस्फुरन्मुदे ॥ उच्चुंग इव मातंगे । केऽपरे पशवः परे ॥३७॥
मुनिर्ध्यास्त्वेति मनसा । जयद्वक्त्रमवीवदत् ॥ आजूहुवन्महायोधा-नायुधानप्यचिक्षणवत् ॥

॥३७॥ समनीनहदश्वेन–सुभटान् वीर्यशालिनः ॥ प्राचीचलद्बलं सत्रा । शत्रुजातैरयूयुधत् ॥ ३९ ॥ युग्मं ॥ ततः पतद्वरासार–रुद्धवैवस्वतद्युतिः ॥ निर्नेत्रकुंजानिव्यक्त–रक्तपूरतरद्रथः ॥ ४० ॥ मिथः संघर्षदुरूर्पे–खड्गखादत्कारभीषणः ॥ निशितोल्लसितानंत–कुंतप्रोतभटव्रजः ॥ ४१ कृतकेतुस्थितच्छत्र–दंडदंतुरितक्षितिः ॥ उभयोः सैन्ययोरासी–न्नीरुद्धदारणो रणः ॥ ४२ ॥ त्रिभिर्विशेषकं ॥ अत्रांतरे ववंदे तं । मुनींद्रं श्रेणिको नृपः ॥ न स वीररसव्यग्रो । धर्मलाभनयतिस्म तं ॥ ४३ ॥ अहो महोज्ज्वलं ध्यान–महो निस्संगता मुनेः ॥ वंदमानेऽपि भूपाले । यन्मय्येष तृणीयति ॥ ४४ ॥ न मुक्तिरपि मन्येऽस्य । ध्यानादस्माद्वीयसी ॥ एवं विचारयन् भूपः । श्रीवीरस्यांतिकं ययौ ॥ ४५ ॥ नत्वा स प्रभुमप्राक्षी–द्यदावंदि मया तदा ॥ कालं प्रसन्नचंद्रर्षे–स्करोत्युत्पद्यते क्व तत् ॥ ४६ ॥ सप्तमं नरकं याति । राजर्षिः स तदा मृतः ॥ इत्युक्ते प्रभुणा दध्या–वध्यात्मं मगधाधिपः ॥ ४७ ॥ क्व तध्यानं मुनेस्तस्य । पतनं नरके क्व च ॥ क्व राजकेलीकलना । क्व च वर्चोगृहे स्थितिः ॥ ४८ ॥ जाने जैनेश्वरी वाणी । शुश्रुवे व्यत्ययान्मया ॥ यद्वा लं चिंतया नार्हन् । पुनः पृच्छति कुप्यति ॥ ४९ ॥

क्षणाज्ञाज्ञा पुनः पृष्टो । गतिं तस्यावदत्प्रभुः ॥ विमानं याति सर्वार्थ-सिद्धिं चेन्निश्चयतेऽधुना ॥ ५० ॥ युक्तैवासौ प्रश्नोरुक्ति-रिति क्षितिभुजा पुनः ॥ पृष्टो जिनो जगौ जातः । सांप्रतं स च केवली ॥ ५१ ॥ पश्यामी समवसृते-रुत्तिष्ठंति प्रमोदिनः ॥ देवा देव्यश्च तस्यैव । विधातुं केवलोत्सवं ॥ ५२ ॥ राजोवाचैकरूपा हि । देव गंगेव गीस्तव ॥ त्रिपथीभूय संदेह-मलं किं मय्यवीवृधत् ॥ ५३ ॥ जिनो जगाद भूपाल । यदावंदि च सत्वया ॥ तदा दुर्मुखदुर्वाक्य-श्रवणोत्पन्नमत्सरः ॥ ५४ ॥ मनसा निजसाम्राज्य-लंपटोऽरिभटैः समं ॥ युध्यमानोऽनवत्तेन । तस्योचेऽधोगतिर्मया ॥ ५५ ॥ युग्मं ॥ तीर्णकल्पे रणांभोधौ । क्षीणास्त्रः स निरैक्षत ॥ आयांतं मकरक्रूर-मेकं तुरगिणं पुरः ॥ ५६ ॥ सर्वं हि दोष्मतां शस्त्र-मिति नीतिं स्मरन्नसौ ॥ करं व्यापारयामास । शिरस्काय तमर्दितुं ॥ ५७ ॥ इव जंगलभूखंड-मंकेशं हरितांकुरं ॥ शिरः स्पृष्टवतस्तस्य । चारित्रं स्मृतिमाययौ ॥ ५८ ॥ स दध्यौ ह्री प्रमादो मे । यदादीयत दुर्धरैः ॥ कषायतस्करैर्ध्यान-धनं हृदि निधीकृतं ॥ ५९ ॥ आसन्ने वीरमार्तंडे । चेतःस्थश्रुतदीपके ॥ अपत्यप्रेमतमसा । जनोऽयं हंत बाध्यते ॥ ६० ॥ निश्चलैकैं-

ङ्कियमपि । तपोऽग्निः शुध्यति व्रती ॥ हतहस्तिहयव्रातः । शोत्स्यत्येष जनः कथं ॥ ६१ ॥ नावारिनिर्विनिन्नोऽस्मि । जयन् बाह्यानरीनहं ॥ हहा दग्धं गृहं शैला-नलं शमयतो मम ॥ ६२ ॥ ध्यायत्येवं मुनौ क्षाप । त्वया प्रश्नः पुनः कृतः ॥ तदा मृतः स सर्वार्थ-विमानसुखभाग्भवेत् ॥ ६३ ॥ चटत्प्रकर्षवैराग्य-वीचीनिर्धूतकल्मषः ॥ स प्राप केवलज्ञानं । तव प्रश्ने तृतीयके ॥ ६४ ॥ इत्याकर्ण्य प्रभोर्वाचं । दधानो विस्मयं परं ॥ श्रेणिकस्तमवंदिष्ट । मुनिमुन्निद्धभावनः ॥ ६५ ॥ न नाप्यव्यापारः शरविसरसंघट्टविषमो । न ढक्कानिर्घातः समिति न च कश्चिद्विनिहतः ॥ प्रसन्नेंदुः साधुर्नरकगतियोग्योऽजनि पुनः । यतश्चैतच्चेतः प्रशमरुचि कुर्वंतु यतयः ॥ ६६ ॥ इत्युपदेशचिंतामणिवृत्तौ प्रसन्नचंद्रकथा ॥

॥ मूलम् ॥—वयगुत्तीए साधू । पायं मोणेण वट्टए अहवा ॥ सच्चंपि य मणवज्जं । कज्जंमि पउंजए वयणं ॥ १ ॥ व्याख्या—वचसो वचनस्य गुप्तौ चिंत्यमानायां साधुः प्रायो मौनेन भ्रूहस्तादिसंज्ञामपि परिहृत्य तूष्णीभावेन वर्तते. प्रायोग्रहणं स्वाध्यायध्याने योगस्यानुज्ञातत्वात्. ननु एतावता यावज्जीवं यतिना मौनमेव कार्यं. नापणेऽग्रतत्वापत्तेरित्याह—

'अहवत्यादि'. अथवेति वाग्गुप्तेः प्रकारांतरसूचकं साधुवचनं प्रयुंक्ते, नापते इत्यर्थः. किं विशिष्टं वचनं? सत्यं, एकलक्षणत्वात्. असत्यामृषमपि इदं यद्भस्तुप्रतिष्ठाशयोच्यते तत्सत्यं, अस्ति जीवः कर्ता नोक्तेत्यादि. यच्च प्रतिष्ठाशां विनोच्यते तदसत्यामृषं. आमंत्रणाज्ञापनादिसत्यमपि प्रियं श्रोतुरिष्टं, अप्रियस्यासत्यप्रायत्वात्तदप्यनवद्यं, स पुनर्हे सखे! त्वं कृपिं कुर्वित्यादि उक्तिवत् सावद्यं. इदं हि सत्यप्रियमप्यसत्यप्रायं जीवघाताद्यारंभरूपत्वात्. अनवद्यमपि कार्ये प्रयोजने, न तु वातूलवद्यया तया. एवं च नापमाणस्याप्यस्य वाग्गुप्तिरेव. यदाहुः—समिउं नियमाणुत्तो। गुत्तो समियत्तणंमि नइयव्वो ॥ कुसलवयमुदीरंतो। जं चिय गुत्तोवि समिउंवित्ति ॥ १ ॥ अथ यदुक्तं सत्यमपि प्रियमेव ब्रूयात्तत्समर्थयन्नाह—

॥ मूलम् ॥—निवमंतिइब्भमाई। तहेव सद्देइ न पुण काणाई ॥ न य संदिद्धे कज्जे। नासं उद्धारिणिं वेइ ॥ २ ॥ व्याख्या—नृपो राजा, मंत्री सचिवः, इभ्यः श्रीमान्, ते आदयो येषां सामंतश्रेष्ठिसार्थवाहादीनां, तथैवेति यथा नृपत्वादि भावेन ते संति, तथैव शब्दयति आह्वयति. अयमर्थः—नृपतिं नृपतिमिति, मंत्रिणं मंत्रिणमिति, इभ्यं इभ्यमिति

ब्रूयात्. तथा चाचारांगे-जेयावन्ने तहप्पगारा तहप्पगारेहिं नासाहिं बूआ नो कुप्पंति माणवा तेयावि तहप्पगारा तहप्पगाराहिं नासाहिं अभिकंखक नासिज्जत्ति. न च काणादिष्वप्ययं न्यायोऽनुसर्तव्य इत्याह-न पुनः काणादीन् तथैव काणादिनाम्ना शब्दयति, तथा चागमः-तहेव-काणं काणत्ति । पंडगं पंडगंति वा ॥ वाहियं वावि रोगित्ति । तेणं चोरेत्ति न वएज्जा ॥ १ ॥ आदिशब्दात्कुष्ठिखंजादिपरिग्रहः. तथा न च संदिग्धे संदेहास्पदे च कार्येऽवधारिणीं एवमेवैतदित्येवंरूपां भाषां ब्रूते. ॥ २ ॥ तर्हि किं ब्रूते? इत्याह—

॥ मूलम् ॥—आउस्स न वीसासो । कज्जस्स बहूणि अंतरायाणि ॥ तम्हा साहूणं वट्ट-माणजोगेण ववहारो ॥ ३ ॥ व्याख्या—स्पष्टा, नवरं संदिग्धे कार्ये वर्तमानयोगमेव ब्रूयादित्यर्थः. ॥ ३ ॥ किं च—

॥ मूलम् ॥—दग्मे वसहे खज्जे । फले य थंभाइसमुचिए रुक्खे ॥ गिज्झे अन्ने जणया-इयत्ति सयणेवि न लवेइ ॥ ४ ॥ व्याख्या—वृषभान् कल्होडकान् दम्यान् धुर्यत्वयोग्यान्, फलानि आम्रफलादीनि खाद्यानि भक्षणार्हाणि, वृक्षान् स्तंभादेः समुचितान्. आ-

दिशब्दाज्झारपट्टकपाटपीठतोरणशय्यासनयंत्रादिपरिग्रहः. तथाऽन्नाद्यान् शाल्यादीनि प्राण्यङ्गानि लवनयोग्यानीति न लपतीति क्रिया सर्वत्र योज्या. साधुवचसः प्रतीतिपात्रत्वादमी वृक्षादयो दमनादिक्रियायाः प्राप्तकाला इति निश्चित्य श्रोतॄणां तत्र तत्र दमनादौ प्रवर्तनेन महारंभसंभवात्. तथा स्वजनान् पितृमातृभ्रातृभगिन्यादीन् हे जनकादय इति न लपति. आदिशब्दात् हे मातर्हे भ्रातर्हे भगिनीत्यादि. साधूनामलौकिकत्वेन लौकिकसंबंधोक्तावनधिकृतत्वात्. ॥ ४ ॥ पुनर्विशेषमाह—

॥ मूलम् ॥—राइसराईहिं कयाइ धीमं । पुट्ठो मुणी कूवतलायकज्जे ॥ अत्थित्ति नत्थि-
ति न वेइ पुण्णं । भवंति जं नूयवहंतराया ॥ ५ ॥ व्याख्या—राजानो मांडलिकाः, ईश्वरा युवराजानः, आदिशब्दाद्ग्रामाध्यक्षादयः, एभिः कदापि कूपतडागयोः, उपलक्षणत्वात्प्रपागसत्रादीनां च कार्ये, मम कूपादीन् कारयतः पुण्यमस्ति न वेति पृष्टो धीमान् सम्यगागमज्ञो मुनिः कारयेदं कूपादिकमस्त्यत्र महत्पुण्यं; मा चीकरस्त्वमेतन्नास्त्यत्र मनागपि पुण्यमित्युन्नयथापि न ब्रूयात्. अत्रोपपत्तिमाह—यद्यस्मात्कारणादस्ति पुण्यमिति वदतो भूतवधः

स्यात्, शोषसमये जलाश्रितशेवालाद्यनंतकायिकानां पूतरशंबूकजलूकामत्स्यमंडूकादीनां त्रसानां च प्रत्यक्षं विपत्तिवीक्षणात्. मत्स्यादीनामप्यन्योन्यं जीवनदर्शनाच्च. तथा नास्ति पुण्यमिति च वदतोंतरायदोष. स्यात्. बहूनां पशुपक्षिमनुष्याणां तृषार्त्तानां जलपानव्यवच्छेदात्. तस्मान्मौनमेवालंबेत. नेदृशेषु लौकिककार्येष्वस्माकं नापणाधिकार इति वा वदेत् यत्सूत्रकृदंगसूत्रं–तहा गिरं समारब्भ । अत्थि पुण्णंति नो वए ॥ अहवा नत्थि पुण्णंति । एवमेयं महव्वयं ॥ १ ॥ दाणट्ठयाइं जे पाणा । हम्मंति तसथावरा ॥ तेसिं सा रक्खणट्ठाए । तम्हा अत्थित्ति नो वए ॥ २ ॥ जेसिं तं उवकप्पेई । अन्नं पाणं तहाविहं ॥ तेसिं लाभंतरायंति । तम्हा नत्थित्ति नो वए ॥ ३ ॥ जे य दाणं पसंसंति । वहमिच्छंति पाणिणो ॥ जे य णं पडिसेहंति । वित्तिछेयं करंति ते ॥ ४ ॥ दुहओ वि न भासंति । अत्थि वा नत्थि वा पुणो ॥ आयंरयस्स हिचा । निव्वाणं पाउणंति ते ॥ ५ ॥ अथोपसंहारमाह—

॥ मूलम् ॥–सावज्जाणवज्जाणं । वयणाणं जो वियाणइ विसेसं ॥ पावरयेणं न लिप्पइ । कयावि सो कालियज्जोव ॥ ६ ॥ व्याख्या–यः परिशीलितप्रवचनसारः सावद्यानवद्य-

नां वचनानां विशेषं विज्ञानं जानाति, ज्ञात्वा च सावद्यपरिहारेणानवद्यमेव वचनं वक्ति, स-
कदापि कालिकार्यं इत्र पापरजसा न लिप्यते. ॥ ६ ॥ अथ कालिकाचार्यकथा--

पुरी तुरमिणीत्यस्ति । मणीव त्रासवर्जिता ॥ जितशत्रुनृपस्तत्र । सर्वत्र जगति प्रि-
यः ॥ १ ॥ तत्र द्विजप्रिया भद्रा । व्याघ्रवत्क्रूरतास्पदं ॥ प्रसूता तनयं दत्तं । द्यूतमद्यादिसें-
वितं ॥ २ ॥ सेवमानः स राजान-मवातप्रसरः शनै. ॥ सामंतान् भेदयामास । सरित्पूर इव
द्रुमान् ॥ ३ ॥ राज्यं दत्तः समादत्त । बध्वा राजानमन्यदा ॥ प्रायः स्वाश्रयनाशाय । ज-
वेल्लवणवत्खलः ॥ ४ ॥ प्रजापीडनजातेन । स्वजाते नार्चयन् द्विजान् ॥ चक्रे क्रतूनसौ रू-
रा-श्चागेष्वेव हि तादृशाः ॥ ५ ॥ जड्डायाः सोदरोऽन्येद्यु-स्तत्रोद्यानं समागतः ॥ श्रीकालि-
कगुरुः श्राद्धै-र्नंजे नृत्यैरिव प्रभुः ॥ ६ ॥ जड्डयानुदिनं प्रेर्य-माणः शमदमातुलं ॥ मातुलं
तमुपतस्थौ । दत्तोऽप्याह्लादवर्जितः ॥ ७ ॥ सर्वसाधारणं व्याख्या--वचो मेघांबुवद्गुरोः ॥
पीत्वा दत्तोऽवदत्क्रुद्धो । यागावां ब्रूहि किं फलं ॥ ८ ॥ विरोधन्नीरुणाज्ञाणि । गुरुणागमशालि-
ना वत्स पृच्छसि धर्मं चे-द्धर्मः स्याज्जीवरक्षया ॥ ९ ॥ ब्रूहि यज्ञफलं तावं-दिति तेनोदिते

पुनः ॥ सूरिरूचे न हिंसा स्यात् । कदाप्यायतिसुंदरा ॥ १० ॥ दत्तोऽथ स्माह साक्षेप-मा-
चार्य बधिरोऽसि किं ॥ यत्पृष्टः सैंधवं वर्त्म । वक्षि माखवपऊर्तिं ॥ ११ ॥ फलं पृच्छामि या-
गानां । ब्रूषे हिंसामसुंदरां ॥ जानासि तद् द्रुतं ब्रूहि । नो चेत्पाखंडमुत्सृज ॥ १२ ॥ निज-
प्राणान् पणीकृत्य । धैर्यमालंब्य सूरिणा ॥ अवादि सत्यमेवेति । यज्ञानां नरकाः फलं ॥१३॥
अथ दत्तोऽवदत्कोऽत्र । प्रत्ययः सूरिरालपत् ॥ त्वं श्वभिर्नंक्षितः कुंज्यां । पद्यसे सप्तमेऽह-
नि ॥ १४ ॥ कोऽत्रापि प्रत्ययो दत्ते-नेति पृष्टो गुरुर्जगौ ॥ दिने तत्रैव तेऽकस्मा-न्मुखे विष्ठा
पतिष्यति ॥ १५ ॥ अथ स्विद्यल्ललाटेन । रोषारुणदृशा भृशं ॥ दत्तेनावादि सूरींद्रः । कथं
त्वं तु विपत्स्यसे ॥ १६ ॥ समाधिनैव मर्तास्मि । गंतास्मि द्यां मृतोऽप्यहं ॥ इत्युक्ते गुरुणा
दत्तः । समुत्तस्थौ सहुंकृतिः ॥ १७ ॥ रुद्ध्वा निजभटैः सूरिं । दत्तः स्वगृहमागतः ॥ पावयन्न-
गरीरथ्या । निर्ययौ स्थात् समाधिना ॥१८॥ मतिमोहेन मन्वानः । सप्तमं षष्टमप्यहः ॥ कु-
र्वे शांतिकमाचार्या-सुन्निरयेति निर्ययौ ॥ १९ ॥ दत्तदुर्वृत्तनिर्विण्णै-स्तदानीं मूलमंत्रिभिः ॥
आकृष्य पंजराज्ज्ये । जितशत्रुर्न्यवेश्यत ॥ २० ॥ तदैको मांत्रिकः पुर्यां । विशन् वेगातुरो

व्यधात् ॥ मार्ग एव मलोत्सर्गं । जीतः पुष्पैः व्यधत्त च ॥ २१ ॥ सैव वाजिक्षुरोत्क्षिप्ता । दत्तस्य पथि गच्छतः ॥ विपच्छटा पयःकुंभ-इव विष्ठा मुखेऽविशत् ॥ २२ ॥ चमत्कृतस्तदास्वादा-च्छिपादकल्पुपाननः ॥ विज्ञाय तद्दिनं षष्ठं । दत्तः पश्चान्न्यवर्तत ॥ २३ ॥ अस्मन्मंत्रोऽमुनाद्यापि । नाज्ञायीति स मंत्रिभिः ॥ गृहमप्रविशन्नेव । वध्वा भूमिक्षुजेऽर्पितः ॥ २४ ॥ भूपः प्रातोदयः सूर्य । इव पापकृपाक्षये ॥ दत्तनामतमः कुंड्यां । गिरिदर्यामिवाक्षिपत् ॥२५॥ अधोऽग्नौ ज्वालिते कुंड्यां । मुक्ताः श्वानः क्षुधातुराः ॥ दत्तं कदर्थयामासुः । क स्वामिद्रोहिणः सुखं ॥ २६ ॥ अथ श्रीकालिकाचार्यो । जितशत्रुमहीभुजा ॥ पूज्यतेस्म प्रतिदिनं । न ह्यसौ गुणमत्सरी ॥ २७ ॥ कालिकार्यगुरुणा यथा वत्रः । सत्यमेव जगदे विपश्चिपि ॥ तद्भूदेव सुकृतार्थिभिः परैः । सुनृतं वचनमुच्यतां सदा ॥ २८ ॥ इत्युपदेशचिंतामणिवृत्तौ कालिकाचार्यकथा ॥ एवं वाग्गुप्तिमुक्त्वाथ कायगुप्तिमाह—

॥ मूलम् ॥—कायं तु निरुंभिज्जा । उस्सग्गेणासणंतरेणं वा ॥ कज्जे व पयट्टंतो । पए पए चिंतए जयणं ॥ ७ ॥ व्याख्या—साधुरुत्सर्गेण कायोत्सर्गेण, आसनांतरेण वा पद्मा-

दिना कायं शरीरं रुंध्यान्निश्चेष्टं कुर्यात्. न हि सर्वकालं निश्चेष्टत्वे निर्वाह इति कायगुप्तेर्विध्यंतरमाह—कार्ये गमनशयनादिके प्रयोजने जाते प्रवर्तयन् शरीरं, पदे पदे मा मम शरीरेण कोऽपि जीवोऽवधीदित्येवंरूपां यतनां चिंतयेत् ॥ ७ ॥ यतनारहितस्य दोषमाह—

॥ मूलम् ॥—गमणट्ठाणनिसीयण-तुयट्टणगहण निसिरणाइसु ॥ कायं असंवरंतो । वहंपि विराहउ होइ ॥ ८ ॥ व्याख्या—गमनं प्रतीतं, स्थानं ऊर्ध्वस्थानेन, निषीदनमुपवेशनं, त्वग्वर्त्तनं स्वपनं, ग्रहणं दंडकादेरादानं, सृजनं तस्यैव निक्षेपणं, आदिशब्दाद्भोजनापणादिपरिग्रहः. एषु स्थानेषु कायमसंवृण्वन् अयतनया चालयन् षण्णामपि प्रस्तावाज्जीवनिकायानां विराधको भवति. तत्रायतनया गमनादिकं कुर्वतः सचित्ततृणादिमर्दनात्पृथ्वीकायस्य, जलभाजनलोठनाद्अप्कायस्य, साग्निकमलातं स्पृशतोऽग्निकायस्य 'तेउवाउसहगउं' इति वचनाद्वायुकायस्य, हरितादिसंघट्टाद्वनस्य. संसक्तस्थानाद्यवर्जनात्त्रसकायस्यापि विराधनाऽनुपयुक्तस्य भावनीया. ॥ ८ ॥ अथ कायगुप्तौ दृष्टांतमाह—

॥ मूलम् ॥—जहियं पिहियंछिद्दं । पडमं वज्जाउहो तिउं पक्किमं ॥ गिरिगंजे थि-

रदेहो । जइज्ज तेणाणुमाणेण ॥ ए ॥ व्याख्या—गाथार्थः स्पष्टः, नावार्थस्त्वयं—स वज्रायुधस्तीर्थंकरजीवत्वाद्विशिष्टबलयुक्तो वर्षं कायोत्सर्गेण तिष्ठेत्, न च तथा परे हीनसंहननाः स्यातुं शक्ताः, तथापि तदनुसारेण यतितव्यं. सत्यां शक्तौ प्रत्यहं घटिकां मुहूर्तं वा कायोत्सर्गादिना स्थिरदेहेन भाव्यमित्यर्थः. ॥ ए ॥ वज्रायुधकथा तु लेशतो भाव्यते ॥ अथ वज्रायुधकथा—

जंबूद्वीपे प्राग्विदेह-मंडने श्रीसमुच्चये ॥ विजये मंगलावत्या-मस्ति पूः रत्नसंचया ॥ ॥ १ ॥ जगत्क्षेमंकरस्तत्र । राजा क्षेमंकरोऽजनि ॥ जिनस्य जनिता यस्य । नमस्या नाकिनिर्न कैः ॥ २ ॥ तस्याभूद्भूतमात्रायां । पत्न्यां वज्रायुधात्निधः ॥ सुतश्चतुर्दशस्वप्न-सूचितादद्भुतवैभवः ॥ ३ ॥ श्रीशांतिनाथजीवत्वा-दत्यद्भुतगुणाकरः ॥ सोऽध्यापितकलः काले । जनकेन व्यवाह्यत ॥ ४ ॥ पुत्रे यूनि क्षमाभारं । न्यस्य राज्योचितं नृपः ॥ स्वयं दधौ क्षमाभारं । सर्वज्ञसंयमोचितं ॥ ५ ॥ अचिरात्प्राप्तकैवल्यः । समासाद्यार्हती श्रियं ॥ विहरन् बोधयामास । क्षेमंकरजिनो जनान् ॥ ६ ॥ साधिताशेषविजयो । विजयोर्जितदोर्युगः ॥

वज्रायुध इव स्वर्गे । चक्री वज्रायुधोऽनवत् ॥ ७ ॥ अन्यदोद्यानमायांतं । चक्री तं धर्मच-
क्रिणं ॥ ववंदेऽवस्थितं देव-निर्मिते देशनालये ॥ ८ ॥ चक्री चिक्रीडिषुर्मुक्ति-वध्वा श्रुत-
जिनोदितः ॥ राज्यं न्यवेशयत्पुत्रे । सहस्रायुधनामनि ॥ ९ ॥ चतुःसहस्रा भूपानां । सत-
शत्या तनूरुहां ॥ सहितः स्वहिताथ्यैंष । प्रत्युपाश्वेंऽग्रहीद्व्रतं ॥ १० ॥ अधीतसूत्रो वसुधा-
वलये विहरन्नसौ ॥ विशिष्टध्यानसंधान-मनाः सिद्धगिरिं ययौ ॥ ११ ॥ तत्र सर्वांगिषु त्य-
क्त-वैरो वैरोचनाजिघे ॥ स्तंजे प्रतिमया तस्थौ । महर्षिर्वर्षमानया ॥ १२ ॥ इतश्चास्य भग-
वतो-ऽनतारेऽमिततेजसः ॥ त्रिपृष्ठस्यालकस्यासी-दश्वग्रीवो महारिपुः ॥ १३ ॥ तस्याभूतां
मणिकुंज-मणिकेतू तनूरुहौ ॥ तौ नवान् नूरिशो भ्रांत्वा । तपोऽज्ञानं वितेनतुः ॥ ७४ ॥
प्राप्तौ तेनासुरीं योनिं । पर्वते तत्र तं मुनिं ॥ प्रतिमास्थितमालोक्य । प्राग्वैरोल्लासमापतुः ॥
॥ १५ ॥ ततस्तावस्तकारुण्यौ । परमाधर्मिकाविव ॥ सिंहेभफणिनां रूपै-रुपद्रुद्रुवतुर्मुनिं ॥१६॥
अक्षोभं वीक्ष्य तं रक्षो-रूपं कृत्वाट्टहासिनौ ॥ निर्यज्ज्वालाकरालास्य-कोशौ भापयतःस्म तौ
॥ १७ ॥ तथाप्यक्षयिते तस्मि-न्नृपौ निष्कारणद्विषौ ॥ उपसर्गांतरं कर्तुं । यावत्प्रावर्तता-

निभो ॥ १८ ॥ तावत्त्रिदशराजस्य । वध्वः क्रमंकर ।जन ॥ वंदित्वा वलितास्तेन । पथाला-
कंत तं मुनिं ॥ १९ ॥ निजनैश्चल्यतः शैल-स्तंत्रं स .प्रतिपद्क्षयन् ॥ नवछिदे नवत्येव । मु-
निरेप नमस्कृतः ॥ २० ॥ एवं विज्ञावयंत्यस्ता । दिव्याज्ञरणनासुराः ॥ मुनिमानंतुमानंदा-
ज्ञिरेमौलिवत्रातरन् ॥ २१ ॥ वीक्ष्य ता अकृतालोका । आयांतीर्दीपिका इव ॥ नेशतुर्ध्वां-
तनाशंतो । दैत्यो सम्यग्दृगप्रियो ॥ २२ ॥ प्रीत्या प्रणम्य लुठित-देहाश्चापसृता इव ॥ रु-
पेः पुरः पुरुहूत-प्रिया नाट्यं वितेनिरे ॥ २३ ॥ योजितांजलयः सर्वाः । स्तुत्वा सत्त्वाधिकं
मुनिं ॥ पुण्याढ्यं मन्यमानाः स्वं । ताः स्वस्थानं प्रपेदिरे ॥ २४ ॥ वज्रायुधोऽपि जगवान् । न-
गमूर्द्धनि वत्सरं ॥ स्थित्वा पूर्णप्रतिज्ञोऽथ । विजहे वसुधातले ॥ २५ ॥ यदि मृदुलशरीरो
वत्सरं वज्रसाधुः । शिखरिशिरसि कायोत्सर्गमेवं व्यधत्त ॥ तदिह बहुलसत्त्वाः साधवोऽन्ये-
ऽपि दूरी-कृतदुरितसमूहे तत्र तन्वंतु यत्नं ॥ २६ ॥ इत्युपदेशचिंतामणिवृत्तौ वज्रायुधक-
था ॥ तदेवमुक्ता कायगुप्तिः, तदुक्तौ चोक्तास्तिस्रोऽपि गुप्तयः, तन्नणने च नणिताः समद-
शापि संयमनेदाः ॥ अथ प्राप्तसर्वविरतिर्येषामाश्रयणीयो नवति, तान् गुणानाह—

॥ मूलम् ॥—चिट्ठंति गुम्कुले गुरु-जणंमि न हु चोइयावि कुप्पंति ॥ उस्सासाइं मुंचुं । करंति गुरुसक्कियं सव्वं ॥ १० ॥ व्याख्या—इह साधव इति कर्तृपदं सर्वत्राप्रयुक्तमपि गम्यते. बहुवचनं च गच्छवासित्वेन आचार्योपाध्यायादिवैचित्र्यज्ञापनार्थं. तेनेते गुणाः प्रायः स्थविरकल्पापेक्षा इति प्रतिपत्तव्यं. साधवो गुरूणां कुलं साधुसंतानरूपं तत्र तिष्ठंति. ज्ञानादिलाभहेतुत्वात्, उक्तं च विशेषावश्यके-नाणस्स होइ भागी । थिरयरओ दंसणे चरित्ते य ॥ धन्ना आवकहाए । गुरुकुलवासं न मुंचंति ॥ १ ॥ तीक्ष्णवचनादिना नोदिता अपि गुरुजने न कुप्यंति. यदाह-गुरवस्ताडयन्तोऽपि । नवंति हितहेतवः ॥ घर्षयन्नपि रत्नस्य । तेजसे मणिकारकः ॥ १ ॥ तथोन्नवासादिकं मुक्त्वा सर्वं कर्तव्यं गुरुसाक्षिकं कुर्वंति. आदिग्रहणादन्याप्युन्नवासतुल्यं मेषोन्मेषादिकमल्पकार्यं गुर्वादेशं विनापि कुर्वंतीति भावः. ननु ये साधवो गुरुभ्यो दूरदेशस्थास्ते कथं सर्वं गुरुसाक्षिकं कुर्वंतीत्युच्यते. तेऽपि गुरुं स्थापयित्वा तत्पुरः सामाचारीं प्रयुंजते. उक्तं चौघनियुक्तौ-संविग्गसन्निमद्दग-अहप्पहाणेसु भोइयघरेसु ॥ ठवणा आयरियस्सउ । सामायारीपउंजणया ॥ १ ॥

मुनयो हि दंभिकादिकमप्याचार्यं कल्पयंति, निराबाधप्रदेशोऽयं ममाचार्य इति, तस्य चाँ-
ग्रतः सकलां चक्रवालसामाचारीं प्रयुक्त इति. तथा—

॥ मूलम् ॥—पासत्थपरिचयं परि-चयंति वज्जंति तह ऋणायगणं ॥ न चयंति य अ-
हिगरणं । अजियलाभं न भुंजंति ॥ ११ ॥ व्याख्या—ज्ञानादिगुणेभ्यः पार्श्वे पृथक् तिष्ठं-
तीति पार्श्वस्थाः, एकग्रहणे तजातीयस्यापि ग्रहणमिति न्यायादवसन्नादयोऽप्यत्र ग्राह्याः. त-
त्रावसीदंतिस्म क्रियाशैथिल्यान्मोक्षमार्गश्रांता इवावसन्नाः. तथा कुत्सितं ज्ञानादित्रयविरा-
धकं शीलं स्वभावो येषां ते कुशीलाः. तथा संविग्नासंविग्नसंसर्गाद्गुणैर्दोषैश्च तद्भावे संस-
जंतिस्मेति संसक्ताः. तथा यथा यथाकथंचिदागमनिरपेक्षः सर्वकार्येषु छंदोऽभिप्रायो येषां
ते यथाछंदाः. एतैः सह परिचयमालापादिकं संस्तवं परित्यजंति. उक्तं च—आलावो संवा-
सो । विसंतो संथवो पसंगोय ॥ हीणायारेहिं समं । सव्वजिणिंदेहिं पडिकुट्ठो ॥ १ ॥ अप-
वादस्तु पर्यायादिभिः कारणैः पार्श्वस्थादिभिरपि सहालापादिकं कुर्वतामपि न दोषः, यदा-
गमः—वायाइनमुक्कारो । हत्थुस्सेहो य सीसनमणं च ॥ संपुच्छणत्थयणं थोत्त वंदणं वंदणं या-

वि ॥ १ ॥ परियाय पसिपुरिसं । खित्तं कालं च आगमं नाउं ॥ कारणजाए जाए । जहारिहं जस्स जं जोग्गं ॥ २ ॥ तथा नञः कुत्सार्थत्वात् कुत्सितमायतनं पार्श्वस्थादिप्रतिबद्धं स्त्रीपश्वादियुक्तं वा स्थानं परतीर्थं वा, यत्र स्थितानां ज्ञानादयो गुणा हीयंते तदुर्जयंति. अपवादतस्तु अन्यस्थानकाभावे तत्रापि यतनया तिष्ठतीति. तथाधिकः क्रियते संसारोऽनेनेत्यधिकरणं, उपशमितकलहवर्धनं वचो न वदंति, चकारान्न वादयंत्यपि. उक्तं च—"जेणं परं पज्जोसवणाउ अहिगरणं चयइ, से णं निज्जूहियव्वे सिया". तथार्यिकाणां साध्वीनां लाभं तदानीतमशनादीत्यर्थः, न भुंजते, तासु दानस्यैवानुज्ञातत्वात्. अनेन चतुर्भंगी सूचिता. यत्पंचकल्पभाष्यं—संविग्गसंजयाणं । दिज्जइ घिप्पइय पढमभंगो य ॥ सजइवग्गे दिज्जइ । नवि घिप्पइ कारणे बीअं ॥ १ ॥ गिहिअन्नतित्थियाणं । नवि दिज्जइ घिप्पइ य नवेरं च ॥ नवि दिज्जइ नवि घिप्पइ । पासत्थाईण सव्वेवि ॥ २ ॥ अपवादस्तु ग्लानत्वादौ कार्ये साधुपरिकराभावे आर्यिका लाभमपि भुंजतेऽश्निकापुत्रवत् ॥ ११ ॥ तथा—

॥ मूलम् ॥—सीयंति नाणयाम । अवगाढ [illegible]

थव्व । कुक्कुयकंदप्पहासेहिं ॥ १२ ॥ व्याख्या—आपत्सु रोगाद्यानदुर्भिक्षादिषु, हा अथ कथं निर्वहिष्यामः इति न सीदंति न ग्लायंति. तथा प्रमादस्यानुपयुक्ततारूपस्यावकाशं न ददति. तथा कौकुच्यं भ्रूनेत्रचेष्टा, कंदर्पानुविद्धाः कथा अपि कंदर्पः, हास्यव्यंजिकाश्च कथा अपि हास्यं, एतैरन्य श्रोतारं न विस्मापयंति, यथा श्रुतया श्रोतॄणां कंदर्पः प्रसर्पति, हास्यं च समुन्मीलति, तां कथां न कथयंतीत्यर्थः. उक्तं च-कंदप्पकुक्कुयाहिं । तह सीलसहावहसणविगहाहिं ॥ विम्हावंतो य परं । कंदप्पत्तावणं कुणइ ॥ १ ॥ १२ ॥ किंच—

॥ मूलम् ॥—पावसूयाणि न सिक्खंति । जाणमाणावि नो पउंजंति ॥ तेइत्थजोइजो-इस-रसथंजणमंततंताइं ॥ १३ ॥ व्याख्या—पापश्रुतान्येकोनत्रिंशद्भेदानि, उक्तं च-अट्ठनिमित्तंगाइं । दिव्वुप्पायंतलिक्खभोमं च ॥ अंगं सरलक्खणवंज-णं च तिविहं पुणेक्किक्कं ॥१॥ सुत्तं वित्ती तह वित्तिय च । पावसुयमिउणतीसविहं ॥ गंधव्वनट्टवत्थु । आउंधणवेयसंयुत्तं ॥ २ ॥ एतानि न शिक्षंते नाध्यस्यंते. अपवादतस्तु संघकार्ये शिक्षंते. तथा जानंतोऽपि न प्रयुंजंते चैकित्स्यादिकं. तत्र चिकित्साया कर्म चैकित्स्यं वैद्यकं. योगाः पादलेपाद्याः,

ज्योतिषं निमित्तं, रसः पीतादिधातुः, अंजनं अदृश्यीकरणादि, मंत्रा गारुड्याः, तंत्राणि कार्मणादीनि, आदिशब्दत्कौतुकभूतिकर्मादयः. उक्तं च-जोइसनिमित्तअक्खर-क्खोड य आएसभूइकम्मेहिं ॥ करणाणुमोयणेहिं य । साहुस्स तवक्खउं दोइ ॥ १ ॥ अपवादतस्तु तीर्थप्रभावनार्थं प्रयुंजाना अपि प्रभावका एव श्रीकालिकार्यवत्. ॥ १३ ॥ अन्यच्च—

॥ मूलम् ॥—सोहंति वत्थसिज्जाइ। झूसणे न य विही विरुज्झंति ॥ निच्चं संविग्गमणा। न-ज्झंति अकालसज्झायं ॥१४॥ व्याख्या—वस्त्रशय्यादिझूषणानि शोधयंति टालयंतीत्यर्थः. इह वस्त्रं त्रिधा, एकेंद्रियविकलेंद्रियपंचेंद्रियावयवत्वात् तत्राद्यं कार्पासिकादि, द्वितीयं कौशेयकादि. तृतीयं तूर्णादिमयं. एतेषु कौशेयकादिकंकारणे एव ग्राह्यं. एतदपि जघन्यमध्यमोत्कृष्टभेदात्प्रत्येकं त्रिधा. तत्र जघन्यं मुखपोतिकाद्यं, मध्यमं चोलपट्टाद्यं, उत्कृष्टं प्रच्छदादि. एतदपि पुनः प्रत्येकं यथाकृताल्पबहुपरिकर्मभेदात्त्रिधा. एषु आद्याद्याभावेऽग्रेतनमग्रेतनं ग्राह्यं. वस्त्रस्य च झूषणानि प्राय आहारझूषणतुल्यानि, आहारदोषाश्च पुरतो वक्ष्यंते, ततस्तद्दोषा अपि ततोऽवसेयाः. सामान्यतस्तु-जं न तयट्ठा कीयं। नेव चुअं नेव गहियमन्नेहिं ॥ आहडपामिच्चं व-ज्जिऊण जं

कप्पए वत्थं ॥ १ ॥ किंच-वर्षाकाले वस्त्रं न ग्राह्य, वर्षानंतरं च तत्र क्षेत्रे मासद्वयं यावत्, यत्पंचकल्पभाष्यं-वत्थाईणं गहणं । नाणुन्नायं तु होइ वासासु ॥ वासाईण परेणं । दुमासे अन्नेसु गिह्णंति ॥ १ ॥ शय्या वसतिः, सापि दोषरहितैव ग्राह्या, यदाह-मूलुत्तरगुणसुद्धं । थीपसुपंडगविवज्जियं वसहिं ॥ सेविज्ज सव्वकालं । विवज्जिउं हंति दोसाउ ॥ १ ॥ तत्रामी मूलगुणाः-पिट्ठीवंसं दो धा-रणाउ चत्तारि मूलवेलीउ ॥ मूलगुणे दुववेया । एसाउ अट्ठा-गमा वसही ॥ १ ॥ व्याख्या--पृष्ठवंशो मध्यवलकः, द्वे धारिणौ बृहत्यौ, यत्प्रतिष्ठोऽसा-वेव, चत्तस्रो मूलवल्यौ, याश्चतुर्षु गृहपार्श्वेषु ध्रियते. एते सप्तापि मूलगुणाः, शेषाः स्तंभ-नित्यादय उत्तरगुणाः, एतैः शुद्धा वसतिर्ग्राह्या. अन्ये चामी वसतिदोषाः-कालाइक्कं तु व-ट्ठाणा-भिक्कंत अणभिक्कंता य॥ वज्जाय महावज्जा। सावज्ज महप्प किरिया य॥१॥ (कालाति-क्रांता, उपस्थापना, अभिक्रांता, अनभिक्रांता, वर्ज्या, महावर्ज्या, सावद्या, महासावद्या, अल्पक्रिया चेति नव वसतिदोषाः.) ऋतुबद्धे वर्षासु वा यत्र वसतौ स्थितास्तत्रैव मासे चातुर्मासिके वा पूर्णेऽपि तिष्ठतां कालातिक्रांता १. ऋतुबद्धे यत्र मासकल्पः कृतस्तत्रैव द्वौ

मासौ वर्षासु यत्र चातुर्मासी स्थितास्तत्र चाष्टौ मासानपरिहृत्य पुनः समागच्छतामुपस्थाना २. यावदर्थिकार्थं कृता शय्या, सा यद्यन्यैश्चरकादिपाखंडिभिर्गृहस्थैर्वा युक्ता भवति, तदनंतरं च संयता आयांति तदाभिक्रांता ३. सैवान्यैरपरियुक्ता सती साधुभिः सेव्यमानाऽनभिक्रांता ४. तथा आत्मार्थं कृता साधुभ्यो दत्वा स्वार्थमन्यां कुर्वतो गृहस्थस्य वर्ज्येति ५. तथा पाखंडिनामर्थाय कृता महावर्ज्या ६. पंचानां श्रमणानामर्थाय कृता सावद्या ७. साधूनामेवार्थाय कृता महासावद्या ८. या पुनरेतद्दोषाष्टकवर्जिता साल्पक्रिया शुद्धेत्यर्थः ९. आदिशब्दात्पात्रकादिपरिग्रहः. पात्रमप्येकेंद्रियविकलेंद्रियपंचेंद्रियभेदात् त्रिधा. तत्रैकेंद्रियावयवजं तुंबकादि, विकलेंद्रियदेहजं शंखशुक्त्यादि. पंचेंद्रियदेहजं कृतुपदंतशृंगपात्रादि. अत्रौघतः प्रथममेव ग्राह्यं. तदपि तुंबकदारुमृत्तिकारूपत्वात् त्रिधा. तदपि प्रत्येकं जघन्यादिभेदात् त्रिधा. तत्र जघन्यमुदंचकादि, मध्यमं मात्रकं, उत्कृष्टं पतद्ग्रहः. पुनरप्येकैकं त्रिधा, यथाकृताल्पबहुपरिकर्मभेदात्. पूर्वपूर्वाभावे चेहोत्तरं ग्राह्यं. द्वितीयपदे शुद्धाऽलाभेऽशुद्धमपि पंचकपरिहान्या गृह्यंति. उक्तं च—
"सोद्दंतो य इमे तह जइज्जा सव्वत्थ पणगहाणीएत्ति" तथा न च मिथः परस्परं विरुध्यं-

ते कलहायंते प्रीत्या निर्वहतीत्यर्थः. यदागमः-जइ इक्कभाणजिमिया । गिहिणोवि यदीह मित्तिया हुंति ॥ जिणवयणबहिप्पुया । धम्मं पुणं अयाणंता ॥ १ ॥ किं पुण जगजीवसु-हा-वहेण संजुंजिऊण समणेणं ॥ सक्काइ इक्कुमिको । चीउं विवरखिउं देहो ॥ २ ॥ तथा नित्यं संविग्नमनसो मोक्षाभिलाषिणो विरक्तत्वात् यो यस्य श्रुतस्य पठनपरावर्त्तनादियोग्यः कालः. यथा कालिकस्योत्तराध्ययनादेरस्वाध्यायिकवर्जे दिवसनिशाप्रथमचरमपौरुष्यौ, उत्का-लिकस्य तु दशवैकालिकादेः "संजमघाउं १ प्पाए २ । सादिवे ३ वग्गुहे य ४ सारीरे ५" इति पंचविधास्वाध्यायिकवर्जे कालवेलावर्जे च सर्वमप्यहोरात्रं पठितुं कल्पः, तद्व्यतिरि-क्तस्त्वतादृशः, तस्मिन्नकाले स्वाध्यायं वर्जयंति. ॥ १४ ॥ तथा—

॥ मूलम् ॥—वज्जंति निच्चवासं । सिज्जायरराय नियय पिंडे उ ॥ उग्गावयायविऊ । अणहे दिक्कंतिन कयावि ॥ १५ ॥ व्याख्या—एकक्षेत्रे नित्यवासं वर्जयंति, उक्तं च—पन्निवं धो बहुअत्तं । न जणुवयारो न देंसविन्नाण ॥ नाणाईण अवुड्ढी । दोसा अविहारपक्कंमि ॥ १ ॥ जो गाउयं समत्थो । सूरादारुन्न जिकवेलं जा ॥ विहरउ एसो सपर-क्कमो य नो

विहरइ तेण परं ॥ २ ॥ अपवादतस्तु यतनया चिरमप्येकक्षेत्रे वसतां न दोषः. यदाह-पंचसमिया तिगुत्ता । उज्जुत्ता संयमे तवे चरणे ॥ वाससयंपि वसंता । मुणिणो आराहगा भणिया ॥ १ ॥ तथा पिंडशब्दस्य सर्वत्र संबंधात् शय्यातरपिंडं, राजपिंडं, नियतपिंडं च वर्जयंति. तत्र शय्याया आश्रयदानेन तरति संसाराब्धिमिति शय्यातर उपाश्रयदाता गृहस्थः, तस्य पिंडः शय्यातरपिंडः. तत्रेयं सामाचारी-यस्मिन्नाश्रये स्थिताः साधवस्तस्य यद्येकः प्रजुस्तदा तमेव, बहवश्च चेत्प्रभवस्तदा सति निर्वाहे सर्वानपि, अनिर्वाहे तु परिपाट्या एकैकं वर्जयंति, तद्दत्तमशनादिचतुर्दशकं न गृह्णंतीत्यर्थः. यदाह-असणाइया चउरो । पाउंछणयं तथ पत्तकंबलयं ॥ सूइच्चुरं कन्नसोहण-नहरणिया सागरियपिंडो ॥ १ ॥ तृणादिकं तु गृह्णंत्येव. यदाह-तणडगलछारमल्लग-सिज्जासंथारपीढलेवाई ॥ सिज्जायरस्स पिंडो । न होइ सेहो य सोवहिउ ॥ १ ॥ यदा चाश्रयसंकीर्णतया भिन्नोपाश्रयेषु वसंति, तदापि सर्वान् वर्जयितुमक्षमा आचार्याः शय्यातरं वर्जयंत्येव. स च शय्यातरो लिंगमात्रधारिणोऽपि वर्ज्यः. अर्हन्निषिद्धतादिदोषदुष्टत्वात्. यदाह-लिंगत्थस्स उ वज्जो । तं परिहरउव्व चुंजउ वावि ॥

जुत्तस्स अजुत्तस्स व। रत्तासणो तत्थ दिट्ठंतो ॥ १ ॥ अयं च प्रातरावश्यके कृते स्नाते वा विहिते जवति, नान्यथा. उक्तं च-जइ जग्गंति सुविहिया। करंति आवस्सयं च अन्नत्थ ॥ सिज्जायरो न होई। सुत्ते व कए व सो होइ ॥ १ ॥ निर्गमनकालादेकदिनातिक्रमे शय्यातरो जवति, "चुत्थे वज्जंतहोरत्तं" इति वचनात्. विशेषश्चात्र-सूरत्थमणे दिण नि-ग्गयारो जवति, "चुत्थे वज्जंतहोरत्तं" इति वचनात्. विशेषश्चात्र-सूरत्थमणे दिण नि-ग्गयाण सूरोदये अ सागरिउं ॥ अत्थमियनिग्गयाणं। वारसजामाउ सागरिउं ॥ १ ॥ द्वितीयपदे तु ग्लानाद्यालंबनैः शय्यातरपिंमपि यतनया गह्नतां न दोषः. उक्तं च-दुविहे गिलंमि। निमंतणे दवदुल्लहे असिवे ॥ उमोअरिय पउसे। नये अ गहणं अणुन्नायं ॥ १ ॥ यतना चेयं-तिक्खुत्तो अ सखित्ते। चउद्दिसिं मग्गिऊण गीयत्थो ॥ दवंमि दुल्लहंमि। सिज्जायरसंतिए गहणं ॥ १ ॥ तथा राज्ञो मूर्द्धाभिषिक्तस्य पिंमो राजपिंमः, स चाष्टधा-असणाइया चउरो। वत्थं पायं च कंबलं चेव ॥ पाउंछणगं च तहा। अठविहो रायपिंमो उ ॥१॥ अयं च पूर्वपश्चिमजिनसाधूनां निषिद्धो व्याघातादिदोषसंजवत्वात्. ॥१६॥ तथाहि—

॥ मूलम् ॥—इंसरपत्तिइंहिं तहिं। वाघाउ खऊलो हु दाराणं ॥ दंसणसंगो गरहा।

इयरेसिं न अप्पमायाउं ॥ १७ ॥ व्याख्या—ईश्वरादिभिः प्रविशद्भिर्निर्यद्भिश्च तत्र राजभवने साधोर्व्याघातः स्खलना स्यात्, अमंगलबुद्ध्या हननं वा स्यात्. संमर्दात्पात्रभंगश्च. 'लुहत्ति' प्रचुरान्नादिलाभे लोभश्च स्यात्. उदाराणां पुंस्त्यादीनां दर्शने संगोऽभिष्वंगः स्यात्. तथाहो राजप्रतिग्रहमप्येते न त्यजंतीति गर्हा स्यात्. इतरेषां मध्यमजिनसाधूनां नैते दोषाः, कुतः? अप्रमादात्. तथा इदमेतावन्मात्रमहं तुभ्यं दास्यामीत्युक्तवतो गृहस्थस्यायोऽशनादिलाभः स नित्यपिंडः, वर्ज्यश्चायमाधाकर्मादिदोषसंभवात्. यदाशैवैकाह्निकचूर्णिः-" नियागं नाम नियएंति वुत्तं भवइ, तं तु यदा आयरेण आमंतिउं भवइ, जहा भयवं तुब्भेहिं मम दिणे दिणे अणुग्गहो कायव्वो, तदा तस्स अप्पुवगहंतरस्स नियागं भवइ, न तु जत्थ अहाभावेणं दिणे दिणे निक्का लप्पेइत्ति ". तयोत्सर्गापवादविदः, तत्र सामान्येनोक्तो विधिरुत्सर्गः, यथा-" वासावासं पज्जोसवियस्स निच्चभत्तस्स भिक्खुयस्स कप्पइएगं गोयरकालं गाहावइकुलं भत्ताए वा पाणाए वा निक्खमित्तए वा पविसित्तए वा. " तद्बाधनाय कारणापेक्षो विशेषोक्तो विधिरपवादः. यथा-" आयरियवेयावच्चेण वा, उवज्झायवेयावच्चेण वा, तम्मिसगिलाणवे-

यावद्येण वा, खुड्डएण वा, खुड्डियाए वा अवंजण जायएणंति ". एतद् ह्रयं सम्यग् ज्ञात्वा उत्स-
र्गं उत्सर्ग, अपवादे च ग्रासेऽपवादं , एवं उत्सर्गं चापवादं सेवमानो गीतार्थ आराधकश्च.
यदाहुः—उस्सग्गे अववायं । आयरमाणो विराहउ होइ ॥ अववाए पुण पत्ते । उस्सग्ग
निसेवउ हवइ ॥ १ ॥ अनेकांतवादस्वरूपं हि जिनप्रवचनं. उत्सर्गेणापवादेन वा यथाधि-
को लाभस्तथैव प्रवर्तति. उक्तं च-तम्हा सव्वाणुन्ना । सव्वनिसेहो य पवयणे नत्थि ॥ आ-
यं व्ययं तुलिज्जा । लाहाकंखिव्व वाणिउं ॥ २ ॥ उत्सर्गापवादविधिश्च साधुगुणेषु यथास्थानं
ज्ञापित एव. तथाऽनलानयोग्यान्न कदाचिद्दीक्ष्यंति. यदाह-अट्ठारस पुरिसेसु । वीसं इत्थि-
सु दस नपुंसेसु ॥ पव्वावणा अणरिहा । इय अणला साहिया सुत्ते ॥ १ ॥ तत्र दीक्षान-
र्हाः पुरुषा अष्टादश, तद्यथा-बाले वुड्ढे नपुंसे य । जड्डे कीवे य वाहिए ॥ तेणे रायावगा-
री य । उम्मत्ते य अदंसणे ॥ १ ॥ दासे दुट्ठे य मूढे य । अणत्ते जुंगिएइ य ॥ उब्भऊए
य जयए । सेहनिप्फेडिए इ य ॥ २ ॥ तत्र सप्ताष्टो वर्षाणि यावद्बालः, षष्टेः सप्ततेर्वा वर्षं-
र्ध्व उपरि वृद्धः . न स्त्री वा पुमान्नपुंसकः. यः स्त्रीभिर्निमंत्रितोऽसंवृत्तां वा स्त्रियं दृष्ट्वा सं-

जातकामाग्निलापो वेदोदयमधिसोढुं न शक्नोति स क्लीवः. जन्मस्तु त्रिधा. जात्यया शरीरेण क्रियया च. जात्याजन्मोऽपि त्रिधा, जलमूकः, मन्मनमूकः, एलकमूकश्च. यो जलमग्न इव बुम्बुकायमानो वक्ति स जलमूकः. यस्य तु वदतः खच्यमानमिव वचः स्खलति स मन्मनमूकः. य स्त्वेलक इवाव्यक्तं मूकतया शब्दमात्रमिव करोति, स एलकमूकः. पथि भिक्षाटने वंदनादिषु चातिस्थूलतयाऽशक्तः शरीरजन्मः. क्रियां प्रतिक्रमणप्रत्युपेक्षणादिकां पुनः पुनरुपदिश्यमानामपि जन्मतया यो ग्रहीतुं न शक्तः स क्रियाजडः. कुष्ठजगंदरादिरोगैर्ग्रस्तो व्याधितः. क्षात्रखननमार्गपातनादिचौर्यनिरतः स्तेनः. श्रीगृहांतःपुरनृपदेहतत्पुत्रादिद्रोहकृद्राजापकारी. यक्षादिना महामोहेन वा वैकल्यं नीत उन्मत्तः. अंधस्यानर्थनिर्जोदयवांश्चादर्शनः. दासेति, गृहदास्या जातोऽर्थादिना वा क्रीतः, ऋणार्थं वा धृतो दासः. दुष्टो द्विधा, कषायदुष्टो विषयदुष्टश्च. तत्र सर्षपनर्जिकान्निनिक्षिप्तसाध्वादिवदुत्कटकषायः कषायदुष्टः. अतीवयोषिदादिषु गृद्धो विषयदुष्टः. अज्ञानाद्धृदयशून्यो मूढः. ऋणार्त्तः प्रतीतः. जातेकर्मशरीरादिनिर्दूषितो जुंगितः. तत्र मातंगकोलिकमूषिकादयोऽस्पृश्या जातिजुंगिताः.

नखक्षालनशोकारिकत्वागुरिकत्वादिनिद्यकर्मकारिणः कर्मजुंगिताः. करचरणकर्णादिवर्जिताः शरीरजुंगिताः. अर्थार्थं विद्यार्थं वा इयंति दिनानि त्वदीयोऽहमित्येवं येनात्मनः परायत्ता कृता स्यात् सोऽवबद्धः. रूपकादिमात्रया क्रीत्वा धनिनामादेशकरणाय प्रवृत्तो क्रीतकः. शिष्यस्य दीक्षितुमिष्टस्य निस्फेटिकाऽपहरणं शिष्यनिस्फेटिका. उपलक्षणमिदं, मातृपित्रादिनिरपेक्षननुज्ञातस्य. इत्यष्टादशपुरुषेषु दीक्षाऽनर्हा. एतान् दीक्षयतः शासनोड्डाहसंयमात्मविराधनादयो दोषाः. कारणे तु केषांचिदेषु दीक्षानुज्ञातैव वैरस्वाम्यादिवत्. एत एव दोषाः स्त्रीणामपि वाच्याः. गुर्विणी बालवत्सा चेति द्वौ पुनरधिकौ, तेन तासां विंशतिर्दोषाः, उक्तं च—इय अट्ठारस नेया । पुरिसस्स तहित्थियाए तह चेव ॥ गुव्विणी बालवच्छा । दुन्नि इमे हुंति अन्नेवि ॥ १ ॥ नपुंसकस्य तु षोडश नेदा आगमेऽभिहिताः, तेषु दश सर्वथा दीक्षाऽनर्हा अतिसंक्लिष्टत्वात्. ते चामी-पण्ढए वाइए कीवे । कुंभी ईसालुयत्तिय ॥ सोणी तक्कम्मसेवी य । पक्किया पक्किएइया ॥ १ ॥ सोगंधिए य आसत्तो । दस एए नपुंसया ॥ संकिलिट्ठत्ति साहूणं । पव्वावेउं अकप्पिया ॥ २ ॥ एषां स्वरूपं निशीथनाम्न्यादवसेयं. षट्

पुनः प्रव्राज्याः, तद्यथा–विच्छिए चिप्पिए चेव। मंतणसहिउवहए॥ इसिसत्ते देवसत्ते। पवावि-
ज्ज नपुंसए॥ १॥ आयत्यां राजांतःपुररक्षार्थं बाल्येऽपि वेदं दत्त्वा यस्य मुष्कौ गाढ्येते स
वर्धितकः १. यस्य तु जातमात्रस्यांगुष्ठांगुलीभ्यिर्मृदित्वा मुष्कौ क्षाम्येते स चिप्पितः २. एवं
च कृते एतौ नपुंसकवेदोदयं प्राप्नुतः. कोऽपि मंत्रेण, कोऽप्यौषध्या, अन्यस्तु ऋषेः शापा-
देवशापाच्च तदुदयं लभते, इत्येते पंचापि प्रव्राज्याः. ॥ १५ ॥ तथा—

॥ मूलम् ॥—होउ डिकारो मा वा। पुण नारीणं न वीससंति जउं॥ संते अवसंते
वा। विसंमि को विससइ अहिणो॥ १६ ॥ व्याख्या—स्पष्टा, अन्यच्च—

॥ मूलम् ॥—अट्ठमछट्ठचउत्थं। करंति वरिसचउमासपक्खेसु॥ संजमजत्ताहेउं।
नुंजंति न रूववलहेउं॥ १७ ॥ व्याख्या—वर्षसमापको दिवसोऽपि वर्षं ज्येष्ठपर्व, तत्राष्टम-
मुपवासत्रयं. चतुर्माससमापको दिवसोऽपि चतुर्मासकं चातुर्मासिकं पर्व. तत्र षष्टमुपवासद्वयं.
पक्षसमापको दिवसोऽपि पक्षः पाक्षिकं, तत्र चतुर्थमेकमुपवासं कुर्वंति. एतत्प्रायिकीं वृत्तिमा-
श्रित्योक्तं, अन्यथा सत्यां शक्तौ अधिकमपि तपः सेवंते, अशक्तौ तु हीनमपि. यदपरेषु दिवसे

पु जुंजते, तदपि संयमयात्राहेतु. ईर्यागुप्तिलाघवप्रतिलेखनादिक्रिया न ग्रासमात्र वना ।नव-

हतीति बुद्ध्या, न पुना रूपबलहेतुं, यात्राशब्दोऽत्र निर्वाहार्थः. ॥ १७ ॥ तथा—

॥ मूलम् ॥—वसहिं सया विवित्तं। संयमजुग्गं अडूसियं खित्तं ॥ गीयत्थं च सहायं। इच्छं-

तुवहिं अवदुमुच्चं ॥१७॥ व्याख्या—इच्छंतीति क्रियायाः सर्वत्र संबंधात्, वसतिं शय्यां सदा वि-

वित्तां स्त्रीपशुपंडकादिरहितां इच्छंति. क्षेत्रं नगरग्रामाद्यं संयमयोग्यं अडूपितं च पार्श्वस्थादिनि-

रिच्छंति. संयमयोग्यता च क्षेमादिगुणयुक्तस्यैव क्षेत्रस्य भवति. यदाह—खेमो सिवो सुभिक्खो ।

अप्पप्पाणो उवस्सयमणुन्नो ॥ एसो उ खित्तकप्पो। गामनगरपट्टणाइन्नो ॥१॥ खेमो कुमरविरहि-

उ। रोगासिवविरहिउ सिवो होइ ॥ पउरण्णपाणदेसो। होइ सुभिक्खो मुणेअवो ॥२॥ जलुगासंख-

डं। पिसुगमसगाईविरहिउ जो उ ॥ सो होइ अप्पपाणो ।· अप्पञ्झावंमि थोवे

गसूइग। वा ॥ ३ ॥ समभूमिरेणुवज्जिय-रिउक्कमावस्सयामणुन्नायु ॥ गामनगराविय बहू—पाउगा मा-

सकप्पस्स ॥ ४ ॥ सज्झायजणो उ जहो। जहियं च मणुन्न साहुजोगीउ। तारिसउ खित्तं-

मि। समणुन्नाउ विहारो उ ॥ ५ ॥ तथा सहायं गीतार्थमागमज्ञमिच्छंति. उक्तं च-गीयं

सुत्तं भणइ । अत्थो पुण होइ तस्स वक्काणं ॥ गीएण य अत्थेण य । गीयत्थो होइ नायव्वो ॥ १ ॥ इदमत्र तत्वं–यदि सर्वेऽपि विहारिणो गीतार्था भवंति तदा सम्यग्पक्षः, तदभावेऽपि यं पुरस्कृत्य विहारः क्रियते स गीतार्थ एव विलोक्यः, मुग्धमृगकुले कृष्णसारवत्. यदाप–गीयत्थो य विहारो । बीउ गीयत्थमिस्सउ भणिउ ॥ इत्तो तइय विहारो । नाणुन्नाउ जिणवरेहिं ॥ १ ॥ तथोपधिं योग्यवस्त्रपात्ररूपं अबहुमूल्यं अमहद्ध्यं इच्छंति, अन्यथा उपघातसंभवात्. ॥ १८ ॥ किंच—

॥ मूलम् ॥—पायण लूहवित्ती । नवकप्पविहारिणोवि पायण ॥ पायण अणेगुत्तारी । निप्पडिकम्मावि पायण ॥ १९ ॥ व्याख्या—प्रायेण भृक्षा रूक्षेण निःस्नेहाशनेन वृत्तिः प्राणधारणा येषां ते रूक्षवृत्तयः. "अनिक्खणं निव्विगइं गया यत्ति" वचनात्. गुरुग्लानकृपकवालासहादीनां स्निग्धाहारेऽपि न दोष इति प्रायोग्रहणं. तथा प्रायेण नवभिः कल्पैर्विहरंतीत्येवंशीला नवकल्पविहारिणः. तत्र ऋतुबद्धकाले मासातिक्रमे, वर्षासु च चातुर्मासातिक्रमे विहरंतीति नवविहारकल्पाः। साधनां प्रायोग्रहणादपवादतश्चांतर्

स्वेन वा चिरमपि स्थातुं कल्पते. परं तदापि स्वाश्रितं क्षेत्रं नवनिजगिर्विभज्य प्रतिप्रति-
मासमेकैकभागे विहरंतो वर्षावासं नवमे भागे कुर्वंतीति रीतिः. तथा प्रायेणानेके समुदि-
ताः संतश्चरंतीत्यनेकचारिणः. यदुक्तं—एगाणियस्स दोसा । इत्थीसाणे तहेव पक्किणीए ॥
निक्खिसोहि महव्वय । तम्हा स विइज्जए गमणं ॥१॥ पंचकल्पेऽप्युक्तं- सच्चंदट्ठाणनिवेसणस्स
।सच्चंदगहियभिक्खस्स ॥ सच्चंदजंपिरस्स य । मा मे सत्तूवि एगागी ॥१॥ प्रायोग्रहणान्निर्विका-
रस्य गुर्वादेशादेकाकिनोऽपि कल्पते विहर्तुं. यत्स्थानांगं-अट्ठहिं ठाणेहिं संपन्ने अणगारे अरि-
हइ एगल्लविहारपडिमं उवसंपज्जित्ताणं विहरित्तए. तं जहा-सड्ढीपुरिसजाए १, सच्चेपुरिसजाए
२, मेहावीपुरिसजाए ३, बहुस्सुए पुरिसजाए४, सत्तिमं५. अप्पाहिगरणे६, धिइमं७, वीरियसंप-
न्ने ८. इति. तथा प्रायेण निःप्रतिकर्माणः स्नानादिशुश्रूषारहिताः, प्रायोग्रहणं गुरुबालग्ला-
नादीनां यतनया करचरणादिधावनस्यानुज्ञातत्वात्. ॥ १९ ॥ तथा—

॥ मूलम् ॥—निच्चमचंचलनयणा । पसंतवयणा पसिढ्ढगुणरयणा ॥ जियमयणा मिउवय-
णा । सव्वत्थवि सन्निहियजयणा ॥२०॥ व्याख्या—नित्यमचंचलनयना जितेंद्रियत्वात्. शोभणि

विशेषणानि पठितसिद्धानिः ॥२०॥ तथानेकगुणधारत्वेन साधूनामनेकोपमानयोग्यतामाह—

॥ मूलम् ॥—विरया सुइरयणजुत्ता । महियमया तारवत्त सुबहुदया ॥ ससिसेहनयर-
हा इव । रेहंते सायरसहाया ॥ २१ ॥ व्याख्या—इह प्रथमद्वितीयतुरीयपदैरधिकारायाः साधव उपमेयाः. तृतीयपदेन तेषामुपमानानि चंद्रादीनि ज्ञेयानि. 'रेहंतेत्ति' शोभंते. ताः कीदृशा इत्याह—विरमंतिस्म सावद्ययोगेभ्य इति विरताः, शुचीनि पवित्राणि, 'तस्य यतिरयणविणिउगमइयमिति' स्वमतालंबनात्, "न्यवेशि रत्नत्रितये जिनेन यः" इति परमतान्निप्रायाच्च, रत्नानि ज्ञानदर्शनचारित्राणि तैर्युता युक्ताः. तथा मथितो विलोडितोऽष्टरूपोऽपि मदो यैस्ते मथितमदाः. तथा तारं निर्मलं वृत्तं चारित्रं येषां ते तारवृत्ताः. रत्नत्रयांतःसंगृहीतमपि यत्पुनश्चारित्रमुपात्तं, तद्रत्नत्रयेऽपि चारित्रप्राधान्यख्यापनार्थं. ज्ञानदर्शनवतामपि चारित्रमंतरेण मोक्षानभ्युपगमात्. तथा सुबहुर्दया सर्वजीवेषु हितचिंतनरूपा येषां ते सुबहुदयाः, ततः कर्मधारयः. इह अहिंसाप्रमुखमहाव्रतरूपे चारित्रे गृहीतेऽपि यत्पुनर्दयाग्रणं तच्चारित्रेऽपि दयासारत्वज्ञापनार्थं. तथा सादरः सोपक्रमो महत्यपि संकटे यथोचि-

तानुष्ठानकारी स्वभावो येषां ते सादरस्वभावाः. न तु मानाशब्दभावकपुरुषवदाज्ञाप्योपहताः, इत्येकोऽर्थः. ॥ १ ॥

के इव? शशिन इव, बहुवचनमत्र सर्वज्ञतत्वज्ञहृदयानंदकं, कथंभूताः? उः हरः, इः स्मरः, उश्च इश्च विः, तत्र रता विरताः. हरशिरःस्थानात् स्मरसहचरत्वात्. तथा सुदेः स्वेतपक्षस्य रचनं, तेन युताः सुदिरचनयुताः, शशिन्नचयैव शुक्लपक्षप्रतिष्ठानात्. तथा मकारोऽलाक्षणिकः, श्यामकाः कामुकास्तेषां मता इष्टा अन्तिमताः, चंद्रकरस्पर्शेन तेषां शृंगाररसस्योद्दीपनात्. तथा तारास्वश्विन्यादिनक्षत्रेषु व्यक्तः सुबहुरुदयो येषां ते. तथा सागरः सहायो येषां ते सागरसहायाः, समुद्र एव हि विधोर्वृद्धिं च्युतिं वानुसरतीति द्वितीयोऽर्थः. ॥ २ ॥

पुनः साधुपक्षः प्रस्तूयते-किं विशिष्टाः साधवः? विगतं रतं ग्राम्यधर्मो येभ्यस्ते विरता ब्रह्मचारिण इत्यर्थः. तथा जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते इति वृद्धवादात्. श्रुतिरत्नं प्रधानशास्त्रं अंगप्रविष्टादि तेन युताः श्रुतिरत्नयुताः. तथा महितं पूजितं मतं शासनमेषां ते महितमताः. तारमतिशयेन व्यक्तेषु विदुत्सु सुबहुरुदयो येषां ते तारव्यक्तसुब-

हुदयाः. तथा सातं सुखं रांति ददतीति सातराः सहायाः संयमिनामिति गम्यते. अन्ये स॰ हाया हितचिंतका अपि परमार्थतो दुःखदा एव, न तथा साधवः. यदार्षं—"असयाए सहायत्तं । करंतिमे संयमे चरंतस्स" इति तृतीयोऽर्थः ॥ ३ ॥

के इव ? मेघा इव, कीदृशा मेघाः ? इत्याह—विशिष्टो रयो जलप्रवाहो येभ्यस्ते. त॰ था "सुइरत्ति" स्वपनशीलानि अनांसि शकटानि यत्र, एवंविधो युगः कालविशेषो येषु ते. तथा पंकाकुलत्वेन तदा तेषां निर्व्यापारत्वात्. महामहिषास्तैरितः प्रातो मदो येषु ते म॰ हेतमदाः, वर्षासु माहिषं माद्यतीति प्रत्यक्षगम्यं. तारं वृत्तः सुवहानां प्रधाननदीनां उदयो येभ्यस्ते. तथा सादं खेदं रांति ददतीति सादरा शफाः खुरा यासां ताः सादरशफा अजा॰ इत्यग्यो येभ्यस्ते सादरशफाजाः. वर्षति हि वारिदे वारिणा शटत्सु शफेषु नागीनां खेदो जायते. इति चतुर्थार्थः. ॥ ४ ॥

पुनः साधुपक्षे विरजसो वर्त्तमानकर्मरहिताः. तथा "यथा वाचा निशा गिरा" इति वचनदर्शनात् सुगिरा मधुरवचना ये जना ऋषयस्तैर्युताः सुगिराजनयुताः, न तूष्णीखल॰

जनव्यासंगकक्षुपिता इत्यर्थः. मकारस्यालाक्षणिकत्वात्. अधिको विशिष्टज्ञानादिलाभेन म-
दो हर्षो येषां ते. तथा तारां निर्मलां वृत्तां वृत्ताकारां सुष्ठु प्राधान्यं. नित्यत्वाकृतकत्वादि-
नान्यवनितादिभ्यो विलक्षणां वधूं सिद्धिलक्षणां दयंते ददति ये ते तारवृत्तसुवधूदयाः.
"दीर्घह्रस्वौ मिथोवृत्तौ" इति पदेन वधूशब्दस्य ह्रस्वः. एवं सर्वत्र दीर्घस्य ह्रस्वीकरणे ह्रस्व-
स्य च दीर्घीकरणेऽयमेव न्यायोऽनुसर्तव्यः. हायनं हायः परित्यागः, शाकरसस्य हाया येषु
ते शाकरसहायाः सर्वेष्वपि रसेषु प्रायः शाकरसो दुस्त्यजोऽतस्तद्ग्रहणं, उपलक्षणं वा शेष-
रसाणां. इति पंचमोऽर्थः. ॥ ५ ॥

अथ नगः पर्वतस्तत्पक्षः—विशिष्टा रदा दंतका गिरेर्बहिर्निर्गतास्तिर्यक्प्रदेशा येषु ते
विरदाः. तथा सुकिरणानि महासूकरणानि वनानि वृक्षसमूहास्तैर्युताः सुकिरवनयुताः. त-
था महमुत्सवं इताः प्राप्ता महेता निरुपद्रवत्वात्, मृगा अरण्यकाः पशवो गजविशेषा वा
येषु ते महेतमृगाः. तारं रौप्यं, शेषधातूनामुपलक्षणं, वृत्तं निष्पन्नं येषु ते तारवृत्ताः. सुष्ठु-
वहानां नदीनामुदयो येभ्यस्ते सुवहोदयाः. पर्वतजा हि नद्य इति रूढिः, ततः कर्मधार-

यः· तथा र. कामस्तस्येहा रेहा तदंतकरत्वात् रेहांता ऋषयस्तेषामेष इव येषु ते रेहांतेषाः, मुक्तकामा हि मुनयो महीध्रमध्य मध्यासते. तथाऽतरसां दुर्बलानां सखायो 'राजन् सखीति' अट्प्रत्ययेऽतरःसखा अगा वृक्षा येषु तेऽतरःसखागाः, रणतुमुद्यस्तानां हितकातराणां गिरिद्रुमा एव शरणं. यद्वा न विद्यते करो राजदेयो भागो येषां तेऽकरा भिल्लादयस्तत्सखा अगा द्रुमा येषां ते, तथा कर्मधारयः. इति षष्ठोऽर्थः. ॥ ६ ॥

पुनः साधुवक्षः—विशिष्टो रवो व्याख्यानध्वनिर्येषां ते विरवाः. श्रुतिं आगमश्रवणं राति ददातीति श्रुतिरो यो गणो गच्छस्तेन युताः, आगमावगमाय गच्छवासमाश्रिता इत्यर्थः. मखिनां याज्ञिकानां यज्ञनिषेधकत्वेन अमता अनिष्टा मत्सरमताः. ता लक्ष्मीः, रः कामस्तत्र वृत्तिर्व्यापारो येषां ते तारवृत्तयो लक्ष्मीबुद्धयः कामगृद्धाश्च, तैरसुवह उदयः शीलांगरूपो येषां तें तारवृत्यसुवहोदयाः. तथा सादं खेदं रांतीति सादराः प्रत्यनीकास्तान् प्रति सहः क्षम आत्मा येषां ते सादरसहात्मानः, प्रत्यनीकक्षुतव्यलीकानां सोढार इत्यर्थः. इति सप्तमोऽर्थः ७.

अथ नगशब्दस्य द्व्यर्थत्वान्नगस्तंरुस्तत्पक्षे—विरतासोर्गतप्राणस्य एः कामस्य रवणं श-

दनं तेन युता विरताखरणयुताः. दृक्षा हि स्निग्धछायतया त्रिनयननयनानलझलाक्तमापमूदनमुज्जीवयंति. भूम्यंतर्गतमूलत्वेन महिं पृथ्वीं अमंति गछंति मध्यमकाः. तथा तारणि कीटायेरदूषितानि पत्राणि दलानि येषां ते तारपत्राः. सुबहुरतिमहत्वमापन्नो दवो दहनं येभ्यस्ते सुबहुदवाः, ततः कर्मधारयः. तथा स्वापरसस्य नात्रो नवनं येभ्यस्ते स्वापरसन्नावाः, पांथा हि वृक्षतलमासाद्य सद्यः शेरत इति. इत्यष्टमोऽर्थः. ॥ ८ ॥

पुनः साधुपक्षः, विरता निवृत्ता आशा धनांगनादिस्पृहा येषां ते विरताशाः. उः ईश्वरस्तछत् एः कामस्य विद्वेषनं, तेन युतास्ततः कर्मधारयः. महः सर्वज्ञावाविर्भावकं ज्योतिस्तेन इतं प्राप्तं मतं मननं ज्ञापनमेषां ते महइतमताः. तथा तारो निर्मलो व्यक्तः प्रकटः सुपक्षो ज्ञानदर्शनचारित्रात्मको मार्गस्तेन उत् ऊर्ध्वं मोक्षानिमुखमयंते गछंतीति तारव्यक्तसुपथोदयाः. तथा रे इत्यामंत्रणं अघस्य पापस्य अंताय ईशते ते अघांतेशाः. अरसेषु निःस्वादेषु प्रस्तावाद्भक्तपानेषु नावो येषां तेऽरसन्नावाः. न तु सरसरसवस्यास्वादसादरा इत्यर्थः. इति नवमोऽर्थः. ॥ ९ ॥

नगशब्देन मात्राच्युतगत्या नागोऽपि सूच्यते, ततस्तत्पक्षः—विशिष्टा रदा मुखांतर्गता दंता येषां ते विरदाः विशिष्टत्वं चान्यसत्त्वापेक्षया काष्ठादिकमपि जग्धितुं क्षमत्वात्. तथा शुचि श्वेतं रदनयुगं मुखाद्बहिर्निर्गतं दंतद्वयं येषां ते शुचिरदनयुगाः. तथा मृधार्थं युद्धार्थं इतः प्राप्तो मदो दानजलं यैस्ते मृधेतमदाः. ताराणि मौक्तिकानि तैर्वृत्ता वृत्तलक्षणया आवृतास्तारवृत्ताः. यन्नामकोषः—"वृत्ते तु वृतवान् वृत्तौ". कुंजिकुंजेषु हि संभवंति मुक्ताः. सुवहुर्ऊर्वो गमनं येषां ते सुवहुऊर्वाः, शीघ्रगतयः, ततः कर्मधारयः. तथा 'रेहंतत्ति' रेजमाणा गर्जिशब्दं कुर्वाणाः, ईशानां राज्ञां अदरां निर्भयां सत्तां यांतीति ईशादरसभायास्ततः समासः. इति दशमोऽर्थः. ॥ १० ॥.

पुनः साधुपक्षः—विशिष्टा रतिश्चारित्रे विद्यते एषामत्रादित्वात् अप्रत्यये विरताः. शुचिः सूर्यस्तद्वत् रयणं गमनं तेन युताः. यथा एकत्र राशौ वासरेशस्तथा यतयोऽप्येकत्र ग्रामादौ मासमेव तिष्ठंति. आमेषु अस्तात्वादारोग्येषु हितं पथ्यं मतं शासनमेषां आमाहितमतास्ततः पूर्वपदेन कर्मधारयः. तथा तारा निर्मलाः. अकारविश्लेषात् अवृत्तोजानोऽसूनां

प्राणिप्राणानां वधाय उदयो येषां तेऽवृत्तानुवधोदयास्ततः कर्मधारय,. ईहासुमनो वधायो-
गादसुग्रहणं. तथा रः पादपूरणे, ईहाया अंतकरत्वात् ईहांता निर्ममास्तेषु ईशाः स्वामिन
ईहांतेशाः. अरसो मुक्तकामत्वेन निरास्वादो हावः स्त्रीणां द्वितीयोंगजालंकारो येषु तेऽरस-
हावाः, तुलायष्टिवन्मध्यग्रहणे आद्यंतयोरपि ग्रहणं, नवतीनावह्लेऽप्यत्र ग्राह्ये. इत्येका-
दशार्थः. ॥ ११ ॥

न य शब्देन प्राकृतशैल्या नदा उच्यंते, ते चेह अल्पजला नदा अगाधजला ह्रदा
इत्यवांतरभेदानश्रयणात् पद्मह्रदादयस्ततस्तत्पङ्काः—'उद्वरत्ति' उदयनशीला विशिष्टा रता-
शा रमणाश्चिलापो येषु तानि उद्वित्वरविरताशानि वनानि जलानि नैर्युताः. तत्र हि शीत
ला जललहरीर्निरीक्ष्य संजातरमणरणकाः सुराः खेचराश्च परितः क्रीडंति. अत्र प्राकृतत्वा-
द्विशेष्यं पूर्वनिपतितं. यन्नाममाला—पात्रं तदंतरमिति. तथा सुवहुर्ऊर्वो नीरस्पंदो येष्वयस्ते
सुवहुऊर्वाः. गंगासिंधुमुख्याः सिंधवो हि तेषां स्पंदः. तथा स्वादप्रधानो रसः स्वादरसः सु-
स्वादुजलं, तस्य भावः स्वयमेवोत्पत्तिर्येष्वयस्ते स्वादरसभावाः. न हि तेषु पर्जन्यजन्यं जलं,

किंतु विश्रसापरिणामेन ते ते पुद्गला जलरूपतया स्वयमेव परिणमंतीति भावः. इति द्वादशार्थः. ॥ १२ ॥

पुनः साधुपक्षः—विगतो रः कामो येभ्यस्ते विराः, स्वार्थे को विरकाः. श्रुतेः शास्त्रस्येण शब्देन वित्ताः श्रुतिरणास्तैर्युक्ताः, शास्त्रज्ञसंगतिकृत इति भावः. तथा मथितो निवारितो मदो मद्यपानजन्मा समग्रप्रमादानामादिभूतो यैस्ते मथितमदाः. तथा तारणां नार्तानां पूर्वपुरुषकथानां सुष्ठुश उदयो येभ्यस्ते तारवार्तासुवहूदयाः. तथा शातास्तद्धिता रसानां नाट्यप्रसिद्धानां अष्टानां शृंगारादीनां भावाः स्थायिनो रत्यादयो व्यभिचारिणश्च धृत्यादयो यैस्ते शातरसभावाः. इति त्रयोदशार्थः. ॥ १३ ॥

अथ रथपक्षः—विशिष्टो रयो वेगो येषां ते विरयाः. तथा शुचिरचनं यथास्थाननिवेशनात् पवित्रघटनं युगं कुबरं येषां ते शुचिरचनयुगाः. मखितं गमनं तत्र मता अनीष्टाः. तारमतिशयेन वर्त्मनि मार्गे सुष्ठु प्रधानेन वहेन वृषभस्कंधेन उदयो येषां ते तारवर्त्मसुवहोदयाः. तथा 'रेइंनत्ति, राजमाने ईषे इव ईषे उभयपार्श्ववर्तिनी काष्ठे येषां ते राजना-

नेपाः. अरेषु सहं समर्थं अयो लोहं येषु तेऽरसहायसः. लोहवद्भारको हि रथ. स्यपुटेऽपि पथि संचरन्न नज्यते. इति चतुर्दशार्थः. ॥ १४ ॥

पुनः साधुपक्षः--विगतो रजो द्वितीयगुणः. उपलक्षणत्वात्तमोऽपि येषां ते विरजसः सात्विका इत्यर्थः. आसुतिर्मद्यसंधानं, रः कामः, "ऋणन्ति" ऋणं, अकारप्रश्लेषात्तैरयुता रहिताः आसुतिऋणायुताः, मद्यव्यसनिनः कामिनः ऋणिनश्चारित्रनिषेधात्. तथा प्रेत्यं वो धिप्राप्त्या महितमिव महितं मृतं मरणं येषां ते महीतमृता उत्सवप्रायमरणा इत्यर्थः. यतः--संचिततपोधनानां । नित्यं व्रतनियमसंयमरतानां ॥ उत्सवजूतं मन्ये । मरणमनपरा धवृत्तीनां ॥ १ ॥ तथा तारं उच्चैरुच्यत इति तारवाक्, तस्य भावस्तारवाक्त्वं, तत्र सुवहूदयो न्महापूरवदुदयो येषां ते तारवाक्त्व सुवहोदयाः. यथा हि प्रथमप्रावृषि पूर्वं प्रेरणवा प्रसर्पन् पानीयपूरो न केनापि रोधुं शक्यस्तथा व्याख्याक्षणे मुमुक्षवोऽपि तथा स्व आत्मीयः, अप रश्च तद्व्यतिरिक्तस्तत्र समानो विशेषरहितो भावोऽभिप्रायो येषां ते स्वापरस्वभावाः सम मित्रशत्रव इत्यर्थः. ॥ इति पंचदशोऽर्थः. ॥ १५ ॥

अथ "नयरङ्गी"त्युपमानपदं प्राकृतबलाङ्गत्वाऽन्यथा व्याख्यायते—नगरं पुरं, खश्च सूर्यः. खो रवौ इत्यमरवचनात्. तत्र पूर्वं नगरपक्षः—विशिष्टो रवः कलकलो येषु तानि विरवाणि, घरट्टघेपजनरवबाद्यध्वनिभि. शब्दमयत्वात् "सुअरत्ति" शुकवंति यानि वनानि, तैर्युतानि शुकवद्वनयुतानि. वनखंडैरेव नगरगोचरं सश्रीकं. महितानि, तारकादिभ्य इत् इति इत्प्रत्यये उत्सवयुक्तानि. अत एव मनान्यनिष्टानि. तया तारा उज्ज्वला वार्ता आजीविका व्यवसायरूपा यत्र तानि तारवार्तानि. सुवहवो ऽत्रा द्यूतादिकाः केलयो येषु तानि सुवहुद्रवाणि, ततः कर्मधारयः. तथा रे इति संभाषणे, ग्वांतेन आकाशप्रांतेन ईर्ष्यां स्पर्धां कुर्वंतीति खांतेर्ष्याकराः, सचा आवासास्तासां अया इव अया इष्टदेवा इत्यर्थः. खांतेर्ष्याकरसज्ञाया निरुपद्रवत्वेन नगरेष्वावासानामनंगुरत्वात्. अत्र सर्वत्र प्राकृतत्वाल्लिंगव्यत्ययः. ॥ इति षोडशोऽर्थः. ॥ १६ ॥

पुनः साधुपक्षः—द्वयोः स्वपरकार्ययो रता द्विरताः, बुद्धत्वाद्बोधकत्वाच्च. तथा एकाकिनिर्न विहर्तव्यं, द्विरस्तांतरितैर्निशि प्रवसतव्यं, न नित्यवासैर्जाड्यमित्येवं शुचिरुवदात

रचना येषां ते शुचिरचना युवानस्तरुणश्रमणा येषु ते शुचिरचनयुवानः. तथा म[illegible]
दी, शेषमहानदीनामुपलक्षणं, अमताऽवगाह्यत्वेनानिष्टा येषां ते मह्यमताः, यत्स्थानांग-
"नो कप्पइ निग्गंथाण वा निग्गंथीण वा इमाउ उद्दिट्ठाउ गणियाउ वंजियाउ पंचमहण-
वाउ महानइउ अंतोमासस्स दुक्खुत्तो वा तिक्खुत्तो वा उत्तरित्तए वा संतरित्तए वा, तं
जहा-गंगा, जउणा, सरउ, एरवइ, मही". तथा ताराणि परतीर्थिकापेक्षया निर्मलानि
पात्राणि ज्ञानादिगुणानां, अत एव सुबहुनिर्दृता आदृताः सुबहुदृताः. तथा रेखा आयुः-
कर्मदलिका पङ्क्तिः. तथा च लोकेऽपि वक्तारो भवंति, यथास्य कर्मरेखा दुर्बला सबला
वेति तस्या रेखाया अंते आयुःसमातावित्यर्थः. स परोक्ष इति वचनात् सांपरोक्ष्यं अजरा-
णां नित्यतरुणत्वेन देवानां वयोविज्ञागम्यतीतत्वेन सिद्धानां वा सन्नां स्थानं गच्छतीति सा-
जरसभागाः. उपरता हि मुनयः स्वर्गं मुक्तिं वा यांतीति निश्चयः. यदाप—निव्वाणसुहं पा-
वइ साहू सव्वसिद्धिं वा. इति सप्तदशोऽर्थः. ॥ १७ ॥

अथ सूर्यपक्षः—वो पक्षिणि चक्रवाके रता विरतास्तद्वंधुत्वात्. शुचौ आषाढमासे रा

पु ते स्वाकराः. सह ह्रादेन घोषेण वर्तंते इति सह्रादाः, ततः समासः. इति विंशत्तमोऽर्थः २०.

भा.४ ०२० अथ चक्रपक्षः—विशिष्टो रवश्चीत्कार एषां तानि विरवाणि, शुचिरचनया प्रधानघटनया युतानि, महिताः पूजिताश्चक्रादयस्तेषां मतानि इष्टानि महितमतानि. तारं वृत्तानि परिमंडलाकारत्वात्. सुवहुदवानि शीघ्रगतीनि काप्यस्खलितत्वात्, तथा सादं खेदं रांतीति सादरा वृनादयस्तानपस्यति अंतयति घातः प्रहारो येषां तानि सादरघानि. इत्येकविंशत्तमोऽर्थः. ॥ २१ ॥

अथ कमलपक्षः—विशिष्टं रजः परागो येषु तानि विरजांसि. शुचिना सूर्येण रचनं व्याकोशतायाः करणं, तेन युतानि शुचिरचनयुतानि. महनं महितं देवानां पूजनं तत्र मतानि इष्टानि. तार उच्चैर्ध्वनिर्वक्त्रेषु येषां ते तारवक्त्राः. प्रस्तावाद्भ्रमरमरालादयस्तेषां सुवहुर्ध्वनिः केलिरेषु तानि तारवक्त्रसुवहुध्वानि. तथा सादः पंको रसश्च जलं ताभ्यां जातानि शोभितानि सादरसजातानि, पंकजातत्वाज्जलसंवर्धितत्वाच्च. इति द्वाविंशत्तमोऽर्थः. २२.

अथ वासुदेवपक्षः—विना गरुडेन रयो वेगो येषां ते विरयाः, गरुडवाहनत्वात्. वि-

शिष्ट रज एषा विरजसो वा रजोगुणे हि स्थितो विष्णुरिश्च पाखयतीति लौकिका शुचि
रत्नैश्चक्रादिभिर्युता. शुचिरत्नयुता. यत्संग्रहणिः—चक्कं खग्गं च धणू। मणी य माला
तहा गया संखो ॥ एए उ सत्तरयणा। सव्वेसिं वासुदेवाणं ॥ १ ॥ मथितो मयो नाम दै
त्य, सर्वदैत्यानामुपलक्षणं, यैस्ते मथितमयाः. तारवक्त्रा उज्ज्वलमुखा. सुबद्ध. सचना-
माहत्रिमण्यादयस्तानि सह द्वयः केलियेंषां ते तारवक्त्रसुबधुड्वा. तथा सादराः सोपक्र
मा सहाया बलदेवादयो येषां ते सादरसहायाः. ॥ इति त्रयोविंशत्तमोऽर्थः. ॥ २३ ॥ एव-
मस्या बृहद्भाष्यस्या गाथायाः कियतोऽर्थान् लिखितुं पार्यते? ते च धीमता स्वयमुन्नेया इति.
॥ २१ ॥ अथ साधुगुणानेव एकोत्तरवृद्धिविशिष्टानाह—

॥ मूलम् ॥—नाणे दंसणचरणे। सामण्णेगहा न हायंति ॥ दुविहं वहंति सिक्खं।
वज्जंति न गारवेहिं तेहिं ॥ २२ ॥ व्याख्या—अंतर्गर्भितनिःशेषविशेषेण सामान्येन एक-
विधे ज्ञाने तत्त्वावबोधरूपे, दर्शने तत्त्वार्थश्रद्धानात्मके, चरणे जिनोक्तानुष्ठानलक्षणे, न ही-
यंते, न हीना भवंति, अप्रमत्तत्वात् तथा द्विविधां ग्रहणासेवनाभेदात् शिक्षामनुशास्ति

गुरोरिति गम्यते, वहंति. तत्र साधूनाश्रित्य योगोद्वहनपूर्वा पूर्वादिसिद्धांताधीतिर्ग्रहणशि
क्षा. साध्वीराश्रित्य पुनरेकादशांगाध्ययनं ग्रहणशिक्षा. यद्वाप्यं–तुच्छा गारवबहुला । च·
ग्लिंदिया दुव्वला धिईए य ॥ इय अइसेसज्झयणा । नूयावाउ य्नो थीणं ॥ १ ॥ आसे·
वनाशिक्षा तु द्वयेषामपि दशविधसामाचारीरूपा. उपलक्षणत्वाच्चेषापि गमनभोजनप्रत्युपे·
क्षणादि साधुव्यवहारप्रवृत्तिः. यदाह–सा पुण दुविहा सिक्खा । गहणे आसेवणे य नाय·
व्वा ॥ गहणे सुत्ताहिज्झण । आसवणा तप्पकप्पाइ ॥ १ ॥ तथा त्रिभिर्गौरवैः ऋद्धिरससात·
लक्षणैर्न बध्यंते न स्ववशीक्रियंते. तत्र वस्त्रपात्रशयनाशनश्रावकादिरूपा चित्तोत्कर्षं ऋद्धि·
गौरवं, दायकबाहुल्येनान्नहं नवनवरसवतीलाभाद्युन्मादो रसगौरवं. शरीरसौख्यार्थं सुको·
मलशय्यादिकरणं सातगौरवमिति. ॥ २२ ॥

॥ मूलम् ॥—चउहाभिग्गहधारी । सज्झायं पंचहा विभावंति ॥ छज्जीवनिकायहि·
या । मुणंति सत्तविहमागाढं ॥ २३ ॥ व्याख्या—चतुर्धा द्रव्यक्षेत्रकालभावभेदात् अभि·
ग्रहान् धरंतीत्येवंशीला अभिग्रहधारिणः. तत्र लेपकृल्लेपकृदेवं वा द्रव्यं मया ग्राह्यमिति

द्रव्याभिग्रहः, द्रव्यप्रमाणकरणं वा. (१). क्षेत्रत एकाक[illegible]
पूर्वाह्णमध्याह्नादावेव मया पर्यटनीयमिति क्षेत्राभिग्रहः कालाभिग्रहश्च. (३) हसतो रुदतो
गायतो वा निषण्णादेर्वा हस्तेन भिक्षाग्रहणं भावाभिग्रहः (४). एवमभिग्रहचातुर्विध्यं स-
र्वत्र भावनीयं. तथा पंचधा वाचनापृच्छनापरावर्तनानुप्रेक्षाधर्मकथाभेदात् स्वाध्यायं विशेषे-
ण भावयंति. विशेषश्च स्वाध्यायस्य प्राधान्यख्यापनार्थः, तन्मूलत्वात्सर्वाचरणानां. उक्तं च-
वारसविहंमि तवे । अभिंतरबाहिरे कुसलदिठे ॥ नवि अत्थि नवि होही । सज्झायसमं त-
वोकम्मं ॥ १ ॥ तत्रानधीतस्य सूत्रस्य ग्रहणं वाचना (१). ततः संदेहे सति पृच्छना पृच्छा.
(२). निश्चितस्य सूत्रस्य अविस्मरणार्थं गुणनं परिवर्त्तना (३). सूत्रवदर्थस्यापि चिंतनमनु-
प्रेक्षा. (४). अभ्यस्तसूत्रार्थस्य परंप्रत्युपदेशदानं धर्मकथेति. (५). तथा षण्णां जीवनिका-
यानां पृथ्व्यप्तेजोवायुवनस्पतित्रसानां हिताः संरंभसमारंभारंभविवर्जनात्. तत्र—संकप्पो
संरंभो । परितावकरो भवे समारंभो ॥ आरंभो उद्दवणं । सुद्धनयाणं च सव्वेसिं ॥ १ ॥ त-
या अपवादालंबनाय आ सामस्त्येन गाढं वलीयः कारणं आगाढमित्युच्यते. द्रव्यक्षेत्रका-

ज्ञानवपुस्चिकित्सासहायभेदात्सप्तविधं जानंति. तत्राध्वकालादौ द्रव्यदुर्लभतां विमृश्य विधिना खर्जूरादिद्रव्यं संगृह्णतो द्रव्यागाढं. तथाविधक्षेत्रांतराभावे एकत्रापि क्षेत्रे तिष्ठतः क्षेत्रागाढं. विहारायोग्ये काले सुचिरमप्यवतिष्ठमानस्य कालागाढं. अत्युत्कटे संकटे निषिद्धमप्याददानस्य भावागाढं. यस्मिन्विनष्टे ग्लानस्य विनाशस्तस्य पुरुषस्य कृतेऽशुद्धमपि गृह्णतः पुरुषागाढं. प्रासुकौषधोपदेशविधुपो वैद्यस्याभावे सावद्यामपि चिकित्सां कारयतश्चिकित्सागाढं. सहायाभावे विहारादिकमकुर्वतः सहायागाढं. उक्तं च पंचकल्पे—दवे खित्ते काले । भावे पुरिसे तिगिच्छ असहाए ॥ एएहिं कारणेहिं । सत्तविहं होइ आगाढं ॥ १ ॥ जावंति पत्तयंणमि । पडिसेवा मूलउत्तरगुणेसु ॥ ता सत्तसु सुद्धेसु । सुद्धमसुद्धा असुद्धेसु ॥२॥२३॥तथा—

॥ मूलम् ॥—पेहंति अट्ठसुहुमे । अनवनियाणा नायदसधम्मा ॥ तिगुणिक्कारसआया—सणुज्जिया वारसतवस्सी ॥ २४ ॥ व्याख्या—अष्टौ सूक्ष्माणि सूक्ष्मत्वादुर्लक्ष्याणि प्रेक्षंते प्रयत्नेन पश्यंति, प्रेक्ष्य च परिहरंतीत्यर्थः. यदार्षं—सिणेहं पुप्फसुहुमं च । पाणत्तिगं तहेव य ॥ पणगं बीयं हरियं च । अंडसुहुमं च अट्ठमं ॥ १ ॥ तत्र स्नेहसूक्ष्मं अ

वश्यायादि १. पुष्पसूक्ष्मं वटपुष्पादि २. प्राणसूक्ष्म कुंथ्वादि ३. उत्तिंगसूक्ष्म कीटिकानगरादि ४. पनकसूक्ष्मं पंचवर्णफुल्ली ५. बीजसूक्ष्मं शाल्यादि ६. बीजस्य मुखे यल्लोके तुषकणिकेत्युच्यते. हरितसूक्ष्मं किशलयादि ७. अंकसूक्ष्मं कीटिकांकादि ८. तथा "अनवनिधाणत्ति" न विद्यंते नवसंख्यानि निदानानि राज्यादिप्रार्थनारूपाणि येषां तेऽनवनिदानाः, तत्र देवानामदृश्यत्वाद्राज्यस्यैव प्रार्थनं प्रथमं, राज्ञोऽपि चिंताचांतत्वेन दुःखित्वादुग्रादित्वप्रार्थनं द्वितीयं, पुरुषाणां बहुव्यापारवत्त्वात्संग्रामादिदुःखकारित्वाच्च स्त्रीत्वप्रार्थनं तृतीयं, स्त्रीणां नीस्त्वाद्यंकनीयत्वाच्च पुरुषप्रार्थनं चतुर्थं, मनुष्याणामशुचयो भोगा इति सुरते देवत्वप्रार्थनं पंचमं, अत्यंतकामलौल्याद्दुरंतदेवत्वप्रार्थनं षष्ठं. एतेषु षट्सु तपसा तत्तज्जावरत्नं प्राप्तस्य न भवति बोधिलाभः, भोगनिर्विण्णत्वादरतदेवत्वप्रार्थनं सप्तमं, अस्मिंश्च देवभवानंतरं प्राप्तमानुष्यस्य सम्यक्त्वलाभः स्यात्, न पुनर्देशविरतिः. तथा धर्मश्रद्धालुत्वाद्भोगानिर्विण्णत्वात् श्रावकत्वप्रार्थनं अष्टमं, अस्मिंश्च देशविरतिर्भवति, न पुनर्यतिधर्मः. तथा कामभोगनिर्विण्णस्य दारिद्र्ये सति गृहवासः सुत्यजः स्यादिति दारिद्र्यप्रार्थनं नवमं. अयं हि प्राप्त-

दारित्र्यश्च चारित्रमपि लभते, न पुनः सिध्यति. तथा ज्ञातो दशविधः क्षांत्यादिधर्मो यैस्ते ज्ञातदशधर्माः. तद्यथा—खंती अज्जव मद्दव । मुत्ती तव संयमे य बोधव्वे ॥ सच्चं सोयं अकिं—चणं च बंभं च जइधम्मो ॥ १ ॥ तत्र क्षांतिमार्दवार्जवमुक्तयः क्रोधमानमायालोभपरिहाररूपाः, तपोऽनशनादिः, संयम आश्रवविरतिः, सत्यं मृषावादविरतिः, शौचं संयमं प्रति निरुपलेपता निरतिचारतेत्यर्थः, आकिंचन्यं निःपरिग्रहत्वं, ब्रह्मचर्यं चेति. तथा त्रिगुणैकादशसंख्यात्रयस्त्रिंशदित्यर्थः, आशातनाः पुरोगमाद्यास्ताभिरुज्झिताः, तद्यथा—गुरोः पुरतः पार्श्वतः पृष्ठतोऽप्यासन्नं गमने स्थाने निषीदने च प्रत्येकं तिस्रस्तिस्रः ९. बहिर्भूमौ शिष्यस्य गुरोः पूर्वमाचमने १०. गुरोः पूर्वं शिष्यस्य आलोचने ११. गुरोः पूर्वं शिष्यस्य गमनागमनालोचने १२. भिक्षामन्यस्यालोच्य गुरोरनालोचने १३. निक्षामन्यस्योपदर्श्य गुरूणां दर्शने १४. निक्षायामन्यं प्राग् निमंत्र्य गुरोर्निमंत्रणे १५. गुरुमनापृच्छ्यान्यस्मै नैद्यदाने १६. गुरोर्यत्किंचिदत्वा स्वयं स्निग्धमधुरान्नक्षणे १७. रात्रौ कः शेते जागर्ति वेति गुरुणोक्ते जाग्रतोऽपि शिष्यस्य तूष्णीम्भावे १८. शेषकालेऽपि गुरोर्व्याहरतः प्रतिवचनादाने १९.

गुर्वाहूतस्य स्थानस्थस्यैवोत्तरकरणे २०. गुर्वाज्ञापितस्य किमिति जणन, भणतश्च मस्तके-
न वंदे इति २१. गुरुंप्रति शिष्यस्य त्वंकारे २२. गुरुणा वैयावृत्यं कुर्वित्युक्तस्य त्वं किं न क-
रोषीति जणने २३. गुरुणां पुरो वहोः कर्कशस्य जणने २४. गुरोर्व्याख्याने शिष्यस्य दुर्मन-
स्त्वे २५. नंग्यंतरेण गुरावर्थं वदति न स्मरसीति जणने २६. गुरौ कथयत्यहं कथयिष्यामी-
ति कथाच्छेदे २७. गुरौ कथयतीयं जिह्वाच्छेदेत्यादिना पर्षद्भेदे २८. गुरुव्याख्यानानंतरं अनु-
स्थितायामेव पर्षदि स्वपाटवज्ञापनाय शिष्यस्य विशेषधर्मकथने २९. गुरुशय्यासंस्तारका-
देः पादेन घट्टने ३०. गुरुशय्यासंस्तारकादौ स्थानासनशयनेषु ३१ गुरोरुच्चासननिषदने ३२.
समासननिषदने वेति ३३ त्रयस्त्रिंशदाशातनाः ॥ तथा द्वादशसंख्यं तपोऽनशनादि विद्यते
येषां ते द्वादशतपस्विनः, तपोभेदाश्च प्राग् निर्जराधिकारे व्याख्याताः ॥ २४ ॥

॥ मूलम् ॥—तेरस किरियाठाणे । चयइ चउदस मुणंति जियभेए ॥ पनरस भुणंति
सिद्धे । दिक्कं जंपंति सोलसहा ॥ २५ ॥ व्याख्या—त्रयोदश क्रियाणां कर्मणां स्थानानि
त्यजंति, तद्यथा—सति कार्ये त्रसादिकं घ्नंतोऽर्थक्रिया १, तदभावे तद्घातोऽनर्थक्रिया २,

यसौ हतवान् हंति हनिष्यतीति क्षिट्सर्पादेर्हिंसनं हिंसाक्रिया ३, लक्ष्यार्थं बाणं मुंचतोंतरागतस्य पक्ष्यादेर्हननमकस्मात्क्रिया ४, निरपराधस्याप्यपराधभ्रमात्ताडनं दृष्टिविपर्यासक्रिया ५, असत्यवचनं मृषाक्रिया ६, अदत्तादानक्रिया प्रतीता ७, मनसा दुःकर्मचिंतनमध्यात्मक्रिया ८, जात्यादिमत्तस्यापरहीलनं मानक्रिया ९, स्तोकेऽप्यपराधे प्रचंडदंडकरणं मित्रद्वेषक्रिया १०, मायाक्रिया ११, लोभक्रिया च प्रतीता १२, यथाख्यातचारित्रिणः सूक्ष्मनेपोन्मेषादिचेष्टाहेतुका सामायिकसातावेदनीयबंधरूपा ऐर्यापथिकीक्रिया चेति १३, ॥ तथा चतुर्दशजीवभेदान् जानंति तन्मूलत्वात्संयमस्य, तद्यथा—एकेंद्रिया द्विधा, सूक्ष्मा बादराश्च. तत्र सर्वलोकव्यापिनोऽसंक्रांतशस्त्रा अंतर्मुहूर्तायुश्चर्मचक्षुरविषयाः सूक्ष्माः. नियतस्थानस्थाः शस्त्रोपहता जघन्यतोंतर्मुहूर्तमुत्कृष्टतो द्वाविंशतिवर्षसहस्रान् यावज्जीवनशीलाश्चक्षुर्ग्राह्यपरिणामा बादराः. तथा द्वींद्रियास्त्रींद्रियाश्चतुरिंद्रियाश्च प्रतीताः. पंचेंद्रियास्तु द्विधा, संज्ञिनोऽसंज्ञिनश्च. तत्र गर्भजास्त्रिवेदा मनोलब्धिमंतः संज्ञिनः. संमूर्छिमाः केवलक्लीबवेदा

पर्याप्तयश्चाहारशरीरेंद्रियानपानभाषामनोभेदात् षोढा. एतासु एकेंद्रियाणामाद्याश्चतस्रः, द्वित्रिचतुरिंद्रिया संज्ञिनां पंच, संज्ञिनां च षट्. तत्र ये स्वोचिताः पर्याप्तीः समर्थ्य म्रियंते, ते पर्याप्ताः, ये पुनर्यथोक्ताः पर्याप्तीरसमाप्य म्रियंते तेऽपर्याप्ताः. यद्यप्यपर्याप्ता अप्यायेन पर्याप्तित्रयेण पर्याप्ता एव म्रियंते, तथापि स्वोचितपर्याप्त्यसंपूरणात्तेऽपर्याप्ता एव व्यपदिश्यंते.

तथा पंचदशभेदान् सिद्धान् स्तुवंति- धन्या अमी ये सकलक्लेशकारणं कर्मजालमुध्धृत्य नित्यनिरुपमसुखमपवर्गं गता न विक्षिप्यंते संसारसागरवीचिभिरिति. सिद्धभेदाश्चामी- गिहि परलिंगसिद्धा । थी नर कीवा य एगणेगाय ॥ तित्थंकर तित्थेयर । सय पच्च य बुद्धबोहीय ॥ १ ॥ तत्र गृहिलिंगसिद्धा मरुदेवीप्रभृतयः १, परलिंगसिद्धाश्चरकपरिव्राजकादिलिंगसिद्धाः २, यदान्यलिंगिनोऽपि भावसम्यक्त्वोत्पन्नकेवलज्ञानास्तत्कालं सिध्यंति तदामी द्रष्टव्याः, नो चेद्यदि दीर्घायुष्कं स्वं जानंति, तदा तेऽपि साधुलिंगमेव भजंतीति. स्वलिंगेन रजोहरणादिना सिद्धाः स्वलिंगसिद्धाः ३, स्त्रीलिंगेन योषिदाकारेण सिद्धाः स्त्रीलिंगसिद्धाः ४, एवं पुरुषलिंगसिद्धाः ५, नपुंसकलिंगसिद्धाश्च ६, एकाकिनः संतो ये सिद्धास्ते एकसि-

ऊाः ७, ष्टयादिना अष्टशतांतेन समुदयेन सिद्धास्तेऽनेकसिद्धाः ८, तत्स्वरूपप्ररूपकं चेदं गाथाद्वयं—बत्तीसा अडयाला । सट्ठी बावत्तरी य बोधव्वा ॥ चुलसीइ छन्नुवइ । दुरहिं-यमट्ठुत्तरसयं च ॥ १ ॥ अट्ठ य सत्त य छ पंच । चेव चत्तारि तिन्नि दो इक्को ॥ बत्तीसाइ-सु समया । निरंतरं अंतरं उवरिं ॥ २ ॥ एकादयो द्वात्रिंशदंता एकसमयेन सिद्ध्यंतो नि-रंतरमष्टावेव समयान् यावत् सिद्ध्यंति, तत ऊर्ध्वमवश्यमंतरं भवतीति. त्रयस्त्रिंशदादयो-ऽष्टचत्वारिंशदंता एकसमयेन सिद्ध्यंतो निरंतरं सप्तैव समयान् यावत्सिद्ध्यंति, ततोंतरं भवत्येव. एकोनपंचाशदादयः षष्ट्यंता एकसमयेन सिद्ध्यंतः षट्समयान् यावत् सिद्ध्यंति. ततः परमंतरं भवत्येव. एवं तावद्यावदष्टशतमेकसमयेन सिद्ध्यंतः समयाद्ऊर्ध्वमवश्यमंतरं कुर्वंत्येव. तीर्थंकराः संतो ये सिद्धास्ते तीर्थंकरसिद्धाः ९, अतीर्थंकरसिद्धाः सामान्यकेव-लिनः १०, तीर्थे सति ये सिद्धास्ते तीर्थसिद्धा जंबूस्वाम्यादिवत् ११, तीर्थोच्छेदे तीर्थाभावे ये सिद्धास्तेऽतीर्थसिद्धाः, श्रूयते य सुविध्यादिजिनानां सप्तस्वंतरेषु तीर्थोच्छेदे केचिज्जाति-

यं गुरुनिरपेक्षतया बुद्धाः संतो ये सिद्धास्ते स्वयंबुद्धसिद्धाः १२, प्रतीत्येकं कंचिद्वृषभादिकं बोधकारणं ये बुद्धास्ते प्रत्येकबुद्धाः, तथा च ये सिध्यास्ते प्रत्येकबुद्धसिद्धाः १३. स्वयंबुद्धानां प्रत्येकबुद्धानां च बोध्युपधिश्रुतलिंगकृतो भेदः, तथाहि—स्वयंबुद्धानां बाह्यनिमित्तं विनापि बोधिर्भवति, प्रत्येकबुद्धानां तु तदपेक्ष एव. उपधिः स्वयंबुद्धानां मात्रकचोलपट्टवर्जः पात्रादिद्वादशविधः. प्रत्येकबुद्धानां जघन्येन रजोहरणमुखपोतिकारूपो द्विविधः, उत्कृष्टतस्तु चोलपट्टमात्रककल्पत्रिकवर्जो नवविध इति. स्वयंबुद्धानां पूर्वाधीतं श्रुतं स्याद्वा न वा, प्रत्येकबुद्धानां पुनस्तन्नियमाद्भवत्येव, जघन्येनैकादशांगानि, उत्कृष्टतो द्वादशपूर्वाणीति. स्वयंबुद्धानां यदि पूर्वाधीतं श्रुतं नास्ति, तदा नियमाद्गुरुसमीपे लिंगं प्रपद्यंते, गच्छे च विहरंति. अथ श्रुतं भवति तदा देवता लिंगं ददाति गुरुर्वा. यदिवा एकाकिविहारयोग्यता इच्छा चास्ति, तत एकाकिनो विहरंति, अन्यथा गच्छे एव वासते इति, प्रत्येकबुद्धानां तु लिंगं देवता एव दत्ते, लिंगवर्जिता वा भवंति. यदाह—"रुप्पं पत्तेयबुद्धत्ति", तथा बुद्धबोधितसिद्धाः संतो ये सिद्धास्ते बुद्धबोधितसिद्धाः १५.

तया दीक्षां षोडशधा षोडशप्रकारां जल्पंति, तद्यथा—छंदा रोसा परिजुण्णा । सुविणा य पडिस्सुया ॥ सारणिया रोगिणिया । अणाढिया देवसन्नत्ति ॥ १ ॥ वत्थाणुबंधिया जणिय-कणिया बहुजणस्स समुइआ ॥ अक्काया संगारा । वेयाकरणी सयंबुद्धा ॥ २ ॥ तत्र छंदात् स्वकीयादभिप्रायाज्जोविंदवाचकस्येव परकीयाद्वा भ्रातृवशभवदत्तस्येव या दीक्षा सा छंदा १. मात्रादितिरस्कारजाताद्रोपाद्विवभूतेरिव या सा रोषा २. परिद्यूनाद्दारिद्र्यात् काष्ठहारकस्येव या सा परिद्यूना ३. स्वप्नात्पुष्पचूलाया इव या सा स्वप्ना ४. प्रतिश्रुतात्प्रतिज्ञाताया सा प्रतिश्रुता, शालिभद्रभगिनीप्रति कृतप्रतिज्ञस्येव ५. स्मरणाद्या सा स्मारणिका, श्रीमल्लिस्मारितजन्मांतराणां प्रतिबुद्ध्यादिभूपानामिव ६. रोगं आलंबनं विद्यते यस्यां सा रोगिणी सनत्कुमारस्येव ७. स्वजनाद्येरनादृतस्य या सा अनादृता, नंदिषेणस्येव ८. देवसंज्ञसेदेवप्रतिबोधनाद्या सा देवसंज्ञप्तिर्मेतार्यस्येव ९. वत्सः पुत्रोऽनुबंधो यस्यां सा वत्सानुबंधिका वज्रस्वामिमातुरिव, उपलक्षणत्वात् पित्राद्यनुबंधिकापि मनकादेरिव १०. कन्यया

दीक्षायाः ११. बहुजनस्य संमुदिता प्रमोदहेतुर्या सा जंबूस्वामिन इव १२. परणाख्यात धर्मं श्रुत्वा या सा आख्याता प्रजवस्येव १३. प्राग्नवकृतेन. संगरेण संकेतेन या गृह्यते सा संगरा, इषुकाराध्ययनोक्तपुरोहितपुत्रयोरिव १४. संदिग्धेऽर्थे जिनादिना व्याकृते या सा वैयाकरणी गौतमस्येव १५. स्वयंबुद्धा प्रतीता तीर्थकृतामिव १६. ॥ २५ ॥ ननु एवं अनेक-गुणरत्नरत्नाकराणां परममुनीनां कियंतो गुणाः संख्यायंते? तत उपसंहरन्नाह—

॥ मूलम् ॥—एवं गुणबुड्ढीए । एगुत्तरियाइ नाव नेयव्वा ॥ अठारसहससिलांग—संग-या जा मुणी हुंति ॥ २६ ॥ व्याख्या—उत्तानार्था, तदेवं व्याख्यातं श्रवणगुणद्वारं, अ-याहोरात्रकृतं विजणिपुराह ॥ २६ ॥

॥ मूलम् ॥—साहू निसाइचरिमे । जामे वेरत्तियं गहियकालं ॥ सज्झायं कुणइ तहा । असंजया जह न जग्गंति ॥ २७ ॥ व्याख्या—साधुर्निशायाश्चरमे यामे चतुर्थांशलक्षणे विगता रात्रिर्विरात्रिस्तस्यां नवं वैरात्रिकं कालं गृहीत्वा मंदस्वरेण तथा स्वाध्यायं सूत्रार्थ-परिवर्तनादिरूपं करोति, यथाऽसंयता गृहगोधादयो महिषादयो वा न जाग्रति. एतेन सं-

यतान् जागरयतोऽपि न दोष इत्युक्तं. कालग्रहणविधिश्च यथासंप्रदायमवसेयः. ॥ २७ ॥

॥ मूलम् ॥—तो पडिक्कमित्तु कालस्स । तस्स पाउाइयं च गहिऊण ॥ पहरस्स चउ-त्थंसे । ठविहमावस्सयं कुणइ ॥ २८ ॥ व्याख्या—ततः स्वाध्यायकरणानंतरं "तस्सत्ति" पंचम्यर्थे षष्ठी प्राकृतत्वात्. तस्माद्दैरात्रिकात्कालात्प्रतिक्रम्य प्रज्ञाते नवं प्राज्ञातिकं कालं गृहीत्वा तस्यैव प्रहरस्य चतुर्थांशे सावशेषे सति षड्विधमावश्यकं करोति. तत्करणविधिः—पढमं चिय सामाइअं कड्ढिऊण चरित्तविसुद्धिनिमित्तं पणवीसूसासपरिमाणं काउसग्गं करंति, तउ नमुक्कारेण पारित्ता दंसणविसुद्धिनिमित्तं चउवीसत्थयं पढंति. पणवीसूसासपरि-माणमेव काउसग्गं करंति. तउ नमुक्कारेण पारित्ता सुअनाणविसुद्धिनिमित्तं सुअनाणत्थुइं करंति काउसग्गं च तद्विशुद्धिनिमित्तं करंति. तत्थ य पाउसियथुइमाइयं अहिगयकाउस-ग्गपज्जंतमइयारं चिंतंति. तउ नमुक्कारेण पारित्ता सिद्धाण थुइं काऊण उक्कुडुअ निविठा मुहणंतयं पडिलेहित्ता स सीसोवरियं कायं पमज्जंति. तउ वंदित्ता आलोयंति. तउ सामा-इयपुव्वयं पडिक्कमंति, तउ वंदणपुव्वयं खामंति. तउ कयकिइकम्मा सामाइयपुव्वयं काउस्स-

ग्गं करंति, तत्थ य चिंतंति कस्स निउंगं निउत्ता वयं, जारिसं तवं पवज्जामो जारिसेण तस्स हाणीन भवइ. तओ चिंतंति छम्मासखमणं करेमो. एगदिवसेण ऊणं तहावि न सक्केमो तउ चत्तीसइमं तीसइमं जाव चउत्थं आयंबिलं एगठाणं एगासणं पुरिमड्ढं निविगइं पोरिसिं नमुक्कारसहियं चत्ति. एवं जं समत्था तत्तं काउं तमसद्दभावाहिं य ए करंति. पछा वंदित्ता गुरुसक्खियं पयजंति. सव्वे नमुक्कारइत्तगा समगं उट्ठंति वोसरावंति निसीयंति य. एवं पोरिसिमाइसु विन्नासा. तउ तिन्नि थुईओ अप्पसद्दगं दिंति, जहा घरकोइलाइसत्ता न उट्ठंति. तउ बहुवेलं संदिसावंति, जइ चेईयाइं अत्थियतो वंदंति, एवं च पडिक्कमणकालं तुलंति, जहा पडिक्कंताणं थूइ अवसाणे चेव पडिलेहणा भवइत्ति. ॥ २८ ॥

॥ मूलम् ॥—तो सव्वदोसमुक्कं । अचलमणोवगउंगमुक्कुडुओ ॥ अंगोवहिपडिलेहं । करेइ तो सोहए वसहिं ॥ २९ ॥ व्याख्या—तत आवश्यकानंतरं उत्कुटकः पुतास्पृष्टभूतलः सन् अंगोपधेः शरीरपरिभोग्यानां मुखपोतिकाद्युपकरणानां प्रतिलेखनां करोति. ननु कः प्रतिलेखनायाः प्रारंभकालः? उच्यते-स्तुतित्रयानंतरं—मुहपत्तिय रयहरणे । दु निसि-

जा चोलपट्टकप्पतिए ॥ संथारुत्तरपट्टे । इक्कारसमे तहा दंडे ॥ १ ॥ इत्येतावत्सूपकरणेषु य· था सूर्य उदेति, तथा प्रतिलेखना प्रारब्धव्या. एतेन ये पाणिरेखानिरीक्षणे प्रतिलेखनाद्· ण इति मन्यंते ते निरस्ताः, सप्रकाशाप्रकाशोपाश्रयभेदेन पाणिरेखानिरीक्षणस्यानैकांतिक· त्वात्. उक्तं च--अरुणावासगपुव्वं परुप्परं पाणिपडिलेहा एए उ अणाएसत्ति. पंचकल्पेऽ· प्युक्तं—सूरोदये जिणाणं । पमिलेहणियाइ आढवणकालो ॥ थेराणणुग्गयंमि । उवहिणा सो तुलेयव्वो ॥ १ ॥ कथं प्रतिलेखनां करोतीत्याह—सव्वदोसमुक्कमित्यादि त्रीण्यपि क्रिया· विशेषणानि, सर्वैः प्रतिलेखनादोषैर्मुक्तं यथा भवत्येवं ते च षट्, यदाह–आरभडा सम्मं· द्दा । वज्जेयव्वा य मोसली तइया ॥ पप्फोडणा चउत्थी । विक्खित्ता वेइया छट्ठा ॥१॥ तत्र वि· परीतकरणात्त्वरितं वान्यवस्त्रग्रहणादारभटा प्रतिलेखना १. वस्त्रांतः कोणसंवलनेनोपधेरुप· रि निक्षिप्य प्रतिलेखनाकरणेन वा संमर्दा २. तिर्यगूर्ध्वं अधो वा वस्त्रेण कुड्यादिसंघट्टना· दामोसलित्ति प्राकृतत्वादामर्शवती ३. रेणुगुंठितस्य वस्त्रस्य गृहस्थवत्प्रकर्षेण धूननात्प्रस्फो· टिका ४. प्रत्युपेक्षितस्य वस्त्रस्याप्रत्युपेक्षिते क्षेपणाद्वस्त्रांचलानां वा ऊर्ध्वं विक्षेपणाद्विक्षि·

ता ५, षष्ठी वेदिका, अत्र संप्रदाय.—"वेइया पंचविहा पन्नत्ता, त जहा—उड्ढवेइया १, अहोवेइया २, तिरियवेइया ३, दुहउ वेइया ४ एगउ वेइया च ५. तत्थ उड्ढवेइया उवरि जाणुगाणं हत्थे काऊण पमिलेहेइ. अहोवेइया अहोजाणुगाणं हत्थे काऊण पमिलेहेइ. तिरियवेइया संघाडयाणं मज्झेणं हत्थे नेऊण पमिलेहेइ. दुहउ वेइया बाहाणं अंतरा दोवि जाणुगा काऊण पमिलेहेइ. एगउ वेइया एगं जाणुगं बाहाणं अंतरे काऊण पमिले-हेइत्ति. इमे दोषाः प्रतिलेखनायां त्याज्याः. अन्येऽपि—पलिहिलपलंबलोला । एगामोसा अ-णेगरूवधुणा ॥ कुणइ पमाणे पमायं । संकिए गणणोवगं कुजा ॥ १ ॥ अदृढं वस्त्रं गृह्णतः प्रशिथिलता, विषमग्रहणेन वस्त्रांचलानां प्रलंबनात्प्रलंबा, भूमौ पाणौ वा प्रत्युपेक्ष्यमाणवस्त्र-स्य सञ्चलनाल्लोला, मध्ये गृहीत्वा हस्ताभ्यां वस्त्रं घर्षयंस्त्रिभागशेषं करोतीत्येकामर्शा. संख्या-तिक्रमेण स्फोटादिकरणाद्युगपदनेकवस्त्रप्रत्युपेक्षणादनेकरूपधूनना, प्रमाणे प्रस्फोटा-दिसंख्यायां प्रमादं करोति, शंकिते संदेहे सति गणनांगुलिरेखास्पर्शनादिना द्वित्रिसंख्या-दिरूपा नामुपगच्छति गणनोपगमं यथात्तवत्येवं प्रस्फोटादिकं कुर्वतो दोषः. कथं तर्हि प्रति-

लेखनां कुर्यादित्याह–'अचलंति' अचलं दृढं यथा नवत्येवं. अचलग्रहणेन शेषा अपि तद्गुणाः सूचिताः, तद्यथा—उद्धं थिरं अतुरियं । सव्वं तावत्थमेव पप्फोडे ॥ तो बीयं पप्फोडे । तइयं च पुणो पमज्जिज्जा ॥ १ ॥ अणच्चावियं अवलियं । अणाणुबंधि अमोसलिं चेव ॥ छप्पुरिमानवखोडा । पाणीपाणपमज्जणं चेव ॥ २ ॥ अनयोर्व्याख्या—तत्र ऊर्ध्वं कायतो वस्त्रतश्च. कायत उत्कुटिको वस्त्रतस्तिर्यक् प्रसारितवस्त्रः, न तु कायत उत्थाय वस्त्रं वा ऊर्ध्वीकृत्य प्रत्युपेक्षयते. तथा संप्रदायत्वात्. स्थिरं दृढहस्ततया गृहीतं, अत्वरितं अद्रुतं यथा नवत्येवं सर्वं वस्त्रं तावत्प्रत्युपेक्षेत निरीक्षेत. न तु प्रस्फोटयेत्. तत्र च यदि जंतून् पश्यति ततो यतनयान्यत्र संक्रमयति, तददर्शनेन ततो द्वितीयमिदं कुर्यात्. यद्रुत प्रस्फोटयेत्. तृतीयं च पुनरिदं कुर्याद्यद्रुत प्रमृज्यात्, कथं पुनः प्रस्फोटयेत् प्रमृज्याद्वेत्याह–अनर्तितं यथा वपुषो वस्त्रस्य वा नर्त्तनं न भवति. अवलितं यथात्मनो वस्त्रस्य वा वलनं मोटनं न भवति. अननुबंधि न निर्व्यवच्छेदं, किंतु लक्ष्यमाणप्रस्फोटनादिविनाशं. 'आमोसलिंति' तिर्यगूर्ध्वमधश्च कुड्यादौ परामर्शरहितं यथा नवत्येवं. किमित्याह–'पुरिमंति'

षट् पूर्वाः, पूर्वं क्रियमाणतया तिर्यक्कृतवस्त्रप्रस्फोटात्मकाः क्रियाविशेषा येषां ते षट्पूर्वाः, ततो नवाखोटकाः प्रस्फोटनरूपाः कर्त्तव्याः. पाणौ प्राणिनां कुंथ्वादीनां प्रमार्जनं प्रस्फोटनत्रिकत्रिकोच्चरकालं त्रिसंख्यं प्राणिप्राणप्रमार्जनं कर्तव्यमिति गाथार्थः. तथा "अणुसोवउ-गत्ति" अनन्योपयोगं प्रतिलेखनाव्यतिरिक्तोपयोगरहितं यथा नवत्येवं. यदाह—पम्हिलेह-णं कुणंतो । मिहो कहं कुणइ जणवयकहं वा ॥ देइच्च पच्चक्खाणं । वाएइ सयं पडिच्छइ वा ॥ १ ॥ पुढवीआउक्काए । तेऊवाऊवणस्सइतसाणं ॥ पम्हिलेहणापमत्तो । छण्हंपि विरा-हगो होइ ॥ २ ॥ एवं प्रातस्त्यां प्रतिलेखनां कृत्वा प्रतिलेखनासमाप्तिसमकालं चोऊगते सूर्ये वसतिं शोधयति प्रमार्जयति. "तउ वसहिं पमज्जियकालं निवेयंति. अणे जणंति युश्समणंतरमेव कालं निवेयंती" त्यनुक्तमपि द्रष्टव्यं. ॥ २९ ॥

॥ मूलम् ॥—अह वंदिऊण सूरी । पुच्छइ कायव्वमज्ज किं जंते ॥ गुरु आएसेण कुण-इ । वेयावच्चं च सज्झायं ॥ ३० ॥ व्याख्या—अथ वंदित्वा सूरिमाचार्यं, उपलक्षणत्वादन्य-मपि पुरस्कृतमुपाध्यायादिकं पृच्छति, यत्पृच्छति तदाह—हे जदंत! अद्य मया किं कर्त्तव्य-

मिति. ततस्तस्य योग्यतां विज्ञाय वक्ति, जो वैयावृत्यं कुरु? स्वाध्यायं वा अधीष्वेति. ततः स साधुर्गुर्वादेशेन करोति वैयावृत्यं स्वाध्यायं वा, न पुनः स्वबुद्ध्या किंचित्करोति, यदाह—उट्ठट्ठमदसमदुवा—लसेहिं मासखमणेहिं ॥ अकरंता गुरुवयणं । अणंतसंसारिया जणिया ॥ १ ॥ ३० ॥ ततश्च—

॥ मूलम् ॥—किंचूणपोरसीए । अपक्किंतो य तरमकालस्स ॥ सुअविहिणा आसीणो । पडिलेहइ पत्तनिज्जोगं ॥ ३१ ॥ व्याख्या—इह चतुर्भागविभक्तस्य नभसो यदा प्रथमं भागं किंचिन्न्यूनं सूर्यः प्राप्तो भवति तदा किंचिदूना पौरुषी. अस्याश्च परिज्ञानाय—आसाढे मासे दोपया । पोसे मासे चउप्पया ॥ चित्तासोएसु मासेसु । तिपया हवइ पोरिसी ॥ १ ॥ अंगुलं सत्तरत्तेण । पक्खेण य दुअंगुलं ॥ वड्ढए हायए वावि । मासे मासे च अंगुलं ॥ २ ॥ जिट्ठामूले आसाढ-सावणे छहिं अंगुलेहिं पडिलेहा ॥ अट्ठहिं बीयतीयंमि । तइए दस अट्ठहिं चउत्थे ॥ ३ ॥ इत्येतद्गाथात्रयं स्पष्टं. सुप्रसिद्धत्वाच्च न व्याख्यातं, नवरं सत्तरत्तेणंति सप्ताहोरात्रेण, एतच्च निशीथपञ्चाशकापेक्षयोक्तं. अन्यथा सप्तरात्रेण सार्द्धेनेति

द्रष्टव्यं. तस्यां च किञ्चिदूनपोरुष्यां चरमकालस्य प्राभातिकस्य, तदभावे वैरात्रिकस्याप्यप्रातः क्रांतेश्चतुर्थपौरुष्यां तद्ग्रहेण स्वाध्यायमानत्वात्. यच्चूर्णिः—वेयत्तियपाभाइया दिवसट्ठा घित्ता चेव, आसीन उपविष्ट. पुव्वद्धे अपरद्धे मुहपत्तियमाइ पडिलेहा, इति वचनान्मुखपोतिकां प्रत्युपेक्ष्य ततः पात्रनियोगं वा पात्रप्रतिबद्धोपकरणजातं प्रत्युपेक्षते, कथं? श्रुतविधिना आगमोक्तरीत्या, श्रुतविधिश्चाय—पायस्स पायबंधो सोया उवउत्तो तह्वेसो मुहुणंतएण गुछंगुलइयं गुलीउ पफलाणि उक्कुरुयजाणवत्थे पलिमंथाइसु तन्न नवे ॥ ३१ ॥ अथ द्वितीयपौरुषीकर्तव्यमाह—

॥ मूलम् ॥—बीयाइए पोरसीए। अणुपेहइ पुवगहियसुत्तअमत्थं ॥ निक्काकालंमि मुणी। गुरुपुरउ करइ उवउगं ॥ ३२ ॥ व्याख्या—द्वितीयायामर्थपौरुष्यां प्राप्तायां पूर्वगृहीतस्य श्रुतस्यार्थमनुप्रेक्षते स्मरति, ततो निक्काकाले प्राप्ते, निक्काकालश्चोत्सर्गतस्तृतीयपौरुषीरूपः स्थविरकल्पिकानां, यत्र लोको यदा जुंक्ते तत्र तदानी वा एतेन अकालचर्या निषिद्धा, यदार्षं—अकाले चरसि भिक्खू। कालं नो पडिलेहसि ॥ अप्पाणं च किलामेसि। स-

न्निवेसं च गरिहसि ॥ २ ॥ तदानीं निष्क्रान्तो मुनिर्गुरूणां पुरत उपयोगं करोति, अत्रोपवृत्तिः—पढममावुच्छइ यहुत संदिस्सह उवउगं करेमि, उवउगकरावणियं करेमि काउस्सग्गं, अट्ठहिं उसासेहिं नमोकारं चिंतेइ, तउ नमोकारेण पारित्ता जणइ, संदिसह आयरिउ जणइ लाभो, साहु जणइ तहत्ति. तउ आयरिउ जणइ, जइ गहियं पुव्वसाहूहिंत्ति, तउ आवस्सियाए जस्स जोगुत्ति जं जं संजमस्स उवगारे वट्टइ, तं तं गिण्हिस्सामित्ति ॥ ३२ ॥ ततः किमित्याह—

॥ मूलम् ॥—आवस्सियाइ चलिउ । अव्वखित्तो अणाउलो असढो ॥ जुगमित्तदित्ती । आयपरविराहणविमुक्को ॥ ३३ ॥ अचियत्तं परिकुट्ठं । सामगं वा कुलं विवज्जंतो ॥ हिंमइ घरापरं सो । उक्कोसं जाव दोकोसं ॥ ३४ ॥ व्याख्या—निःक्रमणकालेऽवश्यकर्तव्यत्वादावश्यकीतया चलितः स्वोपाश्रयादिति गम्यते. अव्याक्षिप्तो गीतादिव्यासंगरहितः, अनाकुलः सर्वभिक्षाकेभ्यः पूर्वमहं गन्तामि, येन प्रभूतां भिक्षां प्राप्नोमीत्यौत्सुक्यरहितः, अशठः सरलचित्तः, शठो हि सारं वस्त्वशुद्धमपि शुद्धीकृत्य गृह्णीयात्, असारं च शु-

द्धमप्यशुद्धीकृत्य परिहरेदिति. तथा युगं चतुर्हस्तप्रमाणं तन्मात्रं पुरः क्षेत्रं दत्ता न्यस्ता दृष्टिः स युगमात्रदत्तदृष्टिः. अतिद्रूरचक्षुपातिसूक्ष्मसत्वानिरीक्षणात्, अत्यासन्नलोकने तु सहसा जीवं दृष्ट्वा पादसंहरणायोगात्. उपलक्षणत्वात् श्वानादीनां रक्षणार्थं पृष्ठतः पार्श्वतोऽपि दत्तोपयोगः. तथा "आयपरेत्यादि", पंकस्थाणुगर्त्तश्वानसंग्रामधेनुहयहस्त्यादिदूरीवनादात्मविराधनया बीजहरितादिवर्जनात्परविराधनया च विमुक्तः. "अचियत्तंति" अप्रीतिकं यत्र साधुप्रवेशे गृहिणां न प्रीतिः, प्रतिकुष्टं निषिद्धं. अत्र चूर्णिः—पच्छिकुट्ठं डुविहं इत्तरियं आवकहियं च, इत्तरियं मयगसूयगाइ, आवकहियं अणुज्जा सोंडमायंगादि. "मामगंति" यत्र गृहाध्यक्षो वक्ति मा मम गृहं कश्चिदागच्छत्विति. तेदेवं कुलं विवर्जयन् स साधुर्गृहाद्गृहं गृहपरिपाट्येत्यर्थः, हिंडते. कियंतं भूमिं यावदित्याह--उत्कर्षतो यावद् द्वौ क्रोशौ, परतो हि समानीतमशनादि मार्गातिक्रांतदोषदुष्टं स्याद्. यदाह विवाहप्रज्ञप्तिः—अह भंते खित्ताइक्कंतस्स कालाइक्कंतस्स मग्गाइक्कंतस्स, पमाणाइक्कंतस्स पाणभोयणस्स के अट्ठे पण्णत्ते? गोयमा! जेणं निग्गंथे वा निग्गंथी वा फासुअं एसणिज्जं असण-

पाणखाइमसाइमं अणुग्गए सूरिए पडिग्गहित्ता, उग्गए सूरे आहारमाहरेइ, एसणं गोयमा! खित्ताइक्कंते पाणभोयणे ॥ १ ॥ जेणं निग्गंथो वा निग्गंथी वा जावसाइमं पढमाए पोरिसीए पडिग्गहित्ता पढिमं पोरिसिं उवायणावित्ता आहारमाहरेइ, एसणं गोयमा! कालाइक्कंते पाणभोयणे ॥ २ ॥ जेणं निग्गंथो वा निग्गंथी वा जाव साइमं पडिग्गहित्ता परं अद्धजोयणमेराए वीइक्कमावित्ता आहारमाहरेइ, एसणं गोयमा! मग्गाइक्कंते पाणभोयणे ॥ ३ ॥ जेणं निग्गंथो वा निग्गंथी वा जाव साइमं पडिग्गहित्ता परं बत्तीसाए कवलाणं कुक्कुडिअंडगप्पमाणाणं आहारमाहरेइ, एसणं गोयमा। पमाणाइक्कंते पाणभोअणे ॥ ४ ॥ ३४ ॥

अथैवं हिंसमानो यद्भिधत्ते तदाह—

॥ मूलम् ॥—वज्जिय बत्तीस गवे-सणाइगहणेसणाइ दस दोसे ॥ गुरु अतिहिगिलाणाणं। पडिन्नत्तं गिण्हए नत्तं ॥ ३५ ॥ व्याख्या—इष्यते साधुभिरित्येषणा नक्तादिशुद्धिः, सा च गवेषणैषणा ग्रहणैषणा ग्रासैषणेति त्रिधा. तत्र जिघृक्षितस्य नक्तादेर्निरीक्षणं गवेषणा, तद्विषयैषणा गवैषणैषणा. ग्रहणं तस्यैवादानं तद्विषया एषणा ग्रहणैषणा, ग्रासो

गृहीतस्य नक्तादेः परिभोगस्ताऽपया ५षणा ग्रासैषणा. इयं च पुरस्ताऽदयत, भोजनकाल एव तस्याधिकृतत्वात्. गवेषणैषणायां च द्वात्रिंशद्दोषा वर्ज्याः. यथा—साधूनामाधया संकल्पेन सचित्तस्याचित्तीकरणमाधाकर्म ॥ १ ॥ यद्गृहिणा स्वार्थं राद्धं, पश्चाद्भव्यत्युद्देशेन पृथक्कृतं तदौद्देशिकं त्रिधा, तत्र यद्यथोद्धृतं तत्तथाभूतं यावदर्थिकादीनां चतुर्णामुद्दिश्ययत्किंचिन्मानमुद्दिष्टौद्देशिकं ॥ १ ॥. यत्पुनरुद्धृतं कूरादिदध्यादिना संस्क्रियते तत्कृतौद्देशिकं ॥ २ ॥. यत्त्वग्न्यादिना जीवारंभेण संस्क्रियते तत्कर्मौद्देशिकं ॥ ३ ॥ एतत् त्रिविधमपि चतुर्धा, यावदर्थिकार्थमुद्देशं, पाखंड्यर्थं समुद्देशं, निर्ग्रंथार्थं च समादेशमिति द्वादशधौद्देशं. यदविशुद्धकोटिसंगाद्विशुद्धमप्यशनादि दूष्यते, तत्पूर्तिकर्म द्विधा, तत्राधाकर्मिकधूमवाष्पादिसंपृक्तं सूक्ष्म तदत्याज्यं, बादरं तु आधाकर्मिकचुल्ल्युत्राजनादिस्पृष्टं त्याज्यं. आधाकर्मिकगृहमपि तद्दिनाद्ध्वं दिनत्रयं त्याज्यं पूतिदुष्टमिति ॥ २ ॥ यद्गृहिणा स्वस्य यावदर्थिकानां पाखंडिनां यतीनां वा कृते मिलितमेव पक्तुमारभ्यते, तन्मिश्रं त्रिधा ॥ ४ ॥ पंक्तिगतगृहत्रयमध्यादेकगृहे साधौ भिक्षां गृह्णति द्वितीये साधौ दत्तोपयोगे तृतीयगृहाद्दात्री स्वहस्तादि-

स्थापितं नक्तमानयति, साऽचिरस्थापनाकल्पा. यत्साध्वर्थं गृही स्थापयित्वा मुंचति सा चिरस्थापना. ॥ ५ ॥ यत्पुत्रादौ भोजनं याचमाने साध्वर्थमुत्थिता तवापि दास्यामीति ब्रूते सा सूक्ष्मा, यच्च यतीनागंतून् यियासून् ज्ञात्वार्वाक् परतो वा गृही विवाहादिकं करोति, सा बादरा चेति प्राभृतिका द्विधा ॥ ६ ॥. यदंधकारस्थस्य वस्तुनो यत्यर्थं दीपादिना प्रकटनं बहिरानयनं वा तत्प्रादुःकरणं द्विधा ॥ ७ ॥. यत्स्वपरसत्काभ्यां द्रव्यभावाभ्यां विसाधितं तत्क्रीतं चतुर्धा. ॥ ८ ॥ यदुछत्रं याचित्वा गृही दत्ते तत्प्रामित्यं ॥ ९ ॥. यदसारेण वस्तुना सारं परावर्त्य गृही दत्ते तत्परावर्त्तितं ॥ १० ॥. यत्स्वग्रामात्परग्रामाद्वा संमुखमानीतं तदभ्याहृतं, हस्तशतांतरानीतं च कल्पते ॥ ११ ॥. यन्मुद्रितकुतुपादिमुखं यतिहेतोरुन्मुद्यापरिभोग्यं कपाटं चोद्घाट्य प्रदत्ते तदुद्भिन्नं ॥ १२ ॥. यन्मालादिभ्य उत्तार्य कुंभादिभ्यो वाकृष्य करदुर्ग्राह्यं दत्ते तन्मालापहृतं जघन्यादिभेदात्त्रिधा, पार्ष्ण्युत्पाटनमात्रेण शिक्यकादेर्यद्दात्री ददाति तज्जघन्यं, मंचकाद्यारोहेण मध्यमं, निःश्रेण्यारोहणेनोत्कृष्टं ॥ १३ ॥. स्वामी राजादिः, प्रभुर्गृहाध्यक्षः, एतौ स्वायत्तमनुष्येभ्यः, स्तेनाश्च पांथादिभ्यो बलाद्गृहीत्वा

एको दत्ते, यच्च को-

यत्साधुभ्यो ददति तदाद्य त्रिधा ॥ १४ ॥ [illegible]
टुंबिकप्रहितहालिकभोजनमध्यात्तयोरननुज्ञया कश्चित्साधवे दत्ते, जडो हस्ती, तत्सत्कं
पिंडं राज्ञा गजेन वाननुज्ञातं यदाधोरणः साधवे दत्ते, तत्साधारणचोल्लकजडुब्रेदादनिसृष्टं
त्रिधा ॥ १५ ॥. यद्गृहिणा मूलारंभे स्वार्थं कृते. पश्चाद्यावदर्थिकानां पाखंडिनां यतिनां वा
कृतेऽधिकं गृही क्षिपति सोऽध्यवपूरकस्त्रिधा. ॥ १६ ॥ इति षोडशोद्गमदोषाः ॥ इह आ-
धाकर्म कर्मौद्देशिकश्च पाखंडिश्रमणनिर्ग्रंथरूपं भेदत्रयं. आहारपूतिः, मिश्राध्यवपूरकयोश्चां-
त्यं भेदद्वयं, बादरप्राभृतिका चेत्यविशुद्धिकोटि तद्भेदेनापि स्पृष्टं सर्वं त्यजंति, अनिर्वाहे तु
विविच्य तदेव त्यजंति, घृतादिकं तु तावन्मात्रमेव त्यजंति, न शेषमिति. अथोत्पादनादो-
षाः षोडश यथा बालस्य क्षीरपानमज्जनमंडनक्रीडनांकधात्रीत्वेन लब्धः पिंडो धात्रीपिंडः
१. संदेशनयनानयनरूपेण दौत्येन लब्धो दूतपिंडः २. लाभालाभादिनिमित्तकथनेन लब्धः
पिंडो निमित्तपिंडः ३. जातिकुलगणकर्मशिल्पैरात्मनो गृहस्थस्य तुल्यताख्यापनेन लब्ध
आजीवनापिंडः ४. यो दाता यद्भक्तस्तत्पुरः स्वमपि तद्भक्तं दर्शयन् यद्भजते स वनीपकपिं-

मः ५. दातुरौषध्यादिकथनेन वैद्यादिसूचनेन वा लब्धश्चिकित्सापिंडः ६. बलविघातपः संपन्नस्य क्रोधजनयाद्गृही दत्ते, सक्रोधपिंडः ७. प्रशंसितोऽपमानितो वा दातुरभिमानेन यदा-दत्ते स मानपिंडः ८. पुनः पुनर्ग्रहणार्थं नानारूपकारिणो मायापिंडः ९. गृह्या बहुतरमटतो लोभपिंडः १०. मातृपितृश्वश्रूश्वशुरादिसंबंधं कुर्वतः पूर्वं पश्चाद्वा दातारं स्तुवतो वा संस्तवदोषः ११. विद्यामंत्रौ प्राग्व्याख्यातार्थौ, चूर्णमदृश्यांजनादि, योगः पादप्रलेपादिः, तत्प्रयोगेण लब्धा विद्यामंत्रचूर्णयोगपिंडाः १५. गर्भाधानपरिशाटकरणादिनाऽन्नादौ मूलकर्मपिंडः १६. एते च मिलिता द्वात्रिंशद्भवैषणैषणादोषाः. ग्रहणैषणायां च दोषा दश, तद्यथा—

शुद्धमपि पिंडमाधाकर्मादिशंकया गृह्णतः शंकितदोषः १. सचित्तेन पृथ्व्यप्वनस्पतिरूपेण, अचित्तेनापि लोकागमगर्हितेन मधुमद्यमूत्रोच्चारादिना खरंटितेन करेण भाजनेन वा गृह्णतो म्रक्षितदोषः २. सचित्तेषु पृथ्व्यादिष्वनंतरं परंपरं वा यन्निक्षिप्तं, तद्गृह्णतो निक्षिप्तदोषः ३. सचित्तेन फलादिना ढक्कं वस्तु गृह्णतः पिहितदोषः ४. हस्ते भाजने वा स्थितं सचित्तेऽचित्ते वा निधाय तेन हस्तेन भाजनेन वा यदि दात्री ददाति तदा संहृतदोषः ५.

स्थविरादिभेदायमान गृहता दायकदोषः ६. यदाह—थेरपहुपंथुविवर-जरअधत्तत्रमत्तउ-
म्मत्ते ॥ करचरणछिन्नपयलिअ-नियलंदुयपाउयारूढे ॥ १ ॥ खंभइ पीसइ कुंजइ । कत्तइ
लोढेइ विखिणइ पिंजइ ॥ दलइ विरोलइ जेमइ । जा गुव्विणि बालवत्ता या ॥ २ ॥ तहत्थ-
काए गिह्नइ । घट्टइ आरत्तइ खिवइ दहु जइ ॥ साहारणचोरियगं । देइ परक्कं परहं वा
॥ ३ ॥ उवइ वलिं उवत्तइ । पिट्ठराय तहासपच्चवायाजा ॥ दिंतेसु एवमाइसु । उहेण मुणी
न गिह्नंति ॥ ४ ॥ योग्यमयोग्यं च द्वे अपि संमिश्र्य यदा ददाति तदा उन्मिश्रदोषः ७. अप-
रिणतं द्विधा, द्रव्यभावभेदात्. तत्र सचित्तं वस्तु द्रव्यापरिणतं, भावापरिणतं द्विधा, दायकभा-
वकभेदात्. तत्र द्वयोः साधारणेऽन्यादावेकेन दीयमाने द्वितीयस्य भावो न दानपरिणामवानिति
दायकभावापरिणतं, ग्राहकभावापरिणतं तु यत्र द्वयोः साध्वोर्मध्ये एकस्य मनसि तदन्ना-
दिकं शुद्धं परिणतं, अन्यस्य च तदेवाशुद्धमिति ८. दध्यादिलेपकृल्लिप्तं, तत्र च संसृष्टाभ्यां
पात्रकराभ्यां सावशेषद्रव्येण चाष्टौ भंगाः, अत्र समभंगेषु गृहतो लिप्तदोषः, तेषु निरवशे-
षद्रव्यतया पश्चात्कर्मदोषस्य परिहर्तुमशक्यत्वात् ९. यत्र दीयमाने परिशाटिर्न भवति स छ-

र्दितदोषः १०. एवं एते सर्वेऽपि मिलिता द्विचत्वारिंशद्दोषाः. अथ गाथार्थः—एवमुक्तान् गवेषणाया द्वात्रिंशतं, ग्रहणैषणायाश्च दश दोषान् वर्जयित्वा साधुर्गुर्वतिथिग्लानेभ्यः प्रवि- क्तं विभागेनेत्यर्थः, क्तं उपलक्षणत्वात्पानकमपि गृह्णाति. यदागमः—जइ तरुणो निरु- वहिउं । चुंजइतो मंरुलीइ आयरिउं ॥ असुहुस्सवीसुगहणं । एमेव य होइ पाहुणए ॥१॥ आचार्यस्य पृथक् क्तादिग्रहणेऽमी गुणाः—सुत्तत्थथिरीकरणं । विणउं गुरुपूअ सेहयदु- माणो ॥ दाणवइसद्धिबुद्धि । वुड्ढीवल्लवरूणं चेव ॥ १ ॥ "गिलाणणंमित्ति" चतुर्थ्यर्थे ष- ष्ठी प्राकृतत्वात्, न त्वतिथिगौरव्याद् ग्लानश्चाशक्तत्वान्न भिक्षार्थं पर्यटतीति, आह—

॥ मूलम् ॥—अइसयसुअवायकहा-इएहिं गुरुउं जिणुव आयरिउं ॥ तो सो सयं न हिंसइ । भिक्खाए परियरे संते ॥ ३६ ॥ व्याख्या—अतिशयो देवादिकृतो महिमा, श्रुतं स्वपरसमयात्मकं, वादः परवादिवदनमुद्रादायी तर्कविशेषः, कथा धर्मोपदेशः, आदिशब्दा- द्योगानुयोगदानादयः, एभिर्गुणैर्जिनस्तीर्थंकर इव आचार्यो गुरुगौरव्यः, ततः स आचार्यः स्वयं भिक्षायै न हिंसते. अयं भावः—आचार्ये भिक्षार्थं भ्राम्यति अहो! दुष्टशिष्यका अ-

स्म भगवते नक्तमात्रमपि नानयंतीति प्रकुपिता देवता गच्छमपि विनाशयेत्, श्रुत च तस्य
भूरिभ्रमणश्रांतस्यापरावर्तनया परिगलेत्. परवादी वादार्थमागतस्तं भिक्षाकमालोक्यावही-
लयेत्. चातुर्वर्ण्यपूर्णे सदसि धर्मदेशनां वितत्य भिक्षार्थं भ्रमन्नयं महिम्ना भ्रश्येत्, अतः
स्वयमाचार्यो न पर्यटति. उक्तं च-उप्पन्ननाणा जह नो भमंति । चउत्तीसबुद्धाइसया जि-
णंदा ॥ एवं गणी अष्टगुणोववेउं । सत्थात्र नो हिंडइ भिक्खकज्जे ॥ १ ॥ अत्रापवादमाह-
'परियरेऽसंतत्ति' असति साधुपरिवाररहितस्य तस्यापि विहरणानुज्ञानात्. सत्यपि परिवारे
एषणाविशेषशुद्ध्यर्थं जिनकल्पादितुलनार्थं वा स्वयमपि पर्यटतीत्यपि द्रष्टव्यं. ॥ ३६ ॥ अथ
चारित्रस्याहारशुद्धिमूलत्वादेषणाविषयं विशेषोपदेशमाह—

॥ मूलम् ॥—दुहपीमियावि रोगा-उरावि अट्ठाण परिकिलंतावि ॥ निंदंति नावियं-
मणा । समणा न हु एसणं पायं ॥ ३७ ॥ व्याख्या—स्पष्टा. नवरं प्रायोग्रहणादागाढकार्ये
पंचकपरिहान्याऽन्नेषणीयमपि गृह्णतोऽदुष्टा एवेति. ॥ ३७ ॥ अथ गृहीतस्य नक्तस्य विधिमाह—

॥ मूलम् ॥—तो वसहीए पविट्ठो । निसीहियाए पमिक्कमे इरियं ॥ विहिणालोइयनि-

म्मिय-सज्झाउं वीसमेइखणं ॥ ३८ ॥ व्याख्या—ततो नकगृहणानंतरं वसतौ प्रविष्ट "इरियंत्ति" ईर्यापथिकीं प्रतिक्रामति. कथं प्रविष्ट इत्याह-' निसीहियाएत्ति ' वाह्यव्यापारनिषेधेन निर्वृत्ता नैषेधिकी. तया इयं च शेषसामाचारीं सूचयति, सा चेयं-गोचरमागतः साधुः प्रथमं नसतेरग्रद्वारे मध्यदेशे मूलद्वारे च त्रिषु स्थानेषु नैषेधिकीं विधत्ते. ततः सागारिकाभावे पादौ प्रमार्ष्टि, गुरुदर्शने च नमो खमासमणाणमित्युक्त्वा इषन्नमन्नंजलिबंधं रचयति. उपर्यधश्च भुवं प्रमृज्य दंडकं स्थाने मुंचति, कल्पादिकं चोपधेरुपरि मुंचति. पटलकानि च पात्रकोपरि स्थापयति, सति संभवे कायिक्यादिव्युत्सर्गं विधाय गुरोः पुर ईर्यां प्रतिक्रामति, कायोत्सर्गं तु आनिर्गमप्रवेशं गोचरातिचारान् चिंतयति. "काउस्सग्गंमि ठिउ चिंतइ समुदाणिए अइयारे" इत्योघनिर्युक्तिवचनात्. तथा च चूर्णिः—

"सो य अइयारो साहुणो गमणे पडुच्च होज्जा नत्तपाणा वा विप्पमाणे जो अइयारो तं अणुचिंतेऊण उस्सारेइ." ततश्चतुर्विंशतिस्तवं भणित्वा-अवखिचाउत्तं । उवसंतमुवट्ठियं च नाउण ॥ अंणुन्नवि तु मेहावी । आलोइज्जा सुसंघए ॥ १ ॥ इति वचनाद्व्याक्षेपादिरहितं

गुरुं विज्ञाय उपयुक्ते गुरौ संदिसत्तालोचयामीत्यनुज्ञाप्य तत्पुरोऽनूत्यङ्गंगान्यमोटयन्नन्यदजल्प-
स्तच्चित्तो मूकं नातिगाढस्वरं संयतजातया श्राद्धेन श्राविकया वा व्यापारं कुर्वत्या येन जा-
जनेन हस्तेन वा यद्यथादत्तं तत्तथालोचयति. यदि पुनर्दिवसः स्वल्पः, स्वयं चासौ श्रांतः,
गुरुर्वा कुलादिकार्येण व्यापृतः, ग्लानस्य वा वेलातिक्रमः स्यात् तदा "पुरकम्मपच्छकम्मे अ-
प्प असुद्धे उव्हमालोए" इति वचनात् पुरःकर्म पश्चात्कर्म अल्पं न किंचिदस्तीत्यर्थः. अशु-
द्धं वाऽधाकर्मादि अल्पं नास्तीत्योघत एवालोचयति. ततो मुखपोतिकया शिरः सपटलं च
पतद्ग्रहं प्रमार्ज्य मार्जाराद्यापातशंकया ऊर्ध्वमधस्तिर्यक्दृशं ददानो हस्तधृतपतद्ग्रहोऽधो-
वनतकायो नक्तपानं च गुरोर्दर्शयति. यच्च न सम्यगालोचितं तदतिचारशुद्ध्यर्थं "पडिक्क-
मामि गोअरचरियाए भिक्खायरियाए" इत्यादि दंडकमुक्त्वा कायोत्सर्गं करोति. तत्र च
"अहो जिणेहिं सावज्जा" इति गाथां चिंतयति, नमस्कारं गाथाद्वयं चेत्यन्ये. ततः पारयि-
त्वा चतुर्विंशतिस्तवं भणित्वा यदि पूर्वं न प्रस्थापितस्तदा स्वाध्यायं प्रस्थापयति. ततः क्षणं
जघन्यतो गाथात्रयमात्रं स्वाध्यायं करोति, उत्कृष्टतो महाप्राणध्यानबलाच्चतुर्दशापि पूर्वा-

ण्यंतर्मुहुर्तेन परावर्तयति. एवं च धातुद्रोत्रादयो दोषाः परित्यक्ता भवंति. एतदेवाह—"विहिणालोइयनिम्मियसज्झाउं वीसमेइ खणं" इत्युक्तार्थं. ॥ ३८ ॥ ततः—

॥ मूलम् ॥—कयआउराइकज्जो । संवरणं पारिउं तहिं पएहिं ॥ जुंजेइ अपरिसाडी । आलोए पंचगयदोसं ॥ ३९ ॥ व्याख्या—कृतानि, आतुरग्लानाः, आदिशब्दाद्बालवृद्धादयस्तेषामौषधपथ्यपारिष्ठापनिकादीनि कार्याणि येन स कृतातुरादिकार्यः, यदार्ष—जे गिलाणं पडियरइ से मं पडियरइ, जे मं पडियरइ से गिलाणं पडियरइत्ति. ततः संवरणं प्रत्याख्यानं पुरिमार्धादिकं पारयित्वा षड्भिः पदैराहारकारणैः, तानि चामूनि—क्षुद्वेदनोपशमार्थं १, वैयावृत्यार्थं २, ईर्याशुद्ध्यर्थं ३, सत्तदशधा संयमपालनार्थं ४, प्राणधारणार्थं ५, स्वाध्यायादिधर्मचिंतार्थं वा जुंक्ते. ६. न निष्कारणं जुंक्ते इत्यर्थः. यदाह—छण्हमण्णयरे गाणे । कारणंमि य आगए ॥ आहारिज्ज मेहावी । संजएसु समाहिए ॥ १ ॥ वेयण वेयावच्चे । इरियट्ठाए य संजमट्ठाए ॥ तह पाणवत्तियाए । छट्ठं पुण धम्मचिंताए ॥ २ ॥ कथं जुंक्ते इत्याह—अपरिशाटिः कवलान्मुखाच्च परिशाटिमकुर्वन्, क्व जुंक्ते? आलोके सूक्ष्मजीवरक्षार्थं सप्रकाश-

स्थाने, न पुनर्यद्दस्यादीनामाज्ञाके, जुगुप्सादिनिबंधनत्वात्. उक्तं च—उक्कायदयायंतोवि । संजउ दुल्लहं कुणइ बोहिं ॥ आहारे नीहारे । दुगंछिए पिंडगहणे य ॥ १ ॥ "पंचगयदोसत्ति" क्रियाविशेषणं, पंचसंख्यागता अन्नावं प्राप्ता दोषा ग्रासेषणासत्का. यत्र भोजने तत्पंचगतदोषं यथा भवत्येव. ते चामी—वस्तेर्बहिर्मध्ये वानुरूपाणि खंडमंडकादीनि द्रव्याणि संयोजयतः संयोजनादोषः १. आहारस्य प्रमाणं द्वात्रिंशत्कवलादिरूपं, यावता यस्योदरं पञ्चभागोनं पूर्यते, तावद्वा तदतिरिक्तं भुंजानस्य प्रमाणदोषः २. इष्टमेतदिति रागेण भुंजानस्यांगारदोषः ३. अनिष्टमेतदिति द्वेषेण भुञ्जानस्य धूमदोषः ४. सत्याहारकारणेऽभुञ्जानस्य कारणाभावे च भुंजानस्य कारणदोषः ५. आहारकारणानि प्रागेवोक्तानि, अकारणानि चामूनि—ज्वराद्यातंकशमनार्थं १, कुद्धदेवताद्युपसर्गनिवारणार्थं २; पुरुषवेदाद्युदये ब्रह्मधारणार्थं ३, वृष्टिमहिकादौ प्राणिदयार्थं ४, चतुर्थादितपश्चरणार्थं ५, अंत्यकाले शरीरत्यागार्थं ६, वा न भुंजीत. यदाह—आयंके उवसग्गे । तितिक्खया बंभचेरगुत्ती य ॥ पाणिदया तवहेउं । सरीरवोच्छेयणट्ठाए ॥ १ ॥ एएहिं छहिं ठाणेहिं । अणाहारो उ जो भवे ॥

धम्मं नाइक्कमे निक्खू । जाणजोगरओ भवेत्ति ॥ २ ॥ भोजनविधिश्चायं—निद्धमहुराणि पुव्वं । पित्ताइपसमणट्ठया भुंजे ॥ बुड्ढिबलवड्ढणट्ठा । दुक्खं च विगंचिउं निद्धं ॥ १ ॥ असुरसुरं अचवचवं । अदुयमविलंबियं अपरिसाडिं ॥ मणवयणकायगुत्तो । भुंजे अहपखिवणसोही ॥ २ ॥ ३ए ॥ ततः किं कुर्यादित्याह—

॥ मूलम् ॥—वहियावियारमत्तग-धावणपमुहे करित्तु तो कज्जे ॥ पहरम्मि चउत्थे सो । पडिलेहइ पत्तवत्थाइं ॥ ४० ॥ व्याख्या—वहिर्विचारः संज्ञार्थं गमनं, तद्विधिश्चायं—इह सधावो भुक्तोत्थिताः शुद्धोदकमादायावश्यकीपूर्वं निःक्रम्य युगलिताः समश्रेणिस्था इत्यर्थः, अत्वरमाणा विकथारहिताः स्थंडिलासन्नद्वयं प्राप्य पूर्वं उपविश्य डगलकानि गृहीत्वा तल्लग्नजीवापनोदार्थं तानि प्रस्फोटयंति. तत उत्थाय गुणवति स्थंडिले संन्यासकं प्रमार्ज्यानुजानातु यस्यायमवग्रहमित्युक्त्वा वामोरुनिवेशितरजोहरणदंडका दक्षिणकरगृहीतपात्रा दिवा पूर्वोत्तरयोर्दिशोः, रात्रौ तु याम्यायां अपि, तथा पवनस्य ग्रामस्य सूर्यस्य च पृष्ठमदत्त्वा विलीयंते यः संयतस्तत्रतीतः स कल्पाद्विक्रांते त्रायां निवसते, अथ छाया ना-

स्ति तदा व्युत्सृज्य मुहूर्त्तमात्रं तिष्ठेत्, ते कृमयः स्वयमेव परिणमंत. स्थानगुणाश्रामी —
अणावायमसंलोए । परस्सणुवघाइए ॥ समे अझुसिरे यावि । अचिरकालकयंमि य ॥ १ ॥
विच्छिण्णे दूरमोगाढे । नासन्ने बिलवज्जिए ॥ तसपाणबीयरहिए । उच्चाराईणि वोसिरे ॥
॥२॥ अनयोर्लेशतो व्याख्या—आपातोऽभ्यागमः, संलोको दर्शनं, तत्र मनोज्ञसंयतवर्जमि-
तरस्यपरपक्षपातसंज्ञसंलोकरहिते. परस्यानुपघातिके यत्र कस्यापि बाधा न भवतीत्यर्थः. समे
लुप्तनरहितेऽशुषिरे तृणादिरहितेऽचिरकालकृते यस्मिन्नृतौ अन्यादिना यत्स्थंडिलं जातं,
तस्मिन्नेव ऋतौ नान्यत्र, यत्र च ग्राम एकमपि वर्षं उषितस्तत्र द्वादश वर्षाणि यावत्स्थंडि-
लं स्यादित्यागमः. विस्तीर्णं जघन्यतोऽपि हस्तप्रमाणे, दूरमवगाढेऽग्न्यादिना येनाधो जघ-
न्यतोऽपि चत्वार्यंगुलानि प्रासुकीभूते, शेषं स्पष्टं. ततः संज्ञां व्युत्सृज्य स्थंडिलासन्ने त्रिजि-
श्चुलुकैराचमंति. ततो यथा गतास्तथा व्यावृत्य नैषेधिकीपूर्वमुपाश्रये विशंतीति. मात्रकं का-
यिक्यादिभाजनं, तस्य धावनं क्षालनं, प्रमुखशब्दात्स्वाध्यायवैयावृत्यादिसंग्रहः. ततो जो-
जनानंतरं बहिर्विचारमात्रकधावनप्रमुखानि कार्याणि कृत्वा प्रागुक्तकारणवशाज्जाते चतुर्थे

प्रहरे स मुनिः पात्रोपकरणानि वस्त्राणि शारीरिकानि प्रत्युपेक्षते. अत्रापि पूर्वं मुखवस्त्रिकां प्रत्युपेक्षेत. यद्युपोषितस्तदा गुर्वादिसत्कमुपधिं प्रत्युपेक्ष्य, ततः स्वे पात्रकोपधी प्रत्युपेक्षते यावदंते चोलपट्टं, भुक्तवांश्च चेत्तदा मुखवस्त्रिकानंतरं चोलपट्टं प्रत्युपेक्षते, ततः स्वं पात्रकं, ततो गुरूणामुपधिं, ततस्ताननुज्ञाप्य स्वमुपधिं रजोहरणं चांते प्रत्युपेक्षते. ॥ ४० ॥

॥ मूलम् ॥—तो काउं सज्झायं । तुरियंसे पडिक्कमित्तु कालस्स ॥ सत्तावीसं पेहेइ । थंडिले तइयउत्तासो ॥ ४१ ॥ व्याख्या—ततः प्रत्युपेक्षणानंतरं स्वाध्यायं कृत्वा उपलक्षणत्वादन्यदपि वैयावृत्यादिकं कृत्वा तुर्यांशे तस्यैव प्रहरस्य चतुर्थभागे सावशेषे सति कालप्राभातिकाद्दैरात्रिकाद्वा प्रतिक्रम्य " दिवसचरिमपोरि-सिए चउभागावसेसाए ॥ कालग्गहणभूमिउं । तउ पडिलेहियव्वाउं ॥१॥ इति चूर्णिवचनात्. त्रीणि कालयोग्यानि जघन्यतोऽपि हस्तांतरितानि स्थंडिलानि, तथा द्वादशद्वादशोच्चारप्रश्रवणयोः, तत्र द्वारस्यांतरासन्ने मध्ये दूरे च त्रीणि अध्यासिकानि स्थंडिलानि संज्ञार्त्तः सन् यानि सुखेन यायात्.

तथा त्रीणि अनध्यासिकानि तच्च्याऽपि स्थण्डिलानि, अतीवासुराऽध्यासिकाने यावच्चतु-
मशक्तो येषु संज्ञामुत्सृजेत्. एवमेतानि द्वारस्यांतः षट्, एवं द्वाराद्बहिरपि षट्, यथा एता
नि द्वादशोच्चारस्य, तथा द्वादश प्रश्रवणस्यापि, सर्वाग्रेण सप्तविंशति स्थंडिलानि, तदुपयु-
क्तोऽनन्यध्यानः सन् सा साधुः प्रत्युपेक्षते, यथा चतुर्विंशति स्थण्डिलानि प्रत्युपेक्ष्य ततः
कालस्थंडिलानि प्रत्युपेक्षते. यदाह—चउन्नागवसेसाए । चरिमाए पडिक्कमिंतु कालस्स ॥
उच्चारे पासवणे । गणे चउवीसइं पेहे ॥ १ ॥ अहियासिया य अंते । आसन्ने चेव मज्झ
दूरे य ॥ तिन्नेव अणहियासि य । अंतो उच्च बाहिरउं ॥ २ ॥ एमेव य पासवणे । वारस
चउवीसइं तु पेहित्ता ॥ कालस्स य तिन्नि भवे । अह सूरो अत्थमुवगाइ ॥ ३ ॥ ४१ ॥
अथ सांध्यं विधिमाह—

॥ मूलम् ॥—अत्थमिए दिणनाहे । सव्वविआरस्स उ गुरुसमक्कं ॥ गिह्यि पउंसकालं
। पहरं पकरेइ सज्झायं ॥ ४२ ॥ व्याख्या—स्थंडिलप्रत्युपेक्षणासमकालं अस्तमिते मध्यार्ध-
दिवे दिननाथे सूर्ये गुरोः समक्षं सत्यापितावश्यकाः, अत्र विधिः—यदि चैत्यगृहे स्थिता-

स्तदा पूर्वं चैत्यानि वंदंते. यद्व्यवहारचूर्णिः—जइ चेइयघरे ठिया वेयालियं कालं पक्किंता अकए आवस्सएगे से कए आवस्सए चेइए न वंदंति मासलघु. ततो यद्यव्याक्षिप्तो गुरुस्तदा सर्वे गुरुणा सह प्रतिक्रमितुमारभंते. यदि पुनर्धर्मकथादिना व्याक्षिप्तो गुरुस्तदा साधवो गुरुनापृच्छ्य यथा ज्येष्ठमावश्यकभूमौ संतिष्ठंते. तत्थ पक्किमंताण इमा ठवणा, तत्थ य पुव्वामेव ठायंता करेमि जंते सामाइयमिति सुत्तं करंति. ततः कायोत्सर्गेऽपि स्थिताः सूत्रार्थौ स्मरंति, तावद्यावद् गुरुरागच्छति. ततो गुरुः सामायिकसूत्रमाकृष्य कायोत्सर्गस्थो दैवसिकमतीचारं चिंतयति, तेऽपि कायोत्सर्गस्था एव दैवसिकमतिचारं चिंतयंति. अयं चावश्यकविधिरामूलं चूर्णुक्त एव लिख्यते—इह किर साहुणो कयसयलवेयालियं करणिज्जा सूरत्थमणवेलाए सामाइयाइं सूत्तं कड्ढित्ता दिवसाइयारचिंतणत्थं काउस्सग्गं करंति. तत्थ य गोसमूहणंतगाइयं अद्धिगयचिट्ठा काउस्सग्गपज्जवसाणं दिवसाइयारं चिंतंति, तओ नमुक्कारेण पारित्ता चउविसत्थयं पढंति. तओ संकासगे पक्खिवेहित्ता उक्कुडुयनिविट्ठा मुहुणंतयं पक्खिवेहित्ता ससिसोनरियं कायं पमज्जंति. तओ परेणं विणएण तिगरणसुद्धं किइकम्मं क-

रंति. एवं वंदित्ता उत्थाय उनयकरगहियरउहरणा अऊावयणकाया पुव्वपरिचिंतिए दोसे जहा रायणियाए संजयन्नासाए जहा गुरूसुणंति, तहा पवड्ढमाणसंवेगा मायामयविप्पमुक्का अप्पणो विसुद्धिनिमित्तमालोयंति. जइ नत्थि अइयारो ताहे सीसेण संदिसहत्ति नणिए गुरुहिं पडिक्कमहत्ति नाणियव्वं. अह अइयारो पायछित्तं पुरिमड्ढाइ दिंति, तउ गुरुदिन्नपायछित्ता विहिणा निसीइत्ता समनावन्नाविया सम्ममुवउत्तो अणवत्थपसंगनीया पए पए संवेगमावज्जमाणा दंसमसगाइ अगणेमाणा पयंपएण सामाइयमाइयं पडिक्कमणसुत्तं कड्ढंति. जाव तस्स धम्मस्सत्ति पयं. तउ उध्धुडिया अप्पुट्ठिउमि आराहणाए इच्छाइं जाव वंदामि जिणे चउवीसंति नणित्ता खामणानिमित्तं किइकम्मं करित्ता नणंति, इच्छामि खमासमणो उवट्ठिउमि अप्पंतरदेवसियं खामेउं जंकिंचियं अपत्तियं इत्यादि. पन्ना साहुदुगं खामंति, तउ आयरियस्स अच्चियावणनिमित्तं किइकम्मं करंति. आयरिअ उवज्झाए गाहा, एएणाणिसंबंधेण वंदणाणंतरं खमावणा. तउ सेसगावि जीवा खमावेयवा. तउ दुरालोइयं वा दुप्पडिक्कंतं वा हुजा, अणाभोगाइणा कारणेण तउ पुणोवि कयसामाइयसुत्तुच्चारणा चरि-

डंति संथारपट्टयं उत्तरपट्टयं च पमिलेहित्ता दोवि एगत्थलाएउ उरुम्मि ठावंति, संथारय-भूमिं पमज्जंति, संथारयं च अच्छरंति, उत्तरपट्टं तत्थ य लग्गा मुहपोत्तियाए उवरिल्लं कायं पमज्जंति, हिट्ठिल्लं रयहरणेणं कप्पे वामे पासे ठवंति, पुणो संथारए चलंता भणंति जिंघ-जाइणं पुरंउ चिट्ठंताणं अणुजाणह पुणो सामाइयं तिन्निवारे कड्ढिऊण सोवई. कथं स्वपि-तीत्युच्यते, बाहूपधानेन वामपार्श्वेन कुक्कुटीपादप्रसारेण, यथा कुक्कुटी पूर्वमाकाशे पादौ प्रसारयति, एवं साधुनापि प्रथममाकाशे पादौ प्रसार्यौ, यदा एवं स्थातुं न शक्नोति, तदा भुवं प्रमृज्य पादौ स्थापयति, संकोचयंश्चोरुसंदंशके प्रमार्ज्य संकोचयति, शयानैश्च द्वौ हस्तौ परस्परमंतरे कार्यौ. यदाह—" दो हत्थे उ अबाहा नियमा साहुस्स साहुणो " रजोहरणं तु नोच्चीपंके न वामतश्च मोक्तव्यं, किंतु दक्षिणत एव, यन्निशीथसूत्रं—जे भिक्खू तुयट्टं। रयहरणं सीसपट्ठविज्जाहिं ॥ पुरओ व मग्गओ वा । वामे पासे निसन्नो वा ॥ १ ॥ सो आणं अणवत्थं । मित्थत्तविराहणं लहा दुविहं ॥ पावइ जम्हा तेणं । दाहिणपासंमि तं कुज्जा ॥ ॥२॥ अनेन रात्रौ स्वापविधिभणनेनोत्सर्गतः साधूनां दिवा स्वापो निषिद्धः, यदाह—' त-

अट्ठणं कप्पए न दिवा ' अपवादतस्तु मार्गश्रमादिकारणैः सोऽपि कल्पते. ॥ ४३ ॥ एवं स्वापविधिमुक्त्वा अथ विधिशेषमाह—

॥ मूलम् ॥—जायंमि अट्ठरत्ते । गिन्हइ तो अट्ठरत्तियं कालं ॥ अइनिद्दावसएणं । न साहुणा कहवि चत्तियव्वं ॥ ४४ ॥ व्याख्या—स्पष्टा, न वरं उत्कृष्टो विधिरुक्तः, यदाह—कालचउक्कं उक्को—सएण जहन्नतियं तु बोधव्वं ॥ बीयपयंमि दुगंतं । मायामयविप्पमुक्के· णत्ति ॥ १ ॥ ४४ ॥ अथ यामर्यादाविधिमाह—

॥ मूलम् ॥—सव्वे पढमे जामे । वसहा बीए तहा गुरु तईए ॥ जग्गंति चरमपहरे । सव्वे एसा हु गणमेरा ॥ ४५ ॥ व्याख्या—स्पष्टा, नवरं समर्था गीतार्थाश्च साधवो वृषभाः, एसत्ति एषः, हु अवधारणे गणस्य समुदायस्य मेरा मर्यादा, यत्र च समुदायो न स्यात्तत्र यथायोग्यं स्वापजागरो कार्यौ, न चास्य विधेरवकाशः. ॥ ४५ ॥ एवमहोरात्रानुष्ठानमुक्त्वाथ नित्यचिंतामाह—

॥ मूलम् ॥—किं तव चरणं चिन्नं । किमहीयं किं कयं कवणकज्जं ॥ किं वा मे कय·

सेसं । चिंतइ रत्तिं दिवं एवं ॥ ४६ ॥ व्याख्या—सुबोधा, नवरं अनया चिंतयाऽपवादमपि सेवमानः सालंबनत्वान्न विराधकः, यदाह—काहं अहिंति अहवा अहिस्सं । तवोवहाणेसु य उज्जमिस्सं ॥ गणं च नीइं बहुसारविस्सं । सालंबसेवी समुवेइ मुक्खं ॥ १ ॥ ४६ ॥ इत्युक्तं सप्रपंचं साधूनां दिनकृत्यं, अथ फलं वक्तव्यं, तच्च द्विधा, जघन्यत उत्कृष्टतश्च. तत्र उत्कृष्टतोऽपि द्विधा, अकर्मणां सकर्मणां च. तत्र सापेक्षयं प्रथममुत्कृष्टफलमाह—

॥ मूलम् ॥—इय विहरंतो साहू । आरूढो खवगसेढिनिस्सेणिं ॥ धूअकम्मा तंमि भवे । लहेइ लोअग्गिमं ठाणं ॥४७॥ व्याख्या—अत्र क्षपकश्रेणिर्यथा भवति तथा दर्श्यते—इह क्षपकश्रेणिप्रतिपत्ता उत्तमसंहननोऽविरतप्रमत्ताप्रमत्तानामन्यतमो विशुद्धपरिणामो विज्ञेयः, तत्र पूर्वधरोऽप्रमत्तः शुक्लध्यानोपगतोऽप्येतां प्रतिपद्यते, शेषास्त्वविरतादयो धर्मध्यानिन एव, क्षपणक्रमश्चायं, तद्यथा—प्रथममंतर्मुहूर्त्तेनानंतानुबंधिनश्चतुरोऽपि क्रोधादीन् युगपत् क्षपयति, तदनंतरंजागं च मिथ्यात्वे प्रक्षिपति, ततो मिथ्यात्वं सहैव तदंशेन क्षपयति, यथा क्षदारुणो दावानलोऽर्धदग्धेंधन एवेंधनांतरमासाद्योज्झयमपि निर्दहति, एवमसाव-

पि तीव्रशुभपरिणामत्वात्सावशेषमन्यत्र प्रक्षिप्य क्षपयति, ततस्तथैव सम्यग्मिथ्यात्वं. श्रद्ध
च यदि बद्धायुः प्रतिपत्तानंतानुबंधिक्षये च विरमति, ततः पश्चात्कदाचिन्मिथ्यात्वोदये पु-
नरप्यनंतानुबंधिचतुष्टये बध्नाति. तस्यावंध्यतत्कारणत्वात्. क्षीणमिथ्यात्वस्तु तन्न बध्नाति,
कारणाभावात्. तस्मिंश्चानंतानुबंधिचतुष्टये क्षीणेऽभ्रष्टपरिणाम एव यदि म्रियते, तदा सु-
रलोकमेव व्रजति. एवं दर्शनसप्तकक्षयेऽपि कृते वाच्यं. भ्रष्टपरिणामस्तु यदि म्रियते, तदा
नानामतित्वान्नानागतिको भवति, उक्तं च—बद्धाऊ अपडिवन्नो । पढमकसायक्खए जइ
मरिज्जा ॥ तो मिथ्यत्वोदयउं । चिणिज्ज पुज्जो न खीणंमि ॥ १ ॥ तम्मि भउं जाइ दिवं ।
तप्परिणामो य सत्तए खीणे ॥ उवरयपरिणामो पुण । पच्छा नाणामइगइउं ॥ २ ॥ यदि च
बद्धायुरिमां श्रेणिमारभते, तदा दर्शनसप्तकं क्षपयित्वा नियमाद्विरमति, ततो यत्रायुर्बद्धं
तत्रोत्पद्यते, यः पुनरबद्धायुः स निःशेषमपि एतां श्रेणिं समापयत्येव. उक्तं च—नबद्धाऊ
पडिवन्नो । नियमा खीणंमि सत्तए जाइ ॥ इयरो अणुवरउ च्चिय । सयलं सेढिं समाणेइ
॥ १ ॥ तस्य चायं क्रमः—

सम्यक्त्वस्य क्षपितशेषे स्वल्पेऽवतिष्ठमान एव अप्रत्याख्यानप्रत्याख्यनावरणकषायाष्टकं सममेव क्षपयितुमारभते, एतैश्चार्द्धक्षपितैरेवान्याः षोडशकर्मप्रकृतीः क्षपयति, तद्यथा—नरकतिर्यगानुपूर्व्यौ नरकगतितिर्यग्गती एकद्वित्रि चतुरिंद्रियरूपाश्चतस्रो जातयः आतपोद्योतस्थावरसाधारणसूक्ष्माणि निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धिरूपास्तिस्रो निद्राश्चेति १६. एतत्क्षपणोत्तरकालं कषायाष्टस्य यच्छेषं तत्क्षपयति. ततो नपुंसकवेदं, ततः स्त्रीवेदं, ततो हास्यादिषट्कं, ततः पुरुषवेदं खंडत्रयं च कृत्वा खंडद्वयं युगपत्क्षपयति, तृतीयं खंडं तु संज्वलनक्रोधे प्रक्षिपति, पुरुषे प्रतिपत्तरि अयं क्रमो बोधव्यो, नपुंसकादौ तु प्रतिपत्तरि उदितवेदस्य पश्चात्क्षपणं, अनुदितवेदद्वयस्य तु मध्येऽधमवेदस्य प्रथममितरस्य तु तदनंतरं क्षयो वाच्यः, ततः क्रोधादींश्चतुरः संज्वलनान् प्रत्येकमंतर्मुहूर्त्तकालेन क्षपयति, क्षपणं चेषां संक्रमयादिक्रमेण पुरुषवेदवाच्यं. यदाह—सव्वत्थ सावसेसे मग्गिज्जे लगइ पुरिल्लेति क्रोधसत्कं च तृतीयखंडं माने प्रक्षिपति, मानसत्कं मायायां, मायासत्कं च लोभे, क्षपणकालश्च प्रत्येकं सर्वत्रांतर्मुहूर्त्तमानोऽवगंतव्यः, लोभतृतीयखंडं तु संख्येयानि खंडानि कृत्वा

पृथक् पृथक् कालभेदेन क्षपयति, एषामपि संख्याततमं चरमखंडमसंख्येयानि खंडानि क-
रोति. तान्यपि समये समये एकैकं क्षपयन्नंतर्मुहूर्तेन सर्वाण्यपि क्षपयति. इह च दर्शनसप्तके
क्षीणे निवृत्तिबादर उच्यते, न पुनस्तत्र किंचित्क्षपयति, तत ऊर्ध्वं त्वनिवृत्तिबादरो याव-
त्संख्याततमं लोभखंडं, तत ऊर्ध्वमसंख्येयानि तत्खंडानि क्षपयन् सूक्ष्मसंपरायोऽनिधीय-
ते, यावच्चरमलोभांशक्षयः, तत ऊर्ध्वं क्षीणमोहो भवति, सर्वापि चेयं श्रेणिर्मुहूर्तांतर्मुहू-
र्त्तेन समर्थ्यते. स्थापना यथा—

ततः क्षीणमोहगुणस्थः कालस्यांतर्मुहूर्त्तमानस्य योऽसौ द्विचरमसमयस्तत्र निद्रां प्रच-
लां क्षपयति, चरमसमये तु पंचविधं ज्ञानावरणं चक्षुरचक्षुरवधिकेवलदर्शनावरणचतुष्टयं पं-
चविधमंतरायं च क्षपयित्वा सकलमूर्तामूर्तद्रव्यपर्यायप्रकाशकं केवलज्ञानमाप्नोति, ततश्च
जघन्यतोऽन्तर्मुहूर्त्तमुत्कृष्टतो देशोनां पूर्वकोटीं विहृत्य मुक्तिं यियासुरसौ प्रथममावर्जीकरणं
गच्छति. आवर्ज्यतेऽभिमुखीक्रियते मोक्षोऽनेनेत्यावर्ज्यः, शुभमनोवाक्कायव्यापारविशेषः.
" एतस्य तस्य करणं " इति क्विप्रत्यये आवर्जीकरणं, अन्ये त्विदं " आवश्सियकरणं "

इत्याहुः. ततश्च यदि स जगवान् स्वमायुर्वेदनीयादिकर्मभिः सह प्रदेशत. स्थितितश्च समं वेत्ति, तदा आवर्जीकरणानंतरमेव योगनिरोधमारजते. यदि पुनरायुषो वेदनीयादयं कर्माधिकं पश्यति, तदा तत्समीकरणाय समुद्घातं करोति. तस्य चायं क्रमः—प्रथमसमये स्वदेहविष्कंजवाहल्यमायामतस्तूर्ध्वाधोलोकांतगामिनं जीवप्रदेशान् देहान् निर्वास्य केवलज्ञानाजोगतो ध्यानबलेन दंडं करोति, द्वितीयसमये तु तमेव दंडं पूर्वापरदिग्द्वये वितत्य तिर्यग्लोकांतगामि कपाटमिव कपाटं करोति. तृतीयसमये तु तमेव कपाटं दक्षिणोत्तरदिग्द्वयप्रसारणात्तिर्यग्लोकांतगामिनमेव मंथानमिव मंथानं करोति. एवं च लोकस्य प्रायो बहुपूरितं जवति, मंथांतराणि त्वपूरितानि जीवप्रदेशानां विश्रेणिगमनाजावादिति. चतुर्थसमये तान्यपि सह लोकनिष्कुटैः पूरयति, तथा च सर्वोऽपि लोकः पूरितो जवति. एवं पूरणक्रमेण चतुर्भिः समयैर्मंथांतरमंथकपाटदंडानपि संहृत्य देहस्थ एव जवति. समुद्घाते च मनोवाग्योगौ न व्यापारयति प्रयोजनाजावात्, काययोगं पुनरौदारिकौदारिकमिश्रकार्मणरूपं युनक्ति. न शेषं. उक्तं च—यस्य पुनः केवलिनः । कर्म जवत्यायुषोऽतिरिक्ततरं ॥

समुद्घातं भगवा-नथ गच्छति तत्समीकर्तुं ॥ १ ॥ दंडं प्रथमे समय । कपाटमथ चारे ॥
था समये ॥ मंथानमथ तृतीये । लोकव्यापी चतुर्थे तु ॥ २ ॥ संहरति पंचमे त्वं-तराणि
मंथानमथ पुनः षष्ठे ॥ सप्तमके तु कपाटं । संहरति ततोऽष्टमे दंडं ॥ ३ ॥ औदारिकप्रयो-
क्ता । प्रथमाष्टमसमययोरसाविष्टः ॥ मिश्रौदारिकयोक्ता । सप्तमषष्ठद्वितीयेषु ॥ ४ ॥ कार्मण-
शरीरयोगी । चतुर्थके पंचमे तृतीये च ॥ समयत्रयेऽपि तस्मिन् । भवत्यनाहारको नियमात्
॥ ५ ॥ एवमष्टसामयिकं समुद्घातं कृत्वा निवृत्तः सन् योगत्रयमपि युनक्ति, यतः स जग-
वानद्यापर्यंतमुहूर्तत्रयाविमोक्षः, ततस्तस्मिन् काले यद्यनुत्तरसुरादिना मनसा पृच्छ्यते, तर्हि
तद्व्याकरणाय मनःपुद्गलान् गृहीत्वा मनोयोगं युनक्ति. एवं मनुष्यादिना पृष्टो वाग्योगमपि,
काययोगं पुनर्युंजानः स आगच्छेच्चेत्तिष्ठेन्निषीदेत्, प्रातिहारिकं पीठफलकाद्यं प्रत्यर्पयेत्.
तदेवमंतमुहूर्ते यथायोगं योगत्रयमपि व्यापार्य, ततो लेश्यातीतं परमनिर्जराहेतुध्यानं प्र-
तिपत्सुरवश्यं योगनिरोधाय उपक्रमते, योगे सति यथोक्तध्यानस्यासंभवात्. योगनिरोधं च
कुर्वन् प्रथमं पर्याप्तसंज्ञिपंचेंद्रियस्य प्रथमसमये यावान् मनोऽव्यापारस्तस्मादसंख्येयगु-

णहीनं मनोयोगं प्रतिसमयं रुंधानोऽसंख्यैः समयैस्तमपि सामस्त्येन रुणद्धि. ततो द्वीन्द्रियस्य पर्याप्तस्य जघन्ययोगिनः सत्काद्वाग्योगादसंख्यगुणहीनं वाग्योगं समये समये रुंधानोऽसंख्येयैः समयैस्तमपि साकल्येन रुणद्धि. ततः सूक्ष्मस्य पनकजीवस्य प्रथमसमयोत्पन्नस्य यः काययोगः, तस्मादसंख्यगुणहीनं काययोगं समये समये रुंधन्नसंख्यैः समयैस्तमपि सर्वं रुणद्धि. तदा च सूक्ष्मक्रियमप्रतिपातिध्यानमारोहति, तत्सामर्थ्याच्च वदनोदरादिविवरपूरणेन संकुचितदेहत्रिभागवर्तिप्रदेशो भवति. एवमयोगतान्निमुखो भूत्वा नातिद्रुतं नातिलंबितं ह्रस्वपंचाक्षरोच्चिरणमात्रेण कालेन विशिष्टां चांतर्मुहूर्तिकी सर्वसंवररूपां शैलेशीं प्रतिपद्यते, तदानीं च व्युपरतक्रियमप्रतिपातिध्यानं ध्यायति. तस्यां शैलेश्यवस्थायां वर्त्तमानः प्रतिसमयमसंख्येयान् कर्मस्कंधान् विपाकतः प्रदेशतो वा वेदनेन क्षपयन् चरमसमये वेदनीयमायुर्नामगोत्रमित्येताश्चतुरः कर्मांशान् क्षपयित्वा ततोऽनंतरसमये औदारिकतैजसकार्मणशरीराणि सर्वथा त्यक्त्वा तस्मिन्नेव समये कोशबंधविमुक्तैरंडफलमिव स भगवान् कर्मबंधविमुक्तोऽविग्रहगत्या समश्रेणांतरप्रदेशांतरास्पर्शनेन ऋजुश्रेणिं प्रपन्नः साकारोपयुक्त ऊर्ध्वलोकांतमु-

पैति. न हि लोकाग्रप्राप्तिमात्रेणैव सर्वज्ञविरतेः सम्यक् फलं मन्यंते, संततसुखानुभवार्थमेव तेषां प्रवृत्तेरित्याह—

॥ मूलम् ॥—जम्मजरमरणव्वायव—भयवाहिविवज्जिउं णिउं तत्थ ॥ सोऽणंतनाणदंसण—विरउं सुहमणुवहइ निच्चं ॥ ४८ ॥ व्याख्या—स साधुस्तत्र लोकाग्रे स्थितः सन् नित्यं सर्वकालं सुखं परमाह्लादलक्षणं अनुभवति स्वयं वेदयति. कुतस्तत्र शाश्वतसुखानुभवइति विशेषणद्वारेण हेतुमाह—जम्मेत्यादि, जन्म नूतनदेहप्राप्तिः, जरा वयोहानिः, मरणं प्राणत्यागः, आपदो वधबंधरोधाद्याः, भयं इहलोकादि, व्याधयो रोगास्तैर्विवर्जितः. ननु जन्माद्यभावे उपलक्षणकल्पोऽयं भविष्यतीत्याह—अनंतानि स्वावारककर्मक्षयादप्रतिपातीनि ज्ञानदर्शनवीर्याणि यस्य सोऽनंतज्ञानदर्शनवीर्यः. ततो जन्मादिदुःखरहितत्वादनंतज्ञानादिमयत्वाच्च स सिद्धिपदं प्राप्तः केवलजीवस्वभावजं परमानंदनिःस्पंदरूपं संसारीनिर्जीवैः स्वप्नेऽप्यननुभूतं शाश्वतं सुखं भुंक्ते इत्यर्थः. तदेवमुक्तमकर्मापेक्षमुत्कृष्टफलं ॥ ४७ ॥ अथ सकर्मापेक्षं तदाह—

॥ मूलम् ॥—वठेणं मुणी जं खिवइ । कम्मणा तितिएण सेसेण ॥ होइ लवसत्तमो वा । जहन्नउ जाइ सोहम्मे ॥ ४९॥ व्याख्या—वा इत्युक्तफलस्यैव पक्षांतरसूचनार्थः, षष्ठेनोपवासद्वयेन मुनिर्निर्ग्रंथो यत्कर्म क्षिपति निर्जरयति, तावन्मात्रेण कर्मणा शेषेणायुषः समानत्वादनिर्जीर्णेन स साधुर्लवसप्तमसुरो भवति. पूर्वभवे सिद्धिगमनयोग्यविशुद्धाध्यवसायानपि सप्तभवमुष्टिलवनमात्रेण कालेन न्यूनायुष्कतया सिद्ध्यगमनाद्योऽनुत्तरविमानेषूत्पद्यते, स देवः समयज्ञापया लवसप्तम उच्यते. तथा च श्रीविवाहप्रज्ञप्तिः—

अत्थि णं भंते लवसत्तमा देवा हंता अत्थि, से केणट्ठेणं भंते एवं वुच्चइ लवसत्तमा देवा? गोयमा! से जहानामए केइ पुरिसे तरुणे जाव निउणसिप्पोवगए साली वा, वीही वा, जाव जवाणि वा, पक्काणं परियायाणं हरियाणं तिक्खेणं नवपज्जणेणं असिपत्तेणं पमिसाहरिय साहरिय जावइणामेव त्तिकट्टु सत्तलवे लविज्जाजोइणं गोयमा! तेसिणं देवाणं एवइयं कालं आउअं पहुप्पंते तेणं ते देवा तेणं एव भवग्गहणेणं सिज्झंता जाव अंतं करंता, से तेणट्ठेणं गोयमा! एवं वुच्चइ लवसत्तमा देवा. अणुत्तरोववाइयाणं भंते देवा केवइएणं क-

म्मावसेसेणं अणुत्तरोववाइअ देवत्ताए उववज्जइ. ...ाववइयं गइजत्तिए समणे नि-
गंथे कम्मं निज्जरेइ; एवइणं कम्मावसेसेणं अणुत्तरोववाइयदेवत्ताए उववज्जइ. तदेवमुक्तु-
ष्टतोऽकर्मणः सकर्मणश्च चारित्रफलमुक्त्वाथ जघन्यतस्तदाह—" जहन्नउ " इत्यादि. ज-
घन्यतः साधुस्तादृग्मनःसंहननादिबलहीनोऽपि यथाशक्ति पूर्वोक्तक्रियानिरतः सौधर्म क-
ल्पं याति. यदाह—अविराहियसामन्नस्स । साहुणो सावगस्स य जहण्णो ॥ सोहम्मे उव-
वाउ । भणिउं तिल्लुक्कदंसीहिं ॥ १ ॥ तदेवमुक्तं फलद्वारं, तल्लक्षणे च समर्थिता सर्वापि
सर्वविरतिवक्तव्यता. तत्तत्संपदकंपसद्मपरमज्योतिःसमुन्मीलन-ध्वस्ताज्ञाननमोनरः सुरनर-
श्रेणीनिरन्यार्चितः ॥ कल्याणप्रभवः प्रभावभवनं धार्यः सुधीभिर्मनो-मंजूषासु सुखं तनोतु
कृतिनां चारित्रचिंतामणिः ॥ १ ॥ क्रोधः स्फूर्जदिरोधो निकृतिरुपचिता सावधानोऽभिमानो
। लोभः क्षोभस्य मूलं रतिररतिकरी दुर्व्यपोहश्च मोहः ॥ जातोन्मादः प्रमादः कुसुमशरशरा
दुर्निवारा जगत्यां । तावद्यावन्महौजा भजति रणजुवं नैष चारित्रयोधः ॥ २ ॥ इति श्रीअं-
चलगच्छाधिराजश्रीमहेन्द्रप्रभसूरिशिष्यश्रीजयशेखरसूरिविरचितायां स्वोपज्ञोपदेशचिंतामणि-

टीकायां चतुर्थः सर्वविरत्यधिकारः समाप्तः ॥

अथाशेषं पूर्वोक्तमर्थमुपसंहरन्नाह—

॥ मूलम् ॥—इह दुल्लहसामग्गी-पूव्वा विरई मए डुहाऽनिहिया ॥ जं आयणिय भविया । नणु जिणधम्मे पयट्टंति ॥ ५० ॥ व्याख्या—इत्युक्तप्रकारेण दुर्लभसामग्रीपूर्वा मया देशनः सर्वतश्चेति द्विधा विरतिरनिहिता. तत्र द्वितीयेऽधिकारे सामग्रीदुर्लभता, तृतीये देशविरतिः, चतुर्थं सर्वविरतिश्च, यां विरतिमाकर्ण्य भव्या आसन्नसिद्धिका ननु निश्चितं जिनधर्मे प्रथमाधिकारव्याख्याते प्रवर्तंते, ज्ञानश्रद्धानाचरणैरुद्यंति, तेन चतुर्णामप्यधिकाराणां परामर्शः कृतः. ॥ ५० ॥ इदानीं जिनधर्मप्रवृत्तानां विशेषस्थैर्यापादनार्थमाह—

॥ मूलम् ॥—अप्पत्तियं सुहं एइ । जाइ अनिसेहियं डुहं तेसिं ॥ जेसिं जिणोवइठेसु । होइ अत्थेसु अणुराउ ॥ ५१ ॥ व्याख्या—उत्तानार्था, नन्वेवं सकलसुखानां सुलभेऽप्युपाये किमद्यापि विश्वव्यापि संतापमनुभवंति जंतव इत्याह—

॥ मूलम् ॥—जे संसारपरित्ता । गुरुस जत्ता गुणेस आजत्ता ॥ तेसिं चिय जिणवत्तं ।

तत्तं परिणमइ चित्तंमि ॥ ५२ ॥ व्याख्या—ये जीवा एवंविधा भवंति. कीदृशा इत्याह—परीत्तः तथा जव्यत्वपरिपाकवशात्स्वरूपीभूतः संसारो येषां ते परीत्तसंसाराः, क्रांतस्य परतो निपातः प्राकृतत्वात्. तथा गुरुषु धर्मोपदेष्टृषु जक्ता विनीताः, तथा गुणेषु क्षांतिमार्दवार्जवादिषु आयुक्ता आदृताः, तेषामेव चित्ते जिनोक्तं तत्त्वं उपदेशरहस्यं परिणमति स्थिरीजवति. ॥ ५२ ॥ अथ व्यतिरेकमाह—

॥ मूलम् ॥—जे उण चरणे अलसा । कम्मरसा पवयणे अपत्तरसा ॥ तेसिं ऊसरवुठ्ठिव्व । निप्फला होइ जिणवाणी ॥ ५३ ॥ व्याख्या—जिनानां जगवतां वाणी तेषु श्रोतृषु ऊषरक्षेत्रेषु वृष्टिरिव निःफला जवति. तेषु केष्वित्याह—" जे उणेत्यादि " पुनः शब्दः पूर्वेज्यो व्यतिरेकज्ञापनार्थः. ये चरणे साधुश्राद्धक्रियायामलसाः प्रमादिनः, तथा कर्मणां प्रस्तावाद्शुज्ञानां मिथ्यात्वाज्ञानादीनां वशा आयत्ताः. अत एव प्रवचने द्वादशांगीरूपे पीयूषरसप्रायेऽपि अप्राप्तरसा अलब्धस्वादाः, यो हि यत्रालब्धस्वादः स स्वादुन्यपि तत्र वस्तुनि न रज्यते, इति प्रतीतमेव. ॥ ५४ ॥ यत एवं ततः—

॥ मूलम् ॥—निच्चमिमे उवएसा । सुपुरिसपरिस्साइ चित्र धरणिज्जा ॥ मा निवडंतु कुपत्ते ॥ कयावि दुरूढ सोवीरे ॥ ५५ ॥ व्याख्या—इमे प्रागुक्ता उपदेशा विनयविवेकवैराग्यादिगुणग्रामाभिरामतया सुष्ठु शोभनाः पुरुषाः सुपुरुषाः, तेषां परिषद् घटा तस्या एव धरणीयाः संग्रहणोचिताः. मा कदापि सौवीरे दुग्धमिव कुपात्रे तिंतिणिकत्वादिदोषदुष्टे निपतंतु. यथा हि स्निग्धमधुरमपि दुग्धं सौवीरे कांजिके पतितमात्रमेव स्निग्धत्वमधुरत्वादिस्वरूपादपाङ्क्ष्यति, दधिघृताद्युत्तरकरणस्य चायोग्यीभवति, तथा सरसा अपि गुरूपदेशाः कुपात्रे निपतितमात्रा एवास्मरणादिना विनश्यंति, सम्यक्त्वदेशविरत्यादिस्वकार्यस्यायोग्यीभवंति.'यदाह—आमे घडे निहित्तं । जहा जलं तं घडं विणासेइ ॥ इय सिद्धंतरहस्सं । अप्पाहारं विणासेइ ॥ १ ॥ ततोऽमी सुपुरुषपरिषदैव धार्याः, यथा न लभंते कदाचिदपि दुर्जनसंकटमिति गाथार्थः. ॥ ५५ ॥ अथ सहृदयहृदयं प्रासानामेषां फलातिशयमभिलष्यन्निदमाह—

॥ मूलम् ॥—एसा उवएसाली । साली व्व विबुहहिययठाणेसु ॥ सुहभावसलिलसित्ता ।

फलेउ मणवंछियफलेण ॥ ५६ ॥ व्याख्या-एषा प्राग्निर्दिष्टा उपदेशाली उपदेशश्रेणिरुज्ज्व-
लत्वान्मंगल्यत्वाच्च शालिरिव विबुधानां विदुषां हृदयान्येव सुसंवृतत्वाद्विस्तारहेतुत्वाच्च
स्थानानि केदारभूमयस्तेषु निहिता, ततः शुभो भावो मनःपरिणामः, स एव निर्मलत्वात्
सलिलं तेन सिक्ता सती मनोवांछितफलेन ऐहिकपारत्रिकसुखप्राप्तिलक्षणेन फलतु. शालि-
र्हि केदारेषूप्तो जलेन सिक्तः कर्षुकमनोवांछितेन फलेन फलतीत्युपमार्थः सुबोधः. ॥५६॥ अथ
प्रकरणकारो ग्रंथांतरेण निजाभिधानमभिदधानः स्वस्य गुंफश्रमस्याफलतादोषं परिहरन्नाह-

॥ मूलम् ॥—कुंजरनयरविसेसा—हवसरसपसूणवरिसमज्जाए ॥ सरिसक्करनामेणं ।
रइयमियं सपरबोहट्ठा ॥ ५७ ॥ व्याख्या—कुंजर नयर विसेस आहव सरस पसूण वरिस
इत्येते शब्दाः प्राकृतरूपा एव समश्रेण्या उत्तरार्धयेण संस्थाप्यंते, ततश्च एषां ये मध्यवर्णा
भवंति, तत्सदृशाक्षरं प्राकृतभाषया नाम यस्य, तेन रचितं गुंफितमिदं प्रकरणं, किमर्थं?
स्वपरबोधार्थं, स्व आत्मा, परे स्वव्यतिरिक्ताः साधुश्रावकास्तेषां बोधः स्वस्वाचारकौशलं,
तदर्थं. ॥ ५७ ॥ अथास्य सुवर्णार्थिसंबंधबंधुरस्य निरस्तसमस्तदौर्गत्यक्लेशस्य परमनिधानदे-

ञस्य उपदेशचिंतामणिप्रकरणस्यायतौ स्थिरावस्थायित्वमाशंसुरिदमाह-

॥ मूलम् ॥-जाव सिरिवीरतित्थं । ताव इमा पंकियाण हिययंमि ॥ तह रयणा रयणावलि-सरिसा सिरिसाहणी होउ ॥ ५८ ॥ व्याख्या-यावदिह श्रीवीरस्य वर्धमानस्वामिनः श्रेयःश्रेणिविश्राणनसमर्थं तीर्थं शासनं विजयते, तावदियं मम रचना धर्माधिकारक्रमोपन्यासरूपा पंक्तितानां धीमतां हृदयेंतःकरणे-स्थिता सती श्रियो वांछिताः संपदः साध्यंतेऽनयेति श्रीसाधनी संपत्संपादयित्री भवतु. कथंभूता रचना? सुसंहतत्वेन सद्गुणत्वेन निर्मलत्वेन च रत्नावलीसदृशी. रत्नावली हि हृदये वक्षसि धृता श्रियं सौभाग्यशोभां साधयतीति. ॥ ५८ ॥

अथ ग्रंथकारप्रशस्तिः—वंशे वीरविनोरभूदिति वहन् वीरत्वमत्यूर्जितं । मिथ्यात्वादिविपक्षवारणविधौ धर्मोयमे चोत्तमे ॥ जातः पूर्वमिहार्यरक्षितगुरुश्चक्रेश्वरीदेवतां । साक्षात्कृत्य तपोनिरंचलगणं विस्तारयन् भूतले ॥ १ ॥ मौलिं धुनातिस्म विलोक्य यस्य । निःसंगतां विस्मितचित्तवृत्तिः ॥ श्रीसिद्धराजः स्वसमाजमध्ये । सोऽभूत्तनः श्रीजयसिंहसूरिः ॥ २ ॥

तत्पट्टपंकरुहराजहंसः । सदा सदाचारकृतप्रशंसः ॥ गुरुर्निरस्तान्यमतप्रघोषः । श्रीधर्मघोषः स्वगणं पुपोष ॥ ३ ॥ येनाज्ञानतमोघ्नवाक्यकिरणैर्दूरागतश्रावक-स्वांतांभोरुहतश्चतुर्भिरधिकाशीतिः सुबद्धा अपि ॥ रोलंबा इव दूरिताः प्रथमकालोकेऽप्यहो संशयाः । श्रीमानेष महेंद्रसिंहसुगुरुर्व्रजे ततो नानुवत् ॥ ४ ॥ सिंहप्रभो गुरुरथ प्रथितस्ततोऽपि । रेजे जगत्यजितसिंहगुर्गुणाब्धिः ॥ पापद्विपक्षपणसिंहसमानशक्ति-र्देवेन्द्रसिंहगुरुरभ्युदयाय तस्मात् ॥ ५ ॥ नावारिनिष्कृपतपःकरवालशाली । धर्मप्रभः सुगुरुराज इतो रराज ॥ पीयूषबिंदुसदृशाक्षरवाग्विलासः । श्रीसूरिसिंहतिलकश्च ततः प्रतीतः ॥ ६ ॥ तत्पट्टनंदनवन-कल्पद्रुमसमश्रियः ॥ जयंति सांप्रतं श्रीम-न्महेन्द्रप्रभसूरयः ॥ ७ ॥ यत्पाणिमाहुः कृतिनः श्रियश्च । गिरश्च मैत्री घटनैकतीर्थं ॥ संपर्कतस्तस्य जनो विनीतः । श्रीमांश्च धीमांश्च किमन्यथा स्यात् ॥ ८ ॥ येषां कीर्तिर्नरे नरेण धवलीकर्तुं जगत्प्रोद्यते । नाभूत्कोऽपि स यो ददाति तमसस्त्रस्तस्य शश्वत्पदं ॥ नन्नाशस्य च तस्य निर्जितचरैर्दुर्वादिवृंदैः स्फुरत्-कारुण्यैरिव वासमिरचला स्वीये सुखेऽदीयत ॥ ९ ॥ तेषां शिष्याः श्रीम-न्मुनिशेखरसूरयो नयोपेताः ॥

श्रीजयशेखरसूरिः । श्रीसूरिमेरुतुंगश्च ॥ १० ॥ एतेषु शिष्यः खलु मध्यमोऽहं । मोहं कु-
बोधप्रत्ययं विहाय ॥ गुरूपदेशादुपदेशचिंता-मणिश्रुतं सूत्रतया व्यधुंक्त ॥ ११ ॥ व्यधां च
तस्य स्वयमध्यलीकां । टीकां कथासारविचारहृद्यां ॥ दंतायुधांत्रोनिधिचंद्रसंख्ये (१४३६)।
वर्षे पुरे श्रीनृसमुद्रनाम्नि ॥ १२ ॥ अनुजश्च सतीर्थ्यश्चा-साकं टीकामिमां मुदा ॥ लिलेख
ग्रंथमादर्शं । मानतुंगगणिर्गुणी ॥ १३ ॥ प्रत्यक्षरं निरूप्यास्यां । ग्रंथमानं विनिश्चितं ॥ सह-
स्रा द्वादश श्लोका-श्चतुःपञ्चाधिका इति ॥ १४ ॥ कालोऽसौ कलिरुत्कटः किल पटुप्रज्ञो-
ज्झितोऽयं जनः । श्रेयःकार्यमवार्यविघ्नविवशं विद्धत्तमां दुर्लभा ॥ एवं सत्यपि सिद्ध्यतिम्म
यदयं गुंफप्रयासो मम । श्रीमद्देवगुरुप्रसादमहिमा मन्ये तदल्पद्युतः ॥ १५ ॥ वक्तुः कोऽपि
विशेष एष महिमा जैनागमस्योक्तयः । श्रूयंते बहुशः श्रुता अपि जनैरुत्कैरपूर्वा इव ॥ गो-
धूमाः खलु ते तदेव च घृतं सैवेह खंडावली । संस्कर्तुः कलयाश्रितोऽजिनवतां किंत्वत्र भक्ते
रसः ॥ १६ ॥ व्यपार्थमुत्सूत्रमपप्रयोगं । मया यदासूत्रितमत्र किंचित् ॥ परोपकारैकरसैरशि-
क्षे-स्तदोध्यमेवाशु बुधैः प्रसह्य ॥ १७ ॥ उन्मीलन्नीलचूलः प्रवरजरलुलत्कंठिकः स्वर्णकांति-

Bharatiya Vidya Bhavan's Granthagar
BOOK CARD

Call No ADh/JAy/15956 Title
Upadesacintakan A IV
Author Jayasekharasuri

Date of Issue	Borrower's No	Date of issue	Borrower's No